
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

सर्वशास्त्रेभ्यः श्रेष्ठं दर्शयति ये… …परमो धर्मो निरूप्यते ॥ परमत्वे हेतुः प्रकर्षेणोत्कृष्टं केनचित् फलाभिसंधि
लक्षणांकपटं यस्मिन् सः प्रशस्ते… …केवलमीश्वराराधनलक्षणो धर्मो निरूप्यत इति ॥ अधिकारिणोपि धू
म्मस्य परमत्वमाह निर्मत्सराणां प… …तद्रहितानां सतां भूतानुकंपिनां एवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रे
ष्ठ्यमुक्तं ज्ञानकांडविषयेभ्योपि श्रैष्ठ्यमाह वेद्यमिति वास्तवं परमार्थभूतं वस्तु वेद्यं न तु वैशेषिकादीनामिव नवद्रव्यगुणादि रू
पं ॥ पदार्था ॥ वास्तवशब्देन वस्तुनोंशो जीवो वस्तुनः शक्तिर्माया च वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः ॥ पृथगिति वेद्यं प्रयत्नेन
वक्तात्तुं शक्यमित्यर्थः ॥ तत्र किमत्राह ॥ शिवदं ॥ परमसुखदं किंच ॥ आध्यात्मिकादितापत्रयोन्मूलनं ॥ अनेन ज्ञानकांडविष
येभ्यः श्रैष्ठ्यं दर्शितं ॥ कर्तृतोपि श्रैष्ठ्यमाह ॥ महामुनिः श्रीनारायणः तेन प्रथमं संक्षेपतः कृते देवताकांडविषयगतं श्रैष्ठ्यमाह
परैः शास्त्रैस्तत्तदुक्तसाधनैर्वा ईश्वरो हृदि किं वा सद्य एवावरुध्यते स्थिरीक्रियते ॥ वाशब्दः कटाक्षे किंतु विलंबेन कथंचिदेव ॥ अ
त्र शुश्रूषुभिः श्रोतुमिच्छुभिः तत्क्षणादेवावरुध्यते ॥ ननु इदमेव तर्हि किमिति सर्वे न शृण्वंति ॥ तत्राह ॥ कृतिभिरिति ॥ श्रव
णोत्कण्ठानुपुण्यं विना नोत्पद्यते इत्यर्थः ॥ तस्मात् त्रिकांडत्रयार्थस्य यथावत् प्रतिपादनादिदमेव सर्वशास्त्रेभ्यः श्रेष्ठं ॥ अतोनि
त्यमेतदेव श्रोतव्यमिति भावः ॥ २ ॥ ॥ ॥ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

भा॰प्र
॥२॥

इदानींतुनकेवलंसर्वशास्त्रेभ्यःश्रेष्ठत्वादस्यश्रवणंविधीयते॥अपितुसर्वशास्त्रफलरूपमिदंअतःपरमादरेणसेव्यमित्याहनि
गमेतिनिगमोवेदःसएवकल्पतरुःसर्वपुरुषार्थोपायत्वात्॥तस्यफलमिदंभागवतंनामेति॥ननुवैकुंठगतंनारदेनानीयमह्यंदत्तं
मयाचशुकस्य॥मुखेनिहितंनत्वतन्मुखाद्भुविगलितंशिष्यप्रशिष्यादिरूपपल्लवपरंपरयाशनैरखंडमेवावतीर्णंनतूच्चनिपात

धर्म्मःप्रोज्झितकैतवोत्रपरमोनिर्म्मत्सराणांसतांवेद्यंवास्तवमत्रवस्तुशिवदंतापत्रयोन्मूलनं॥श्रीमद्भा
गवतेमहामुनिकृतेकिंवापरैरीश्वरःसद्योहृद्यवरुध्यतेत्रकृतिभिःशुश्रूषुभिस्तत्क्षणात्॥२॥नि
गमकल्पतरोर्गलितंफलंशुकमुखादमृतद्रवसंयुतं॥पिबतभागवतंरसमालयंमुहुरहोरसिकाभु
विभावुकाः॥३॥ ॥

नेनस्फुटितमित्यर्थः॥एतच्चभवि[illegible]द्दपिमूलवर्णनादिष्टंअनागताख्यानेनैवास्यशास्त्रस्य
प्रवृत्तेः॥अतएवामृतरूपेणाद्रवे[illegible]रवस्पष्टंफलमिवस्वादुभवतीतिप्रसिद्धं॥अत्रशुकोमुनिःअमृ
तंपरमानंदःसएवद्रवोरसःरसीवे[illegible]वतिनिश्रमेः॥अतहेरसिकाःहेरसज्ञाःतत्रापिभावुकाः॥हेरस

राम
॥३॥

विशेषभावनाचतुराः ॥ अहो भुवि गलितमि[...] ॥ इदं भागवतं नाम फलं मुहुः पिबत ननु त्वगष्ट्यादिकं विहाय फलाद्रसः पी
यते कथं फलमेव पातव्यमित्यत्राह ॥ रसं रसरू[...]आदेर्हेयांशस्याभावात् ॥ फलमेव कृत्स्नं पिबत ॥ अत्र च रसतादात्म्यविवक्ष
या रसवत्वस्याविवक्षितत्वाद्गुणवचनेपि रसशब्दे मतुपः प्राप्त्यभावात्तेन विनैव रसं फलमिति सामानाधिकरण्यं ॥ तत्र फल
मित्युक्ते पानासंभवो हेयांशप्रसक्तिश्च भवेदिति तन्निवृत्त्यर्थं रसमित्युक्तं रसमित्युक्तेपि गलितजस्य रसस्य पातुमशक्यत्वात् फ
लमित्युक्तमिति द्रष्टव्यं ॥ न च भागवतापानं मोक्षेपि साज्यमित्याह आलयं लयो मोक्षः ॥ अभिविधावाकारः लयमभिव्याप्य नहि
दं स्वर्गादिसुखवन्मुक्तौ ह्रसेस्यते किंतु सेव्यत एव वक्ष्यति हि ॥ आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे कुर्वंत्यहैतुकीं भक्तिमि
त्थंभूतगुणो हरिः ॥ इति ॥ ३ ॥ तदेवमनेन श्लोकत्रयेण विशिष्टेष्टदेवतानुस्मरणाद्येवं कं प्रारीप्सितस्य शास्त्रस्य विषयप्र
योजनादिसंबंधाधिकारिणां वैशिष्ट्येन सुखसेव्यत्वेन च श्रोतृजनमभिमुखीकृत्य शास्त्रमारभते ॥ नैमिष इति ॥ ब्रह्मणा विसृष्टस्य
मनोमयस्य चक्रस्य नेमिः ॥ शीर्यते कुंठीभवती यत्र तन्नैमिशं नैमिशमेव नैमिषं ॥ तथा च वायवीये ॥ एतन्मनोमयं चक्रं मया सृ
ष्टं विसृज्यते यत्रास्य शीर्यते नेमिः स देशस्तपसः शुभः इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयं ॥ प्रणिपत्य महादेवं विसस
र्ज पितामहः ॥ तेपि हृष्टतरा विप्राः प्रणम्य जगतां प्रभुं ॥ मययुस्तत्र चक्रस्य यत्र नेमिर्व्यशीर्यत ॥ तद्वनं तेन विख्यातं नैमिषं मुनिपूजि

भा॰ प्र॰
॥५॥

नमिति ॥ नैमिष इति पाठे वाराहपुराणोक्तं द्रष्टव्यं तथा हि गौरमुखमृषिं प्रति भगवद्वाक्यं ॥ एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा ॥ उवाच निमिषेणेदं निहतं दानवं बलं ॥ अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितं ॥ भविष्यति यथार्थं वै ब्राह्मणानां विशेषकमिति ॥ अनिमिषः श्रीविष्णुः अनुस्मृतिदृष्टत्वात् तस्य क्षेत्रे तथा चात्रैव शौनकादिवचनं क्षेत्रेऽस्मिन्वैष्णवे वयमिति ॥ स्वः स्वर्गो गीयते इति स्वर्गायो

नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ॥ सत्रं स्वर्गायलोकाय सहस्रसममासत ॥४॥ छ ॥

...रिः सस्य वलोकः ॥ भक्तानां निवासस्थानं तस्मै तन्मात्रयुक्तस्यर्थः सहस्रं समाः संवत्सराः अनुष्ठानकालो यस्य तत्सत्रं सत्त्रं सन्तं कंकर्मोऽ
...शय आसत उपविष्टाः ॥ यद्वा ॥ आसत अक...[torn]...आलभनेऽनिर्वृयतिउपयंती स्यादिवत्त मतस्य योद्धारणमात्रार्थत्वेन आसन
...धातर्थस्याविवक्षितत्वात् ॥४॥ प्रातः...[torn]...ताअग्नयोपेसे यद्वाहूयतइति ऊनंद ध्यादिजेनकूताऽग्नयोये से यद्वा...

रास
॥४॥

सत्वेन अग्निहोत्रविधिना हुता अपि नी... सत्रविनेन हूताग्नयो ये ते अनेन निस्नैमित्तक होमसाकल्यं दर्शितं ॥ इदं तु स्वमारां
आदरात् पप्रच्छुः ॥ ५ ॥ विविधिशिष्य...तथा... सूत त्वया सर्वशास्त्रज्ञानातिशय मा डूः ॥ तदेवैत्रिभिः श्लोकैः ॥ इतिहासोमहाभारत
दि: तेन सहितानि न केवलमधीतानि अपि तु अख्यातान्यपि ॥ व्याख्यातानि च उत अपि यानि धर्मशास्त्राणि तान्यपि ॥ ६ ॥ किं

त एकदा तु मुनयः प्रातर्हुतहुताग्नयः ॥ सत्कृतं सूतमासीनं पप्रच्छुरिदमादरात् ॥ ५ ॥ ऋषय ऊचुः ॥ त्व
यास्वलु पुराणानि सेतिहासानि चानघ ॥ आख्यातान्यप्यधीतानि धर्मशास्त्राणि यान्युत ॥ ६ ॥ यानि
वेदविदां श्रेष्ठो भगवान्बादरायणः ॥ अन्ये च मुनयः सूत परावरविदो विदुः ॥ ७ ॥ वेत्थ त्वं सौम्य तत्स
र्वं तत्त्वतस्तदनुग्रहात् ॥ ब्रूयुः स्निग्धस्य शिष्यस्य गुरवो गुह्यमप्युत ॥ ८ ॥ तत्र तत्राञ्जसायुष्मन्
भवता यद्विनिश्चितं ॥ पुंसामेकांततः श्रेयस्तन्नः शंसितुमर्हसि ॥ ९ ॥

च यानीत्यादि विदां विदुषां मध्ये श्रेष्ठः यानि वेद परापरे सगुणानि
र्गुणे ब्रह्मणि विदंतीति तथा वेत्थ जानासि सौम्य हे साधो तेषामनुग्रहात् ॥ ७ ॥ तत्त्वतो ज्ञाने हेतुमाह ॥ ब्रूयुरिति स्निग्धस्य प्रेमवतः उत य
द्रहस्यमपि ब्रूयुरेव ॥ ८ ॥ अंजसाग्रं यादेवे न एकांततः श्रेयः अव्यभिचारि श्रेयः साधनम् ॥ ९ ॥

अन्येपि बहुना कालेन बहुशास्त्रश्रवणादिभिर्विनिश्चित्वं तु रेखाङ्कः प्रायेणेति हे साधो सम्य ॥ अस्मिन्युगे कलौ अल्पायुषो जनाः तत्रापि
मंदाः अलसाः तत्रापि सुमंदमतयः ॥ तत्रापि सुमंदमतयः तत्रापि मंदभाग्याः विघ्नाकुलाः ॥ तत्रापि उपद्रुता रोगादिभिः ॥१०॥ नच ब-
हुशास्त्रश्रवणेमिनावर्तेव फलसिद्धिरित्याह भूरीणि कर्माण्यनुष्ठेयानि येषु तानि समुद्धृत्य यथा यद्बुद्धत्य येनोद्धतवचनेन आत्मा
बुद्धिः प्रसीदति सम्यग्गुपशाम्यति ॥११॥ प्रश्नानां रसूतजानासीति पंचभिः भद्रं त इत्युत्सुकेनाशीर्वादः भगवान्निरतिशयैश्वर्यो दि-

प्रायेणाल्पायुषः साधो कलावस्मिन्युगे जनाः ॥ मंदाः सुमंदमतयो मंदभाग्या ह्युपद्रुताः ॥१०॥ भूरीणि
भूरिकर्माणि श्रोतव्यानि विभागशः ॥ अतः साधोत्र यत्सारं समुद्धृत्य मनीषया ॥ ब्रूहि नः श्रद्दधानानां ये-
नात्मा सुप्रसीदति ॥११॥ सूत जानासि भद्रं ते भगवान्सात्वतां पतिः ॥ देवक्यां वसुदेवस्य जातो यस्य चिकी-
र्षया ॥१२॥

ग्गुणाः ॥ सात्वतां सच्छुद्धेन सत्त्वमूर्तिं भगवान्तस्उपासत पाविद्यते येषां इति सत्वतो भक्ताः ॥ स्वार्थेऽण् राक्षसवायसवत्
सादिवन्तस्य चाश्रवणामार्षं तद्देवं सात्वं[illegible]तामिभवतितेषां पतिः पालकः ॥ यस्यार्थविशेषस्य चिकीर्षया वसुदेवस्य भार्यायां देवक्यां
जातः ॥१२॥

अंग हे सूत तन्नो वर्णयितुं अर्हसि तदाह यस्यावतारो भूतानां क्षेमाय पालनाय भवाय समृद्धये ॥१३॥ तत्प्रभावमनुवर्ण-
यंतस्तद्यशःश्रवणोत्सुकतामाविष्कुर्वंति आपन्न इति त्रिभिः ॥ संसृतिमापन्नः प्राप्तः विवशोऽपि ततः संसृतेः ॥ अत्र हेतुः यद्यतो ना-
म्नः भयमपि स्वयं बिभेति ॥१४॥ किं च यत्पादः संश्रयो येषां अंतरंगप्रशमोऽयनं वर्त्म आश्रयो वा येषां ते मुनयः उपस्पृष्टाः स-

तन्नः शुश्रूषमाणानामर्हस्यंगानुवर्णितुं ॥ यस्यावतारो भूतानां क्षेमाय च भवाय च ॥१३॥ आपन्नः
संसृतिं घोरां यन्नाम विवशो गृणन् ॥ ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयं ॥१४॥ यत्पादसंश्र-
याः सूत मुनयः प्रशमायनाः ॥ सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापोऽनुसेवया ॥१५॥ को वा भगवत-
स्तस्य पुण्यश्लोकेड्यकर्मणः ॥ शुद्धिकामो न शृणुयाद्यशः कलिमलापहं ॥१६॥

न्निधिमात्रेण सेविताः संतः सद्यः पुनंति ॥ स्वर्धुनी गंगा तस्या आपः तत्स्वादागताः सत्यः न तु तत्रैव वर्तिष्यंति ॥ अतस्तत्संबंधेन पु-
नंत्योऽपि अनुसेवया पुनंति न तु सद्य इति मुनीनामुत्कर्षोक्तिः ॥१५॥ पुण्यश्लोकैरीड्यानि स्तव्यानि कर्म्माणि यस्य तस्य यशः
कलिमलापहं संसारदुःखोपशमं ॥१६॥ ॥

भा॰ प्र॰ ॥ ६ ॥

प्रसंगानंतरं तस्येति उदाराणि ॥ महांति विश्वसृष्ट्यादीनि सूरिभिर्नारदादिभिः कलाः ब्रह्मरुद्रादिमूर्तीः ॥ १७ ॥ अथेति प्रसंगानंतरे ॥ अवतारक-
याः स्थित्यर्थमेव तत्तदवसरे ये मत्स्याद्यवताराः ॥ तदाश्रयाः कथाः स्वैरं लीलाः कुर्वतः श्रीकृष्णस्याद्यवतारप्रयोजनप्रश्नेनैव तच्चरित-
प्रश्नोपि जात एव ॥ १८ ॥ अत्यौत्सुक्येन पुनरपि तच्चरित्राण्येव श्रोतुमिच्छंतस्तत्रात्मनस्तृप्त्यभावमावेदयंत्विति ॥ योगयागादिश्रुतिमा-
सउत्कृष्टनि तमो यस्मात्स उत्तमस्तथाभूतः श्लोको यशो यस्य तस्य विक्रमे तु विशेषेण न तृप्यामः ॥ अलमिति न मन्यामहे ॥ तत्र

तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः ॥ ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः ॥ १७ ॥ अ-
थाख्याहि हरेर्धीमन्नवतारकथाः शुभाः ॥ लीला विदधतः स्वैरमीश्वरस्यात्ममायया ॥ १८ ॥ व-
यं तु न वितृप्याम उत्तमश्लोकविक्रमे ॥ यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥ १९ ॥ ॥

हेतुः यद्विक्रमं शृण्वतां ॥ यद्वान्ये तृप्यंतु नाम वयं तु नेति शब्दस्यान्वयः ॥ अयमर्थः त्रिधाह्यलं बुद्धिः उदरादिभरणेन वा रसात्र-
नेनैव वा स्वादुविशेषाभावाद्वा तत्र शृण्वतां इत्यनेन श्रोत्रस्याकाशत्वान्न भरणमित्युक्तं ॥ रसज्ञानामित्यनेन न वा रसज्ञानतः पशुवत्तृ-
प्तिर्निराकृता इंक्षुभक्षणवदुत्तरोत्तराभावेनतृप्तिं निराकरोति ॥ पदे पदे प्रतिक्षणं स्वादुतो-
पि स्वादु ॥ १९ ॥

राम ॥ ६ ॥

अतः कृष्णचरि०त्राणि कथयेत्याशयेनाह । कृतवानिति ॥ अतिमर्त्यानि मर्त्यानतिक्रांतानि गोवर्द्धनोद्धरणादीनि मनुष्येष्वसंभावितानीत्यर्थः ॥२०॥ ननु यागानुष्ठानाध्यापनादिव्यग्राणां कुतस्तच्छ्रवणावकाशः स्यात् ॥ अत आह । कलिमागतं ज्ञात्वा तद्भियाविष्णुपदं गतकामाः ॥ दीर्घसत्रेण निमित्तेनासीनाः । हरेः कथायां सक्षणाः लब्धावसराः ॥२१॥ अस्मिंश्च समये त्वद्दर्शनमीश्वरेणैव संपादितमि-

कृतवान्किलवीर्याणि सह रामेण केशवः ॥ अतिमर्त्यानि भगवान्गूढः कपटमानवः ॥२०॥
कलिमागतमाज्ञाय क्षेत्रेऽस्मिन्वैष्णवे वयं ॥ आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥२१॥ त्वं
नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षतां ॥ कलिं सत्वहरं पुंसां कर्णधार इवार्णवम् ॥२२॥ ब्रूहि
योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि ॥ स्वां काष्ठामधुनोपेते धर्मः कं शरणं गतः ॥२३॥ इति श्री
भागवते स्कंधे नैमिषेयोपाख्याने नाम प्रथमोऽध्यायः ॥१॥ ॥८॥

त्यभिनंदति त्वमिति ॥ कलिं निस्तर्त्तुमिच्छतां ॥ अर्णवं तितीर्षतां कर्णधार इव नाविक इव ॥२२॥ पुनः प्रश्नांतरं ब्रूहीति धर्मस्य वर्मणि कवचवद्रक्षके ॥ स्वां काष्ठां मर्यादां स्वरूपमित्यर्थः अस्य चोत्तरं कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सहेत्यग्रे श्लोक ॥२३॥ इ-
तिश्रीभागवतभावार्थदीपिकायां प्रथमप्रथमोध्यायः ॥१॥

तदेवं प्रथमेऽध्याये षट्प्रश्ना मुनिभिः कृताः द्वितीये तु ततस्तेषां सूतस्त्वनुपूर्णमाह ते यथा ॥१॥ विप्राणामिति एवं नैमिषोपकुक्षेः सम्यक्पृष्टः रोमहर्षणस्य पुत्रः उग्रश्रवाः ॥ तेषां वचः प्रतिपूज्य तत्प्रवक्तुमुपचक्रमे उपक्रान्तवान् ॥१॥ प्रवचनस्योपक्रमो नाम गुरुदेवतानमस्कार इति तमाह त्रिभिः ॥ तत्र स्वगुरोः शुकस्य स्वयं तच्चरितेनैव द्योतयन्नाह ॥ यं प्रव्रजन्तं तत्त्वस्य गच्छन्तं ॥ अनुपेतमनुपनयस्वेत्युपनयनार्थमनुपपन्नं ॥ यद्वा ॥ केनाप्यनुपेतं अननुगतमेकाकिनमित्यर्थः ॥ तत्र हेतुः ॥ अपेतकृत्यं कृत्यरहितं त्यक्

श्रीव्यास उवाच ॥ इति संप्रश्नसंहृष्टो विप्राणां रौमहर्षणिः ॥ प्रतिपूज्य वचस्तेषां प्रवक्तुमुपचक्रमे ॥१॥ सूत उवाच ॥ यं प्रव्रजन्तमनुपेतमपेतकृत्यं द्वैपायनो विरहकातर आजुहाव ॥ पुत्रेति तन्मयतया तरवोऽभिनेदुस्तं सर्वभूतहृदयं मुनिमानतोऽस्मि ॥२॥ ॥ छ ॥ छ

मार्गे अप्रवर्तमानं नैष्ठिकत्वात् ॥ यं द्वैपायनो व्यासः ॥ विरहात्कातरो भीतः पुत्र इति प्लुतेनाजुहाव आहूतवान् ॥ दूराद्वा ते प्लुतमत्स्यपि संधिरार्षः तदा तन्मयतया शुकरूपतया तरवोऽभिनेदुः ॥ प्रत्युत्तरमुक्तवन्तः पितुः स्नेहानुबन्धपरिहाराय योऽहं स रूपेणान्तरं दत्तवानित्यर्थः ॥ तं मुनिमानतोऽस्मि ॥ तन्मयत्वोपपादनाय विशेषणं सर्वभूतानां हृत्तमनः अयं तु योगबलेन प्रविशतीति सर्वभूतहृदयस्तं ॥२॥

कृपालुर्मां दर्शयत्वाहयइति ॥ अं थंगा दंतम: संसारारण्यमतितर्तुमिच्छतां ॥ पुराणानां मध्ये गुह्यं गोप्यं तत्र हेतुत्वेन चत्वारि विशेष
णानि स्व: निज: असाधारणा: ॥ अनुभाव: प्रभावो यस्य तस्सानुभावं ॥ अखिलश्रुतीनां सारं ॥ एकमद्वितीयं ॥ अनुपममित्यर्थ:
आत्मानं कारणसंघातमधिष्ठात्य वर्तमानमात्मतत्त्वमध्यात्मं तस्य दीपं साक्षात्प्रकाशकम् ॥ उपयामि शरणं व्रजामि ॥ ३ ॥ जयत्य

य: सानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतां तमोऽंधं ॥ संसारिणां करुणया ह पु
राणगुह्यं तं व्याससूनुमुपयामि गुरुं मुनीनां ॥ ३ ॥ नारायणं नमस्कृत्य नरं चैव नरोत्तमं ॥ देवीं सर
स्वतीं चैव ततो जयमुदीरयेत् ॥ ४ ॥ मुनय: साधुपृष्टोऽहं भवद्भिर्लोकमंगलं ॥ यत्कृत: कृष्णसं
प्रश्नो येनात्मा सुप्रसीदति ॥ ५ ॥ ॥

तेन संसारमितिजयोग्रंथ: ॥ तमुदीरयेदितिस्वयं तत्र योदी
रयत्वस्मान्पौराणिकानुपशिक्षयति ॥ ४ ॥ तेषां वच: प्रतिष्ठस्येति यदुक्तं तत्र ति पूजनं करोति हे मुनय: ॥ साधु यथा भवति त
दहं पृष्ट: यतो लोकानां मंगलमेतत्त्र यद्यत: ॥ कृष्णविषय: संप्रश्नकृत: सर्वशास्त्रार्थसारोद्धार प्रश्नस्यापि कृष्णे पर्यवसानादे
वमुक्तं ॥ ५ ॥ ॥

॥ ५ ॥

भा॰प्र॰
॥ ८ ॥

तत्र यत्त्वया पृष्टं सर्वशास्त्रसारमैकांतिकं श्रेयो ब्रूहि इति तत्रोत्तरं स वै पुंसामिति ॥ अयमर्थः । धर्मो द्विविधः प्रवृत्तिलक्षणो निवृत्तिलक्ष
णश्च तत्र यः स्वर्गाद्यर्थः प्रवृत्तिलक्षणः सोऽपरः ॥ यतस्तु धर्माच्छ्रवणादिलक्षणा भक्तिर्भवति स परो धर्मः ॥ स एवैकांतिकं श्रेय इ
ति ॥ कथंभूता ॥ अहैतुकी हेतुः फलानुसंधानं तद्रहिता ॥ अप्रतिहता विघ्नैरनभिभूता ॥ ६ ॥ ननु तमेतमात्मानं वेदानुवचनेन ब्रा

स वै पुंसां परो धर्म्मो यतो भक्तिरधोक्षजे ॥ अहैतुक्यप्रतिहता ययात्मा संप्रसीदति ॥ ६ ॥ वासुदेवे भ
गवति भक्तियोगः प्रयोजितः ॥ जनयत्याशु वैराग्यं ज्ञानं यत्तदहैतुकं ॥ ७ ॥ ॥ छ

ह्मणा विविदिषंति यज्ञेन दानेन तपसाऽनाशकेनेत्यादिश्रुतिभ्यो धर्मस्य ज्ञानांगत्वं प्रसिद्धं ॥ तत्कुतो भक्तिहेतुत्वमुच्य
ते तस्य तत्र तु भक्तिद्वारेणेत्याह वासुदेव इति ॥ अहैतुकं शुष्कतर्काद्यगोचरमौपनिषदमित्यर्थः ॥ ७ ॥ ॥ छ

राम
॥ ८ ॥

व्यतिरेकमाह॥ धर्मइति॥ योधर्मइतिप्रसिद्धः स्वनुष्ठितोपि विष्वक्सेनस्य कथासु रतिं नोत्पादयेत्॥ नहि स्वनुष्ठितोऽपि सन् अयंधर्मः श्रमोद्वेगः ननु मोक्षार्थस्यापिधर्मस्यश्रमत्वमस्त्येव॥ अतआह केवलं विफलश्रमइत्यर्थः॥ नन्वस्तितत्रापिस्वर्गादिफलमित्याशंक्य एवकारेणनिराकरोति क्षयिष्णुत्वात्तत्फलमित्यर्थः॥ नन्वक्षय्यंह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादिश्रुतेर्न तत्फलस्य क्षयिष्णुत्वमित्याशंक्याह तद्यथेहकर्मजितोलोकः क्षीयतएवमेवामुत्रपुण्यजितोलोकः क्षीयतइतितर्कानुगृहीतयाश्रुत्याक्षयिष्णुत्वप्रतिपादनात्

धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः॥ नोत्पादयेद्यदि रतिं श्रमएव हि केवलं॥ ८॥ धर्मस्य ह्याप वर्ग्यस्य नार्थोऽर्थायोपकल्पते॥ नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः॥ ९॥ ॥ छ

त॥ ८॥ नदेवं हरिभक्तिद्वारा तदितरवैराग्यात्मज्ञानपर्यन्तः परोधर्म इत्युक्तं॥ अन्येतु मन्यन्ते धर्मस्यार्थः फलं तस्य चेन्द्रियप्रीतिः तत्प्रीतेश्च पुनरपि धर्मार्थादिपरंपरेतितथाहुः धर्मादर्थश्चकामश्च सकिमर्थं न सेव्यत इत्यादि तन्निराकरोति धर्मस्येति द्वाभ्यां आपवर्ग्यस्य उक्तन्यायेनापवर्गपर्यन्तं तस्य अर्थाय फलत्वाय अर्थो नोपकल्पते योग्योन भवति॥ तथार्थस्यापि एवंभूतधर्माव्यभिचारिणः कामोलाभायफलत्वायनहिस्मृतो मुनिभिः॥ ९॥ ॥ ९॥

कामस्य विषयभोगस्य इंद्रियप्रीतिर्लाभः फलं न भवति किंतु यावता जीवेत तावन्मेव कामस्य लाभः जीवनपर्याप्त एव कामः सेव्य इत्यर्थः जीवस्य जीवनस्य च पुनः कर्मानुष्ठानद्वारा कर्मभिर्य इह प्रसिद्धः स्वर्गादिः ॥ सोर्थो न भवति किंतु तत्त्वजिज्ञासैवेति ॥ १० ॥ ननु च तत्त्वजिज्ञासा नाम धर्मजिज्ञासैव धर्म एव हि तत्त्वमिति केचित् ॥ तत्राह तत्त्वविद इति तदेव तत्त्वं वदंति ॥ किं तत् ज्ञानं नाम ॥ अद्वयमिति क्षणिकविज्ञानपक्षं

कामस्य नेंद्रियप्रीतिर्लाभो जीवेत यावता ॥ जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः ॥ १० ॥ वदंति तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयं ॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ ११ ॥ तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया ॥ पश्यंत्यात्मनि चात्मानं भक्त्या श्रुतगृहीतया ॥ १२ ॥ ॥ छ ॥

व्यावर्तयति ॥ ननु तत्त्वविदामपि विगीतवचना एवं भवंतस्यैव तत्त्वस्य नामांतरैरभिधानादित्याह ॥ औपनिषदैर्ब्रह्मेति हैरण्यगर्भैः परमात्मेति सात्वतैर्भगवानित्यभिधीयते ॥ ११ ॥ न च तत्तत्त्वं सपरिकरया भक्त्यैव प्राप्यत इत्याह तच्चेत्यन्वयः ॥ ज्ञानवैराग्ययुक्तयेत्यत्र ज्ञानं परोक्षं तत्त्वं ॥ आत्मनि देहेंतरे पश्यंति ॥ किं तत् आत्मानं परमात्मानं भक्त्या केन वेदांतादिश्रवणेन गृहीतया प्राप्तयेति भक्तेर्दीर्घमुक्तं ॥ १२ ॥

धर्मस्य फलं भक्तिः ॥ नार्थकामादिकमितीममर्थमुपपाद्योपसंहरति ॥ अत इति हे द्विजश्रेष्ठाः हरितोषणं हेरराधनं संसिद्धिः फलं ॥ १३ ॥ यस्मा
द्भक्तिविहीनो धर्मः केवलं श्रम एव तस्माद्भक्तिप्रधान एव धर्मोनुष्ठेय इत्याह तस्मादिति एकेन एकाग्रेण मनसा ॥ १४ ॥ भक्तिरहितो धर्मः

अतः पुंभिर्द्विजःश्रेष्ठा वर्णाश्रमविभागशः ॥ स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणं ॥ १३ ॥ तस्मादेके
न मनसा भगवान्सात्वतांपतिः ॥ श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ॥ १४ ॥ यदनुध्यासिना युक्ताः
कर्मग्रंथिनिबंधनं ॥ छिंदंति कोविदास्तस्य को न कुर्यात्कथारतिं ॥ १५ ॥ ॥ ॥

केवलं श्रम इति प्रपंचितं ॥ इदानीं तु भक्तेर्मुक्तिफलत्वं प्रपंचयति यदिति ॥ यदिति यस्य अनुध्यानं सैव असिः खड्गः ॥ तेन युक्ता विवे
किनः ॥ ग्रंथिं अहंकारं निबध्नाति ॥ यत्कर्म तत् छिंदंति ॥ तस्य कथायां रतिं को न कुर्यात् ॥ १५ ॥ ॥

ननु सत्सेवकर्मनिर्मलनीहरिकथारतिस्तयापि तत्सां रुचिर्नोत्पद्यते किं कुर्मस्तत्राह ॥ शुश्रूषोरिति ॥ पुण्यतीर्थनिषेवणादिभिर्निः पा
पस्य महत्सेवा स्यात् ॥ तया च तद्धर्मश्रद्धा ततः श्रवणेच्छा ततो रुचिः स्यादित्यर्थः ॥१६॥ ततश्च शृण्वतामिति ॥ पुण्ये श्रवणकीर्तने यस्य
सः सतां सुहृत् हितकारी ॥ हृदि यान्यभद्राणि कामादिवासनाः ॥ तानि अंतस्थः हृदयस्थः सन् ॥१७॥ ततश्च नष्टप्रायेष्विति ॥ नैष्ठि

शुश्रूषोः श्रद्धधानस्य वासुदेवकथारुचिः ॥ स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥१६॥ श
ृण्वतां स्वकथां कृष्णः पुण्यश्रवणकीर्तनः ॥ हृद्यंतस्थो ह्यभद्राणि विधुनोति सुहृत्सतां ॥१७॥ नष्ट
प्रायेष्वभद्रेषु नित्यं भागवतसेवया ॥ भगवत्युत्तमश्लोके भक्तिर्भवति नैष्ठिकी ॥१८॥ तदा रजस्त
मोभावाः कामलोभादयश्च ये ॥ चेत एतैरनाविद्धं स्थितं सत्त्वे प्रसीदति ॥१९॥ ॥ ध ॥

भद्रनाशसमानोत्तरकालत्वाय प्रायग्रहणं ॥ भागवतानां भागवतशास्त्रस्य वा सेवया नैष्ठिकी निश्चला विक्षेपकाभावात् ॥१८॥ रज
श्च तमश्च ये च तत्प्रभवा भावाः कामादयः ॥ एतैरनाविद्धं ॥ अनभिभूतं प्रसीदति ॥ उपशाम्यति ॥१९॥ ॥ ॥

भगवद्भक्तियोगतः प्रसन्नमनसः ॥ अत एव मुक्तसंगस्य भगवान् एव तत्त्वं ॥२०॥ ज्ञानफलमाह भिद्यत इति हृदयमेव ग्रंथिः ॥ चिज्जडग्रंथनरूपो
ऽहंकारः ॥ अत एव सर्वसंशयाः ॥ असंभावनादिरूपाः ॥ कर्म्माण्यनारब्धफलानि आत्मनि स्वरूपभूते ईश्वरे दृष्टे ॥ एवकारेण ज्ञानानंत
रमेवेति दर्शयति ॥२१॥ अत्र सदाचारं दर्शयन्नुपसंहरति ॥ अत इति आत्मप्रसादनीं मनःशोधनीं वासुदेवे भक्तिं कुर्वंतीति भजनीयवि

एवं प्रसन्नमनसो भगवद्भक्तियोगतः ॥ भगवत्तत्त्वविज्ञानं मुक्तसंगस्य जायते ॥२०॥ भिद्यते हृदयग्रंथि
श्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्म्माणि दृष्ट एवात्मनीश्वरे ॥२१॥ अतो वै कवयो नित्यं भक्तिं
परमया मुदा ॥ वासुदेवे भगवति कुर्वंत्यात्मप्रसादनीं ॥२२॥ सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः
परः पुरुष एक इहास्य धत्ते ॥ स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः ॥

शेषो दर्शितः ॥२२॥ तदेवोपपादयितुं ब्रह्मादीनां त्रयाणामेकात्मकत्वेऽपि वासुदेवस्याधिक्यमाह सत्त्वमिति ॥ इहयद्य २३ ॥
प्यक एव परः पुमान् अस्य विश्वस्य स्थित्यादये स्थितिसृष्टिप्रलयार्थं संज्ञाः केवलं भिन्ना धत्ते ॥ हरिविरिंचिहरा इति वक्तव्ये संधि
रार्षः तत्र तेषां मध्ये श्रेयांसि शुभफलानि सत्त्वतनोर्वासुदेवादेव स्युः ॥२३॥ ॥ ॥ छ ॥

उपाधिवैशिष्ट्येन फलवैशिष्ट्यं सदृष्टांतमाह ॥ पार्थिवादिति पार्थिवादारुत ॥ स्वतः प्रवृत्तिप्रकाशरहितात् दारुणः । काष्टात् तत्सकाशात् धूमः प्र
वृत्तिस्वभावस्त्रयीमयः वेदोक्तकर्मप्रचुरः ॥ ईषत्कर्मप्रत्यासन्नेस्तस्मादपि अग्निस्त्रयीमयः साक्षात्कर्मसाधनत्वात् ॥ एवं तमसः सका
शाद्रजो ब्रह्मदर्शनं ब्रह्मप्रकाशकं तु शब्देन लयात्मकात्तमसः सकाशाद्रजसः सोपाधिकज्ञानहेतुत्वेन किंचिद्ब्रह्मदर्शनप्रत्यासत्तिमात्र
मुक्तं न तु सर्वथा न तत्प्रकाशकत्वं विक्षेपकत्वात् न यत्सत्त्वं साक्षाद्ब्रह्मदर्शनं ॥ अतस्तद्गुणोपाधीनां ब्रह्मादीनामपि पयोंतरं वैशिष्ट्यमिति भा

पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः ॥ तमसस्तु रजस्तस्मात्सत्त्वं यद्ब्रह्मदर्शनं ॥२४॥ भेजिरे मु
नयोऽथाग्रे भगवंतमधोक्षजं ॥ सत्त्वं विशुद्धं क्षेमाय कल्पंते येऽनु तानिह ॥२५॥ मुमुक्षवो घोररूपा
न्हित्वा भूतपतीनथ ॥ नारायणकलाः शांता भजंति ह्यनसूयवः ॥२६॥ ॥ छ ॥

वः ॥२४॥ वासुदेवभक्तौ पूर्वाचारं प्रमाणयति भेजिर इति ॥ अथ अतो हेतोः अग्रे पुरा ॥ विशुद्धं सत्त्वमूर्तिं भगवंतं अधोक्षजं ॥ अतो ये
तान् ॥ अनुवर्तंते ते न इह संसारे क्षेमाय कल्पंते ॥२५॥ ननु अन्यानपि केचिद्भजंतो दृश्यंते सत्यं मुमुक्षवस्तु अन्यान्न भजंति किंतु सका
मा एव सा हमुमुक्षवः इति ह्यम्यां भूतपतीनिति पितृप्रजेशादीनामुपलक्षणं अनसूयवः देवतांतरानिंदकाः संतः ॥२६॥

रजस्तमसी प्रकृतिः स्वभावो येषां ते अत एव पितृभूतादिभिः समं शीलं येषां ते श्रिया सह ऐश्वर्यं प्रजाश्च ऐश्वर्यं तीति तथा ते ॥ २७ ॥ मोक्षप्र
दत्वाद्वासुदेवो भजनीय इत्युक्तं ॥ सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याह द्वाभ्यां ॥ वासुदेवः परः तात्पर्यगोचरो येषां ते ॥ ननु वेदा मखप
रा दृश्यंते इत्याशंक्य तेपि तद्द्वाराधनार्थत्वात्तत्परा एवेत्युक्तं ॥ योगा योगशास्त्राणि तेषामप्यासनप्राणायामादिक्रियापरत्वमाशंक्य
तासामपि तत्त्वाप्त्युपायत्वात्तत्परत्वमुक्तं ॥ २८ ॥ ज्ञानं ज्ञानशास्त्रं ॥ ननु च तज्ज्ञानं परमेवेत्याशंक्य ज्ञानस्यापि तत्परत्वमुक्तं ॥ तपो व्रता

रजस्तमःप्रकृतयः समशीला भजंति वै ॥ पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः ॥ २७ ॥ वासुदेव
परा वेदा वासुदेवपरा मखाः ॥ वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥ २८ ॥ वासुदेवपरं ज्ञानं वासु
देवपरं तपः ॥ वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥ २९ ॥ ॥ ॥

नं ॥ धर्मो धर्मशास्त्रं तानं दो व्रतादिविषयं ॥ ननु स्वर्गपरमित्याशंक्य गम्यत इति गतिः स्वर्गादिफलं सापि तदानंदांशरूपत्वात्तत्परैवे
त्युक्तं ॥ यद्वा ॥ वेदा इत्यनेनैव तन्मूलत्वात्सर्वाण्यपि वासुदेवपराणीत्युक्तं ॥ तत्र ननु तेषां मखयोगक्रियादीनां नानार्थपरत्वान्न तदे
कपरत्वमित्याशंक्य मखादीनामपि तत्परत्वमित्युक्तमिति द्रष्टव्यम् ॥ २९ ॥

ननु जगत्सर्गप्रवेशनियमनादिविलासयुक्ते वक्तरि सर्वशास्त्रसमन्वयो दृष्टः स कथं वासुदेवपरत्वं सर्वस्य अत्राह स एवेति चतुर्भिः एवं रेव श्लोकैः॥ तस्य कर्माण्युदाराणि ब्रूहीति प्रश्नस्योत्तरं सदसद्रूपया कार्यकारणात्मिकया अगुणश्चेत्स्वतः सत्त्वतो निर्गुणोपि सन्नि

स एवेदं ससर्जाग्रे भगवानात्ममायया॥ सदसद्रूपया वासौ गुणमय्यागुणो विभुः॥ ३० ॥ तया विलसितेष्वेषु गुणेषु गुणवानिव॥ अंतःप्रविष्ट आभाति विज्ञानेन विजृंभितः॥ ३१ ॥ ॥ छ

सर्ग्यः॥ ३० ॥ भगवतो जगत्कारणत्वमुक्तं॥ प्रवेशनियमनलक्षणां लीलामाह॥ तया विलसितेषु उद्भूतेषु गुणेषु आकाशादिषु अंतःप्रविष्टः सन् गुणवानिव मदधीना एवैते गुणा इत्यभिमानवानिव न तु वस्तुतस्तथा॥ यतो विज्ञानेन चिच्छक्त्या विजृंभितो स्फूर्जितः॥ ३१ ॥ ॥

वहुरूपत्वलीलामाहयथेतिस्वयोनिषुस्वाभिव्यंजकेषु॥ अवहितोनिहितः॥ विश्वात्मापुमान्परमेश्वरोभूतेषुप्राणिषु॥ अंतर्यामिणोपिप्रतिशरी
निवानात्वमननात्त्विमिवोच्यतेक्षेत्रज्ञ॥ तद्रूपेणावा॥ ३२॥ भोगरूपांलीलामाह॥ असौहरिः भूतसूक्ष्माणिचेंद्रियाणिच॥ आत्मामनश्चैतैः
स्वयंनिर्मितेषुभूतेषुचतुर्विधेषुस्थितिभोगस्वातंत्र्यंद्योतयन्॥ तद्गुणान्तत्तद्रूपान्विषयान्निष्टपान्भुंक्ते॥ भोजयतीतिणिजर्थोवा॥ तेषपालयती

यथाह्यवहितोवह्निर्दारुष्वेकः स्वयोनिषु॥ नानेवभातिविश्वात्माभूतेषुचतथापुमान्॥ ३२॥ असौगुणमयैर्भावैर्भूतसूक्ष्मेंद्रियात्मभिः॥ स्वनिर्मितेषुनिर्विष्टोभुंक्तेभूतेषुतद्गुणान्॥ ३२॥ भावयत्येषसत्वेनलोकान्वैलोकभावनः॥ लीलावतारानुरतोदेवतिर्यङ्नरादिषु॥ ३४॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेऽध्यायः॥ २॥ ॥ ७॥ ॥ ॥ ७॥ ॥

निवा॥ तद्धान्मनेयत्नत्मार्षभुजोनवनेद्दृतिस्मरणात्॥ ३२॥ इदानींसत्तजानासीतिप्रश्नोत्तरमाह॥ भावयतिपालयति॥ एतत्तुसर्वावतारसा
धारणप्रयोजनंविशेषतः कृष्णावतारस्यकुंतीस्तुतौवक्ष्यते॥ लोकभावनोलोककर्त्तादेवादिषुयेलीलावतारास्तेष्वनुरतोरक्तः॥ ३४॥ इति
प्रथमेद्वितीयोध्यायः॥ २॥

अवतारकथाप्रश्नेऽत्र नीयते तृतीयाभिधा॥ पुरुषाद्यवतारोऽत्र तानंतत्वानि च वर्ण्यते॥१॥ यदुक्तं अथाख्याहि हरेर्धीमन्नवतारकथाः शुभा इति तत्र तत्वेनावतारानंतुक्तमिष्यन् ॥ प्रथमं पुरुषावतारमाह जगृहे इति पंचभिः॥ महदादिभिरिति महदहंकार पंचतन्मात्रैः एकादशेन्द्रियाणि पंचमहाभूतानीति षोडशकला अंशा यस्मिन्॥ ननु यद्यपि भगवद्विग्रहो नैवं भूतः तथापि विराड्जीवांतर्यामिणो भगवतो विराड्रूपेणोपासनार्थमेवमुक्तमिति द्रष्टव्यं॥१॥ कोऽसौ भगवानित्यपेक्षायां तं विशिनष्टि यस्यांभसि एकार्णवे शयानस्य विश्वान्तस्य तत्त्वयोगः स

सूत उवाच॥ जगृहे पौरुषं रूपं भगवान्महदादिभिः॥ संभूतं षोडशकलमादौ लोकसिसृक्षया॥१॥
यस्यांभसि शयानस्य योगनिद्रां वितन्वतः॥ नाभिह्रदांबुजादासीद्ब्रह्मा विश्वसृजां पतिः॥२॥ यस्याव
यवसंस्थानैः कल्पितो लोकविस्तरः॥ तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितम्॥३॥ ॥

माधिः॥ तद्रूपां निद्रां विस्तारयतः॥ तस्य नाभिरेव ह्रदः॥ तस्मिन्यदंबुजं तस्मात्सकाशाद्ब्रह्मा आसीत्॥ अभूतपाद्मकल्पे तत्पौरुषं जगृहे॥२॥ कीदृशं रूपं जग्राह यस्येति॥ ननु कीदृशो विग्रहस्तस्य योंभसि शेते तस्यानन्दाह॥ तत्तस्य भगवतो रूपं तु विशुद्धं रजआद्यसंभिन्नं अत एवोर्जितं निरतिशयं॥ सत्वं॥३॥ ॥ ॥ ॥ ॥ ॥

एतच्च योगिनां प्रत्यक्षमित्याह ॥ पश्यंतीति ॥ अदभ्रमनल्पं ज्ञानात्मकं ॥ यच्चक्षुस्तेन सहस्रं अपरिमितानि पादादीनि तैरद्भुतं ॥ सहस्राणि मूर्द्धादयो यस्मि
न्नत्त ॥ सहस्रं यानि मौल्यादीनि तैरुल्लसत् शोभमानं ॥ ४ ॥ एतत्तु कूटस्थं न त्वन्यावतारवदाविर्भावतिरोभाववदित्याह ॥ एतदिति नाराय
णरूपं निधीयते यस्मिन्निति ॥ निधानं कार्यावसाने प्रवेशस्थानमित्यर्थः बीजं उद्गमस्थानं ॥ बीजत्वेपि नान्यबीजवत्तु किं त्वव्ययं न केवल

पश्यंत्यदो रूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतं ॥ सहस्रमूर्द्धश्रवणाक्षिनासिकं सहस्रमौ
ल्यंबरकुंडलोल्लसत् ॥ ४ ॥ एतन्नानावताराणां निधानं बीजमव्ययं ॥ यस्यांशांशेन सृज्यंते देवतिर्य
ङ्नरादयः ॥ ५ ॥ स एव प्रथमं देवः कौमारं सर्गमास्थितः ॥ चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितं
॥ ६ ॥

मवताराणामेव बीजं ॥ किंतु सर्वप्राणिनामित्याह ॥ यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिस्तेन ॥ ५ ॥ सनत्कुमाराद्यवतारं तच्चरितं चाह
स एवेति ॥ कौमारः आर्षः प्राजापत्यो मानव इत्यादीनि सर्गविशेषनामानि यः पौरुषं रूपं जगृहे स एव देवः ॥ कौमाराख्यं सर्गमास्थि
तः सन् ब्रह्मा ब्राह्मणो भूत्वा ब्रह्मचर्यं चचार ॥ प्रथमद्वितीयादिशब्दो निर्देशमात्रापेक्षया ॥ ६ ॥ ७ ॥ ७

क्रीडावतारमाह॥ अस्य विश्वस्य भवाय उद्भवाय महीमुद्धरिष्यन्निति कर्मोक्तिः॥ एवं सर्वत्रावतारस्य कर्म चोक्तमित्यनुसंधेयम्॥७॥ नारदावतारमाह तृतीयमिति॥ ऋषिसर्गमुपेत्य तत्र च देवर्षित्वमुपेत्येत्यर्थः सात्वतं वैष्णवं तंत्रं पंचरात्रागमं॥ आचष्ट उक्तवान्॥ यतस्तंत्रात्॥ निर्गतं कर्मबंधहेतुत्वं येभ्यः॥ तानि निष्कर्माणि तेषां भावो नैःकर्म्यं॥ कर्मणामेव मोचकत्वं यतो भवति तदाचष्टेत्यर्थः॥८॥ तुर्ये

द्वितीयंतुभवायास्यरसातलगतांमहीं॥ उद्धरिष्यन्नुपादत्तयज्ञेशःशौकरंवपुः॥७॥ तृतीयमृषिसर्गंवैदेवर्षित्वमुपेत्यसः॥ तंत्रंसात्वतमाचष्टनैःकर्म्यंकर्मणांयतः॥८॥ तुर्येधर्म्मकलासर्गेनरनारायणावृषी॥ भूत्वात्मोपशमोपेतंअकरोद्दुश्चरंतपः॥९॥ पंचमःकपिलोनामसिद्धेशःकालविप्लुतं॥ प्रोवाचासुरयेसांख्यंतत्त्वग्रामविनिर्णयम्॥१०॥ ॥ छ ॥

तोर्धर्मस्य कला अंशः॥ भागः भागः भार्येत्यर्थः अथवा एष आत्मनो यस्यास्तीति श्रुतेः तस्यां सर्गे ऋषी भूत्वेत्येकावतारतां दर्शयति॥९॥ कपिलावतारमाह॥ आसुरये तन्नाम्ने ब्राह्मणाय तत्त्वानां ग्रामस्य संघस्य विनिर्णयो यस्मिन्न् तत्सांख्यं॥१०॥

दत्तात्रेयावतारमाह ॥ षष्ठमिति ॥ अत्रेरपत्यत्वं तेनैव वृतः सन् एव प्राप्तः । अत्रेरपत्यमभिकांक्षत आह तुष्ट इति वक्ष्यमाणत्वात्कथं प्राप्तः ॥ अन
सूयया मत्तृदृशापत्यमिषेण मामेवापत्यं वृतवानिति दोषदृष्टिमकुर्वन्नित्यर्थः ॥ आन्वीक्षिकीमात्मविद्यां प्रह्लादादिभ्यश्च ॥ ११ ॥ यज्ञा
वतारमाह ॥ ततइति सयज्ञः ॥ यामाद्यैः स्वस्यैव पुत्रा यामा नाम देवाः तदाद्यैः सह स्वायंभुवं मन्वंतरं ॥ पालितवान् ॥ तदा स्वयमिंद्रोभूत्

षष्ठमत्रेरपत्यत्वं वृतः प्राप्तोनसूयया ॥ आन्वीक्षिकीमलर्काय प्रह्लादादिभ्य ऊचिवान् ॥ ११ ॥ ततः सप्तम
आकूत्यां रुचेर्यज्ञोभ्यजायत ॥ स यामाद्यैः सुरगणैरपात्स्वायंभुवांतरं ॥ १२ ॥ अष्टमे मेरुदेव्यां तु नाभे
र्जात उरुक्रमः ॥ दर्शयन्वर्त्म धीराणां सर्वाश्रमनमस्कृतं ॥ १३ ॥ ऋषिभिर्याचितो भेजे नवमं पार्थि
वं वपुः दुग्धेमामोषधीर्विप्रास्तेनायं स उशत्तमः ॥ १४ ॥ ॥ छ ॥

त् ॥ १२ ॥ ऋषभावतारमाह ॥ सर्वाश्रमनमस्कृतं अंत्याश्रमं पारमहंस्यं वर्त्म धीराणां दर्शयन् नाभेराग्नीध्रपुत्रात् ऋषभो जातः ॥ १३
पृथ्ववतारमाह ॥ पार्थिवं वपुः ॥ राजदेहं पृथुरूपं प्राप्तांतरे पृथ्व्या इदं पार्थिवं ॥ औषधीरित्युपलक्षणं ॥ इमां पृथ्वीं सर्वाणि च वस्तू
नि दुग्धआडागमाभावस्त्वार्षः ॥ हे विप्रास्तेन पृथ्वीदोहनेन सोयमवतार उशत्तमः वश कांताविति स्मात् ॥ १४ ॥ ॥

मत्स्यावतारमाह॥ चाक्षुषमन्वंतरस्य उदधिसंप्लवः संश्लेषः॥ तस्मिन्यद्यपि मन्वंतरावसाने प्रलयो नास्ति तथापि केनचित्कौतुकेन सत्यव्रतायमाया प्रदर्शिता॥ यथा अकांडे मार्कंडेयायेति द्रष्टव्यं॥ महीमय्यां नावि नौकारूपायां मह्यामित्यर्थः अपात् रक्षितवान् वैवस्वतं इति भाविनीसंज्ञा॥ कूर्मावतारमाह॥ कमठः कूर्मः तद्रूपेण एकादशावतारे विभुर्दध्रे दधार॥१६॥ धन्वंतर्यवतारमाह धान्वंतरं रूपं द्वादशमा

रूपं स जगृहे मत्स्यं चाक्षुषोदधिसंप्लवे॥ नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुम्॥१५॥ सुरासुराणामुदधिं मथ्नतां मंदराचलम्॥ दध्रे कमठरूपेण पृष्ठ एकादशे विभुः॥१६॥ धान्वंतरं द्वादशमं त्रयोदशममेव च॥ अपाययत्सुरानन्यान्मोहिन्या मोहयन्स्त्रिया॥१७॥ चतुर्दशं नारसिंहं बिभ्रद्दैत्येंद्रमूर्जितं॥ ददार करजैर्वक्षस्येरकां कटकृद्यथा॥१८॥

दित्रयोगस्त्वार्षः॥ त्रयोदशमं च रूपं तच्चरितेन सह दर्शयति अपाययदिति अत्र सुधामिति अध्याहारः मोहिन्या स्त्रिया स्त्रीरूपेण अन्यानसुरान्मोहयन्॥ धन्वंतरिरूपेणामृतमानीय मोहिन्या ऽपाययदित्यर्थः॥१७॥ नृसिंहावतारमाह॥ नारसिंहं रूपं बिभ्रत्॥ एरकां निर्यंथितृणं॥१८॥

वामनावतारमाह ॥ दुष्टानां मर्दवाम यतीति वामनकं रूपं हृस्वं वा प्रत्यादित्सु: ॥ तस्माद्वाञ्छिष्यगृहीतुमिच्छु: ॥ १९ ॥ परसुरामावतारमाह
अवतारइतीति त्रि: त्रिगुणं ॥ यदा भवतितया महत्क्षत्त्र: स सर्वाणेन एकविंशतिवाराणि सर्व्व: ॥ २० ॥ व्यासावतारमाह ॥ अल्पमेधस: अ

पंचदशं वामनकं कृत्वागारध्वरं बले: ॥ पदत्रयं याचमान: प्रत्यादित्सुस्त्रिविष्टपम् ॥ १९ ॥ अवतारेषो
डशमे पश्यन्ब्रह्मद्रुहोन्नृपान् ॥ त्रि:सप्तकृत्व: कुपितोनि:क्षत्रामकरोन्महीम् ॥ २० ॥ तत:सप्तदशेजा
त:सत्यवत्यांपराशरात् ॥ चक्रेवेदतरो:शाखादृष्ट्वापुंसोल्पमेधस: ॥ २१ ॥ नरदेवत्वमापन्न: सुरका
र्यचिकीर्षया ॥ समुद्रनिग्रहादीनि चक्रे वीर्याण्यत:परं ॥ २२ ॥ एकोनविंशतिमे वृष्णिषु प्राप्य जन्म
नी ॥ रामकृष्णाविति भुवो भगवानहारद्भरम ॥ २३ ॥ ॥ ॥ २३ ॥ ॥ छ

ल्पमेधसान्पुंसो दृष्ट्वा तदनुग्रहार्थं शाखाश्चक्रे ॥ २१ ॥ श्रीरामावतारमाह ॥ नरदेवत्वं राघवरूपेण प्राप्त: सन् ॥ अत:परं अष्टादशे ॥ २२
श्रीरामकृष्णावतारमाह विंशतितम इति वक्तव्ये तकारलोप: छंदोनुरोधेन रामकृष्णाविति एवं नामनी जन्मनी प्राप्य ॥ २३ ॥

भा·प्र·
॥ २६ ॥

बौद्धावतारमाह ॥ कलौ प्राप्ते सुरद्विषां संमोहा ॥ अजिनस्य सुतः ॥ जिनसुत इति पाठे जिनः स एव कीकटेषु मध्ये गयाप्रदेशे ॥ २४ ॥ क
ल्क्यवतारमाह ॥ युगसंध्यायां कलेरन्ते विष्णुयशसो ब्राह्मणात्सकाशाज्जनिता जनिष्यते ॥ २५ ॥ अनुक्तसर्वसंग्रहार्थमाह ॥ अवता

ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां ॥ बुद्धो नाम्नाजिनसुतः कीकटेषु भविष्यति ॥ २४ ॥ अथासौ यु
गसंध्यायां दस्युप्रायेषु राजसु ॥ जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥ २५ ॥ अवतारा ह्य
संख्येया हरेः सत्त्वनिधेर्द्विजाः ॥ यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥ २६ ॥ ऋषयो मन
वो देवा मनुपुत्रा महौजसः ॥ कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥ २७ ॥

रा इति ॥ असंख्येयत्वे दृष्टान्तः यथेति ॥ अविदासिनः उपक्षयशून्यात् दसु उपक्षय इत्यस्मात् सरसः सकाशात्कुल्याः क्षुद्रप्रवाहाः
॥ २६ ॥ विभूतीराह ऋषय इति ॥ २७ ॥ ॥ छ ॥ ॥ ॥

राम
॥ २६ ॥

तत्र विशेषमाह एते चेति पुंसः। परमेश्वरस्य केचिदंशाः केचित्कलाः विभूतयश्च तत्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्तिमत्त्वेपि य
थोपयोगमेव ज्ञानक्रियाशक्त्याविष्करणं कुमारनारदादिष्वधिकारिकेषु यथोपयोगमंशकलावेशः पृथ्व्यादिषु शक्त्यावेशः॥ कृष्णस्तु
भगवान्साक्षान्नारायण एव॥ आविर्भूतसर्वशक्तिमत्त्वात्॥ तेषां प्रयोजनमाह॥ इंद्रारयो दैत्यास्तैर्व्याकुलं उपद्रुतं लोकं मृडयंति सुखिनं
कुर्वंति॥२८॥ एतत्कीर्तनफलमाह॥ जन्मेति गुह्यं अतिरहस्यं जन्म प्रयतः शुचिः सन् दुःखग्रामात् संसारात्॥२९॥ विमुच्यत इत्युक्तं

एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्वयं॥ इंद्रारिव्याकुलं लोकं मृडयंति युगे युगे॥२८॥ जन्म गु
ह्यं भगवतो य एतत्प्रयतो नरः॥ सायं प्रातर्गृणन्भक्त्या दुःखग्रामाद्विमुच्यते॥२९॥ एतद्रूपं भगव
तो ह्यरूपस्य चिदात्मनः॥ मायागुणैर्विरचितं महदादिभिरात्मनि॥३०॥ छ ॥ छ

तत्र कथं देहद्वयसंबंधे सति तद्विमुक्तिरित्याशंक्य देहसंबंधस्य भगवन्मायोत्थाविद्याविलसितत्वाद्देहद्वयस्यादिजनितविद्यया तन्निवृत्ति
रुपपद्यत इत्याशयेनाह॥ एतदिति पंचभिः। अरूपस्य चिदेकरसस्यात्मनो जीवस्य। एतत्स्थूलं रूपं शरीरं भगवतो या माया तस्या गुणैर्म
हदादिरूपैर्विरचितं॥ क्व आत्मनि आत्मस्थाने शरीरे कल्पितमित्यर्थः॥३०॥ ॥ छ ॥

कथमित्यपेक्षायांस्वरूपावरणेन नद्ध्यासनं इति सदृष्टांतमाह ॥ यथा नभसीति ॥ यथा वा यथाभ्रिनो मेघौघो नभसि आकाशे अबुद्धिभिरारो-
रोपितः ॥ यथा वा पार्थिवो रेणुः तन्नं तेध्र सरत्वादि अनिले एवं द्रष्टरि आत्मनि दृश्यपत्वं दृश्यत्वादिधर्मकं शरीरं आरोपितमित्यर्थः ॥३१॥
किंच ॥ अतः परमिति ॥ अतः स्थूलाद्रूपात् ॥ परं अन्यदपि रूपमारोपितमित्यनुषंगः ॥ कथंभूतं तत् ॥ यदव्यक्तं स्पष्टं तत्र हेतुः
अव्यूढगुणबृंहितं व्यूढः करचरणादिपरिणामः ॥ तथा अपरिणताः अव्यूढाः ये गुणास्तैर्गुणैर्बृंहितं रचितं आकारविशेषरहि-

यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले ॥ एवं द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥३१॥ अतः परं
यदव्यक्तमव्यूढगुणबृंहितम् ॥ अदृष्टाश्रुतवक्तृत्वात्स जीवो यत्पुनर्भवः ॥३२॥ ॥ ॥छ॥ ॥

तत्वादव्यक्तमित्यर्थः ॥ एतदेव कुतस्तत्राह ॥ अदृष्टाश्रुतवक्तृत्वात् ॥ आकारविशेषवत्वस्याभावात् ॥ लैयद्वाकारविशेषवद्वस्तु
तद्दस्मदादिवद्रूपतेश्रूयते वाऽइंद्रादिवत् ॥ इदंतु न तथा तर्हि तस्य सत्वे किं प्रमाणं तत्राह ॥ सजीवः जीवोपाधिः जीवो जीवेन विनिर्मु-
क्तः जीवो जीवं विहाय स्यादेजीवोपाधौ लिंग देहे जीवशब्दप्रयोगात् ॥ जीवोपाधितया कल्प्यत इत्यर्थः ॥ ननुः स्थूलत्वमेव भोगाय
तनत्वात् जीवस्योपाधिरस्तु किमन्यकल्पनयेत्यत आह ॥ यस्मात्सूक्ष्मात्पुनर्भवः पुनर्जन्म उत्क्रांति गत्यागतीनां तेन विनाऽसंभवादि-
तिभावः ॥३२॥

तदेवमुपाधिद्वयमुक्त्वा तदपवादेन जीवस्य ब्रह्मतामाह ॥ यत्रेति यत्र यदा इमे स्थूलसूक्ष्मे रूपे स्वसंविदा स्वरूपसम्यग्ज्ञानेन प्रतिषिद्धे भवतः ज्ञानेन प्रतिषेधार्हत्वे तन्मेवहेतुमाह ॥ अविद्ययात्मनि कृते कल्पिते इति हेतो ॥ तद्ब्रह्म तदा जीवोब्रह्मैव भवतीत्यर्थः कथंभूतं दर्शनं तत्तेन कस्वरूपं ॥ ३३ ॥ तथापि भगवन्मायायाः संसृतिकारणभूताया विद्यमानत्वात्कथं ब्रह्मतेत्यत्राह यदीति ॥ असंदेहेहं देहवचनेयदि वेशाः प्रमाणांस्युरिति वत् ॥ वैशारदी विशारदः सर्वज्ञः ईश्वरः तदीया देवी संसारचक्रे क्रीडंती एषा माया यद्युपरता भवति किमिति

यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा ॥ अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनं ॥ ३३ ॥ यद्येषोपरता देवी माया वैशारदी मितिः ॥ संपन्न एवेति विदुर्महिम्नि स्वे महीयते ॥ ३४ ॥ ७

परता भवेत् ॥ तत्राह मतिः ॥ विद्या अयं भावः ॥ यावदेषा ऽविद्यात्मना आवरणविक्षेपौ करोति तावन्नोपरमति ॥ यदा तु सैव विद्यारूपेण परिणता तदा सदसद्रूपं जीवोपाधिं दग्ध्वा निरिंधनाग्निवत्स्वयमेवोपरमेदिति तदा संपन्नः ब्रह्मस्वरूपं प्राप्त एवेति विदुस्तत्त्वज्ञाः ॥ किमतः ॥ यद्येवं स्वे महिम्नि परमानंदस्वरूपे महीयते पूज्यते विराजत इत्यर्थः ॥ ३४ ॥ ७

भा॰ प्र
॥१८॥

यथाजीवस्यजन्मादिमायाएवमीश्वरस्यापिजन्माकर्मादिमायेत्याहएवमिति ॥ अकर्तुः कर्म्माणिअजनस्यजन्मानिहृत्पतेरंतर्यामिणः ॥३५॥
तर्हिजीवादीश्वरस्यकोविशेषः । स्वाधीनत्वमेवविशेषइत्याहसवाइति । षाड्वर्गिकंइंद्रियषड्वर्गविषयंजिघ्रतिहृष्टादेवंगंधवद्गृह्णातिन
तुसज्जतइत्यर्थः कुतः षड्गुणेशः षडिंद्रियनियंतानतुकर्मी ॥ ईश्वरस्यस्वाधिकर्मभिर्विषयभोगेवीतत्राह ॥ नचेतिधातुर्जगद्वि

एवंजन्मानिकर्म्माणिह्यकर्तुरजनस्यच ॥ वर्णयंतिस्मकवयोवेदगुह्यानिहृत्पतेः ॥३५॥ सवाइदंवि
श्वममोघलीलः सृजत्यवत्यत्तिनसज्जतेस्मिन् ॥ भूतेषुचांतर्हितआत्मतंत्रः षाड्वर्गिकंजिघ्रतिषड्गुणे
शः ॥३६॥ नचास्यकश्चिन्निपुणेनधातुरवैतिजंतुः कुमनीषऊतीः ॥ नामानिरूपाणिमनोवचोभिः
संतन्वतोनटचर्य्यामिवाज्ञः ॥३७॥ ॥

धातुरीश्वरस्यऊतीः लीलाः कुमनीषः कुबुद्धिर्निपुणेनतर्कादिकौशलेननअवैतिनजानातिमनसारूपाणिवचसानामानिसंतन्वतः सम्य
क्विस्तारयतः वचोभिरितिवक्तृत्वंश्रस्यमिमायेणमनोवचोभिः संहितवा ॥३७॥ ॥ ॥

राम
॥१८॥

भक्तस्तु कथं विजानातीत्याह स वेदेति॥ अमायया अकुटिलभावेन संततया निरंतरया अनुवृत्त्या॥ आनुकूल्येन भजेत॥ ३८॥ भक्तिमार्गप्रवृत्तान्॥ ऋषीनभिनंदति॥ अथेति यतो भक्त एव भगवत्तत्वं जानाति॥ अथ अतः भगवंतः त्वादृशाः भवंतो धन्याः कृतार्थाः कुतः यद्यस्मात् इत्थं प्रेम्णा वासुदेवे आत्मभावं मनोहत्तिं कुर्वंति॥ सर्वात्मकं एकांतिकं यत्र यस्मिन्नात्मभावे सति भूयः परिवर्तो जन्ममरणावर्तो न भव

स वेद धातुः पदवीं परस्य दुरंतवीर्यस्य रथांगपाणेः॥ योमायया संततयानुवृत्त्या भजेत तत्पादसरोजगंधम्॥ ३८॥ अथेह धन्या भगवंत इत्थं यद्वासुदेवेखिललोकनाथे॥ कुर्वंति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उग्रः॥ ३९॥ इदं भागवतं नाम पुराणं ब्रह्मसम्मितं॥ उत्तमश्लोकचरितं चकार भगवानृषिः॥ निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत्॥ ४०॥ तदिदं ग्राहयामास सुतमात्मवतां वरं॥ सर्ववेदेतिहासानां सारं सारं समुद्धृतं॥ ४१॥ ॥

ति॥ ३९॥ सूत किमेतच्छास्त्रमपूर्वं कथयसि तत्राह॥ इदमिति॥ ब्रह्मसंमितं सर्ववेदतुल्यं॥ उत्तमश्लोकस्य चरितं यस्मिन् तत्॥ ऋषिर्व्यासः॥ ४०॥ तत्संप्रदायप्रवृत्तिमाह तदिदमिति स्पष्टं॥ ४१॥

प्रायेणामृत्युपर्यंतानाशकेनोपविष्टमिति परमवैराग्योक्तिः ॥ ४२ ॥ ४३ ॥ हे विप्राः विप्रर्षेः सकाशात् अध्यगमं ज्ञातवान् आसितत्र कीर्तयतः तत्र निविष्ट इति चान्वयभेदात्तत्रपदावृत्तिर्न दोषः ॥ यथाधीतं न तु स्वमतिविलसितं तत्र यथामति स्वमत्यनुसारेण संक्षेपतः कथितं न विस्तरतः श्रावयिष्यामि ॥ ४४ ॥ इति भावार्थदीपिकायां तृतीयोध्यायः ॥ ३ ॥ तुर्ये भागवतारंभकारणं तेन वर्ण्यते ॥ व्यासस्यापरितोष

स तु संश्रावयामास महाराजं परीक्षितं ॥ प्रायोपविष्टं गंगायां परीतं परमर्षिभिः ॥ ४२ ॥ कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ॥ कलौ नष्टदृशामेष पुराणार्कोधुनोदितः ॥ ४३ ॥ तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ॥ अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात् ॥ सोहं वः श्रावयिष्यामि यथाधीतं यथामति ॥ ४४ ॥ इति श्रीभागवते प्रथमस्कंधे तृतीयोध्यायः ॥ श्रीवेदव्यास उवाच ॥ इति ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणां ॥ वृद्धः कुलपतिः सूतं बह्वृचः शौनकोब्रवीत् ॥ १ ॥ ॥

स्तूय पः प्रवचनादिभिः ॥ १ ॥ इति एवं प्रसन्नतया श्रावयिष्यामीति ब्रुवाणं मुनीनां बहूनां मध्ये एकेन वक्तव्ये योग्यो वृद्धः वृद्धेष्वपि बहुषु यः कुलपतिर्गणमुख्यः तेष्वपि बह्वृषु प्रौढबह्वृचः ॥ ऋग्वेदी तेन वक्तव्यम् अत एवं भूतत्वात् शौनकोब्रवीत् ॥ २ ॥ ॥

यतत्सांकथामाह ॥२॥ कस्मिन्वास्थानेकेनहेतुनेतिमहाभारतादिधर्मशास्त्राणिकृतवतः पुनरेतत्संहिताकरणेकिंकारणमित्यर्थः ॥ कुत
इतिसर्वविभक्तिकस्तसिः केनप्रवर्तितइत्यर्थः ॥ कृष्णोव्यासः ॥३॥ यदुक्तंसनुसंश्रावयामासेति ॥ तत्रशुकस्यव्याख्यानादिकंकथंघटि
तमित्याशंक्यतस्यासंगोदासीनतामाहद्वाभ्यां ॥ तस्येतिसमदृक्त्वंब्रह्मपश्यति ॥ अतोनिर्विकल्पकः स्वार्थेकः निरस्तभेदःकिंचएकस्मि

शौनकउवाच ॥ सूतसूतमहाभागवदनोवदतांवर ॥ कथांभागवतींपुण्यांयदाहभगवान्छुकः ॥२॥
कस्मिन्युगेप्रवृत्तेयंस्थानेवाकेनहेतुना ॥ कुतःसंचोदितःकृष्णःकृतवान्संहितांमुनिः ॥३॥ तस्य
पुत्रोमहायोगीसमदृक्निर्विकल्पकः ॥ एकांतमतिरुन्निद्रोगूढोमूढइवेयते ॥४॥ ॥

नेवऽन्तःसमाधिर्यस्यास्तथाभूतनामनिर्णयस्यसः यतउन्निद्रः मायाशयनादुद्बुद्धः यानिशासर्वभूतानामिति ॥ अतएवगूढः अप्र
कटः मूढइवप्रतीयते ॥४॥ श्रीरामायनमः ॥ श्रीगोविंदायनमः छ ॥ छ छ

निर्विकल्पकत्वं प्रपंचयति॥ दृष्ट्वेति॥ आत्मजं शुकं प्रव्रजंतं अनुयांतं गच्छंतं ऋषिं व्यासं अनग्नमपि दृष्ट्वा जले क्रीडंत्यो देव्यः अप्सरसः ह्रियाल ज्जया वस्त्रपरिधानं कृतवंत्यः॥ अनग्नमपीत्यनेनार्यान्नसुतो नग्नः स पुरतो गच्छतः सुतस्य तु ह्रिया न परिदधुः॥ न चित्रं वीक्ष्य इयं स्त्री अयं पुमान् इति भिदा भेदस्तवास्ति विविक्ता पृथक् न दृष्टिर्यस्य॥५॥ एवंभूतो सौ कथमालक्षितः ज्ञातः कुरवो जांगलाख्य देशविशे

दृष्ट्वानुयांतमृषिमात्मजमप्यनग्नं देव्यो ह्रियापरिदधुर्न सुतस्य चित्रं॥ तद्वीक्ष्य पृच्छति मुनौ जगदुस्तवास्ति स्त्रीपुंभिदा न तु सुतस्य विविक्तदृष्टेः॥५॥ कथमालक्षितः पौरैः संप्राप्तः कुरुजांगलान्॥ उन्मत्तमूकजडवद्विचरन्गजसाह्वये॥६॥ कथं वा पांडवेयस्य राजर्षेर्मुनिना सह॥ संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः॥७॥

षास्तान् संप्राप्तः प्रथमं तत्र गजसाह्वये विचरन् गजेन सहित आह्वयो यस्य तस्मिन्॥ हस्तिनामराजेन निर्मितत्वात्॥६॥ एवंभूतेन मुनिना सह यत्र संवादे एषा सात्वती भागवती श्रुतिः संहिता॥७॥

एतत्व्याख्यानेवकुंकालावस्थानापेक्षंतस्यलेकत्रावस्थानंदुर्लभमित्याहसद्यदति ॥ गोदोहनमात्रकालंप्रतीक्षेतेनदर्पिनमिक्षार्थंकिंतुजेषामाश्रमंगरहंतीर्थीकुर्वन् ॥ तस्मादेवंमत्तेत्रिवक्तेत्याश्चर्यं ॥ ८ ॥ श्रोतुस्कचरितमनीवाश्चर्येयतःअतःकथयेत्याहअभिमन्युसुतामितिपंचभिः ॥ द्दै

सगोदोहनमात्रंहिगृहेषुगृहमेधिनां ॥ अवेक्षतेमहाभागतीर्थीकुर्वंस्तदाश्रमं ॥ ८ ॥ अभिमन्युसुतंसूत प्राहुर्भागवतोत्तमं ॥ तस्यजन्ममहाश्चर्यंकर्माणिचगृणीहिनः ॥ ९ ॥ सम्राट्कस्यवाहेतोःपांडूनांमानवर्द्धनः ॥ प्रायोपविष्टोगंगायामनादृत्याधिराट्श्रियं ॥ १० ॥ नमंतियत्पादनिकेतमात्मनःशिवायहानीयधनानिशत्रवः ॥ कथंसवीरःश्रियमंगदुस्त्यजांयुवैषतोत्स्रष्टमहोसहासुभिः ॥ ११ ॥ ॥ ७

गृणीहिकथय ॥ ९ ॥ संम्राट्चक्रवर्तीवेतिवितर्कःकस्यवाहेतोःकस्मात्कारणात्अधिराट्श्रियंअधिराज्यश्रियंसंपदंअनादृत्य ॥ १० ॥ यस्यपादनिकेतंचरणपीठंहस्फुटंधनान्यानीशत्रवोनमंति ॥ अंगहेसूतयुवाजहराएवशेषतस्छन् ॥ आत्मनेपदमार्षंअसुभिःप्राणैःसह ॥ ११ ॥

विरक्तस्य किं धनादिभिरित्यत आह ॥ लोकस्य शिवाय सुखाय भवाय समृद्ध्यै भूतये ऐश्वर्याय च ते जीवंति न त्वात्मार्थं एवं सति असौ राजा निर्वि
द्य विरक्तोपि परेषामाश्रयं कलेवरं कुतो हेतोर्मुमोच न हि परोपजीवनं स्वयं त्यक्तुमुचितमित्यर्थः ॥१२॥ यत् किंचन पृष्टोसि तत्सर्वं नोस्मभ्यं
समाचक्ष्व ॥ यद्यस्मात् ॥ वाचां विषये गीर्गोचरेर्थे स्नातं पारंगतं त्वां मन्ये छांदसाद्वेदादन्यत्र वैदिकव्यतिरेकेणात्र वा लौकिकत्वात् ॥१३॥ कस्मि

शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः ॥ जीवंति नात्मार्थमसौ पराश्रयं मुमोच निर्वि
द्य कुतः कलेवरं ॥१२॥ तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन ॥ मन्ये त्वां विषये वाचां स्नातमन्यत्र
छांदसात् ॥१३॥ सूत उवाच ॥ द्वापरे समनुप्राप्ते तृतीये युगपर्यये ॥ जातः पराशराद्योगी वासव्यां कल
याहरेः ॥१४॥

तृयुगद्वसाद्विमिस्थानां व्यासजन्मकथनपूर्वकमुत्तरमाह ॥ द्वापरे समनुप्राप्ते कदेत्यपेक्षायामाह ॥ तृतीये युगस्य पर्यये परिवर्ते वा
सव्यां उपरिचरस्य वसोर्वीर्याज्जातायां सत्यवत्यां योगी व्यासः जातः जज्ञे ॥१४॥ ॥ छ छ ॥

जलमुपस्पृश्य जले स्नानादिकं कृत्वेत्यर्थः आसीनो बभूवेति शेषः विविक्ते देश इत्यादि चित्तैकाग्र्यार्थमुक्तं अनेनैव बदरिकाश्रमस्थानं सूचि-
तं ॥१५॥ तत्र च स ऋषिर्धर्मव्यतिकरादिकं वीक्ष्य सर्ववर्णाश्रमाणां च यद्धितं तद्दध्याविति तृतीयेनान्वयः परावरज्ञः ॥ अतीतानागतवित् ॥ अव्य-
क्तं रंहो वेगो यस्य तेन कालेन युगधर्माणां व्यतिकरं संकरं प्राप्तं वीक्ष्य तथा भुवि युगे युगे ॥१६॥ भौतिकानां शरीरादीनां तत्कृतं कालकृतं नि-

सकदाचित्सरस्वत्या उपस्पृश्य जलं शुचि ॥ विविक्त एक आसीन उदिते रविमंडले ॥१५॥ परावरज्ञः स ऋ-
षिः कालेनाव्यक्तरंहसा ॥ युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे ॥१६॥ भौतिकानां च भावानां शक्ति-
ह्रासं च तत्कृतं ॥ अश्रद्दधानान्निःसत्वान्दुर्मेधान्ह्रसितायुषः ॥१७॥ दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन
चक्षुषा ॥ सर्ववर्णाश्रमाणां यद्दध्यौ हितममोघदृक् ॥१८॥ चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकं
व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधं ॥१९॥

सत्वान्धैर्यशून्यान्दुर्मेधान्मंदमतीन् ॥१७॥ १८॥ तत्र तत्र होत्रोपलक्षि-
ताश्चत्वारः ऋत्विजश्चतुर्होतारः तैरनुष्ठेयं कर्म चातुर्होत्रं शुद्धं शुद्धिकरं यज्ञसंतत्यै यज्ञानामविच्छेदाय ॥१९॥ ७ ४ ॥

चातुर्विध्यमेवाह ॥ ऋगिति ॥ उद्धृताः पृथक्कृताः ॥२०॥२१॥ दारुणाः अथर्वोक्ताभिचारादिप्रवृत्तेः ॥२२॥ शाखाविभागमाह ॥ तएतइति व्यस्य
न्विभक्तवंतः ॥२३॥ वेदविभागप्रयोजनमाह ॥ तएवेति यथाल्पमतिमेधाविभिर्धार्यंतेस्म तएव ॥२४॥ किंच स्त्रीशूद्रेति ॥ द्विजबंधवः त्रै

ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः ॥ इतिहासपुराणं च पंचमो वेद उच्यते ॥२०॥ तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः ॥ वैशंपायन एवैको निष्णातो यजुषामुत ॥२१॥ अथर्वांगिरसामासीत्सुमंतुर्दारुणो मुनिः ॥ इतिहासपुराणानां पिता मे रोमहर्षणः ॥२२॥ त एत ऋषयो वेदं स्वं स्वं व्यस्यन्ननेकधा ॥ शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोभवन् ॥२३॥ त एव वेदा दुर्मेधैर्धार्यंते पुरुषैर्यथा ॥ एवं चकार भगवान्व्यासः कृपणवत्सलः ॥२४॥ स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा ॥ कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ॥ इति भारतमाख्यानं कृपया मुनिना कृतं ॥२५॥ ॥ ॥ छ ॥ छ

वर्णिकेषु अधमाः तेषां कर्मरूपे श्रेयसि श्रेयःसाधने ॥ एवं भवेत् अनेनैव प्रकारेण भवत्विति अत एव तेषां कृपया भारताख्यानं मुनिना कृतं मू
ढानां श्रेयसि हिते ॥२५॥

सर्वात्मकेनापिकर्म्मणानातिप्रसीदत्तहृदयं यस्यसः ॥ २६ ॥ चिन्नाप्रसन्नोहेतुं वितर्कयन्‌ इदमुवाचसगतः ॥ २७ ॥ मानिताः पूजिताः ॥ २८ ॥ २९ ॥
देहेभवः दैह्यः आत्माजीवः वस्तुतोविभुः परिपूर्णएव ॥ आत्मनास्वरूपेण ॥ असंपन्नः तादात्म्यमप्राप्तइवाभाति ॥ ब्रह्मवर्चसं वेदश्रव

एवंप्रवृत्तस्यसदात्मनांश्रेयसिद्विजाः ॥ सर्वात्मकेनापियदानातुष्यद्धृदयंततः ॥ २६ ॥ नातिप्रसीदद्धृदयस्सरस्वत्यासरस्वतटेशुचौ ॥ वितर्कयन्विविक्तस्थइदंचोवाचधर्मवित्‌ ॥ २७ ॥ धृतव्रतेनहिमयाछंदांसिगुरवोग्नयः ॥ मानितानिर्व्यलीकेनगृहीतंचानुशासनं ॥ २८ ॥ भारतव्यपदेशेनह्याम्नायार्थश्चदर्शितः ॥ दृश्यतेयत्रधर्मादिस्त्रीशूद्रादिभिरप्युत ॥ २९ ॥ अथापिबतमेदेह्योह्यात्माचैवात्मनाविभुः ॥ असंपन्नइवाभातिब्रह्मवर्चस्यसत्तमः ॥ ३० ॥ ॥ छ

णाध्यायोत्कर्षजंतेजः ॥ मत्तसाधवोब्रह्मवर्चस्याः तेषुसत्तमः ॥ अतिश्रेष्ठोपियद्वा ॥ नकेवलमसंपन्नइवाभाति ॥ प्रत्युतब्रह्मवर्चसीब्रह्मवर्चस्वानपिअसत्तमइवाभाति ॥ पाठांतरेकमनीयतमोपीति ॥ उशत्तमः ॥ ३० ॥ ॥ छ छ ॥

असंपन्नो हेतुस्तयमेवाशंकते किंचेति ॥ प्रायेण भूम्नस्त्वेन हि यस्मात्त एव धर्माः अच्युतस्य प्रियाः खिलं न्यूनं खिद्यतः खेदं प्राप्नुवतः ॥ कृष्णस्य
व्यासस्य प्रागुदाहृतं सरस्वतीतीरस्थं ॥ ३२ ॥ तं नारदमागतमभिज्ञाय सहसा प्रत्युत्थाय विधिवत्पूजयामासेति ॥ ३३ ॥ इति भागवतेत्र

किंवा भागवता धर्म्मा न प्रायेण निरूपिताः ॥ प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ॥ ३१ ॥ तस्यैवं खिल
मात्मानं मन्यमानस्य खिद्यतः ॥ कृष्णस्य नारदोभ्यागादाश्रमं प्रागुदाहृतं ॥ ३२ ॥ तमभिज्ञाय सहसा प्र
त्युत्थायागतं मुनिः ॥ पूजयामास विधिवन्नारदं सुरपूजितं ॥ ३३ ॥ इति श्रीभागवते महापुराणे प्रथ
मस्कंधे नारदव्याससंगमे चतुर्थोध्यायः ॥ ४ ॥ सूत उवाच ॥ अथ तं सुखमासीन उपासीनं बृहच्छ्रवाः
देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव ॥ १ ॥

प्रथमे चतुर्थोध्यायः ॥ ४ ॥ पंचमे सर्वधर्मेभ्यो हरिकीर्त्तनगौरवं ॥ व्यासखिन्नप्रसादाय नारदेनोपदिश्यते ॥ १ ॥ उपसमीपे आसीनं विप्रर्षिं
व्यासं बृहच्छ्रवाः महायशाः स्मयन्नीषद्धसन्निवेत्यनेन मुखप्रसन्नता द्योत्यते यद्वा इवेत्यनधिकारार्थे अहो महानपि मुह्यतीति स्मय
मानः ॥

शारीरः शरीराभिमानी आत्मा आत्मना तेन शरीरेण कच्चित्किं परितुष्यति ॥ मानस आत्मा मनोभिमानी तेन मनसा परितुष्यति कच्चित्त्वेवेति
नेजिज्ञासितुमिष्टं धर्मादि यत् ॥ तत्सर्वं सुसंपन्नं सम्यक् ज्ञातं अपिशब्दात्तुष्टिं तेचेत्यर्थः ॥ अपीतिपाठे संबोधनं सुसंपन्नत्वे हेतुः महद
द्भुतमित्यादि सर्वैरर्थैर्धर्मादिभिः ॥ परिबृंहितं परिपूर्णं ॥३॥ किंच यत्सनातनं नित्यं परं ब्रह्म तच्च त्वयाधिज्ञासितं विचारितं ॥ अधी

नारद उवाच ॥ पाराशर्य महाभागवत: कच्चिदात्मनः परितुष्यति शारीर आत्मा मानस एव वा ॥२॥ जि
ज्ञासितं सुसंपन्नमपि ते महदद्भुतं ॥ कृतवान्भारतं यस्त्वं सर्वार्थपरिबृंहितं ॥३॥ जिज्ञासितमधीतं
च ब्रह्म यत्तत्सनातनं ॥ तथापि शोचस्यात्मानमकृतार्थ इव प्रभो ॥४॥ व्यास उवाच ॥ अस्त्येव मे सर्वमिदं
त्वयोक्तं तथापि नात्मा परितुष्यते मे ॥ तन्मूलमव्यक्तमगाधबोधं पृच्छामहे त्वात्मभवात्मभूतं ॥५॥

तं अधिगतं प्राप्तं चेत्यर्थः ॥ तथापि शोचसि तत्किमर्थं इति शेषः आत्मा शारीरो मानसश्च तन्मूलं तस्यापरितोषस्य कारणं अव्यक्तं ॥ अ
स्फुटं हे नारद त्वां पृच्छाम आत्मभवो ब्रह्मा तस्यात्मनो देहादुद्भूतं ॥ अतएव अगाधोऽनिर्गमो बोधो यस्य तं त्वां ॥५॥ ॥

भा०प्र०
॥२४॥

अगाधबोधतां प्रपंचयन्नाह ॥ स वा इति द्वाभ्यां ॥ सर्वगुह्यज्ञाने हेतुः ॥ यद्यस्मात्पुराणः पुरुषः उपासितस्त्वया ॥ कथंभूतः परावरेशः कार्य
कारणनियंता ॥ यतः मनसैव संकल्पमात्रेण गुणैः ॥ कृत्वा विश्वं सृजतीत्यादि ॥ ६ ॥ किंच त्वं त्रिलोकीं पर्यटन् अर्क इव सर्वदर्शी योगबलेन
च प्राणवायुरिव सर्वप्राणिनामंतश्चरः सन् आत्मसाक्षी बुद्धिवृत्तिः अतः परे ब्रह्मणि ॥ धर्मतः योगेन निस्नातस्य नतुकृपयाज्ञवल्क्येन

स वै भवान्वेद समस्तगुह्यमुपासितो यत्पुरुषः पुराणः ॥ परावरेशो मनसैव विश्वं सृजत्यवत्यत्ति गुणै
रसंगः ॥ ६ ॥ त्वं पर्यटन्नर्क इव त्रिलोकीमंतश्चरो वायुरिवात्मसाक्षी ॥ परावरे ब्रह्मणि धर्मतो व्रतैः ॥ स्ना
तस्य मे न्यूनमलं विचक्ष्व ॥ ७ ॥ श्रीनारद उवाच ॥ भवतानुदितप्रायं यशो भगवतोऽमलं ॥ येनैवासौ
न तुष्येत मन्ये तद्दर्शनं खिलं ॥ ८ ॥ ॥ छ

इज्याचारदयाहिंसादानस्वाध्यायकर्म्मणां ॥ अयं तु परमो धर्म्मो यद्योगेनात्मदर्शनमिति ॥ अपरे च ब्रह्मणि वेदाख्ये व्रतैः स्वाध्याय
नियमैर्निस्नातस्य मे ॥ अलं अत्यर्थं यत्तन्न्यूनं तद्धि चक्ष्व वितर्कय ॥ ७ ॥ अनुदितप्रायं अनुक्तप्रायं ॥ भगवद्यशो विना येनैव धर्मादि
ज्ञानेनासौ भगवान्न तुष्येत तदेव दर्शनं ज्ञानं खिलं न्यूनं मन्ये ॥ ८ ॥ ॥ छ छ ॥

राम
॥२४॥

ननु भगवद्यश एव तत्र तत्रानुवर्णितं तत्राह ॥ यथेति चशब्दाद्धर्मादिसाधनानि च ॥ न तथा धर्मादिवत्प्राधान्येन वासुदेवस्य महिमा नो
क्त इत्यर्थः ॥९॥ वासुदेवव्यतिरिक्तोऽन्यविषयज्ञानवदेवान्यविषयं वाक्यचातुर्यं च खिलमेवेत्याह नेति ॥ चित्रपदमपि यद्वचो हरेर्य
शो न प्रगृणीत न तद्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्थानं उशंति मन्यंते ॥ कुतः मानसाः सत्त्वप्रधाने मनसि वर्तमाना हंसा यत्र

यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः ॥ न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥९॥ न यद्वचश्चि
त्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् ॥ तद्वायसं तीर्थमुशंति मानसा न यत्र हंसा निरमंत्
युशिक्क्षयाः ॥१०॥ ॥ छ ॥ ॥ छ ॥ ॥

यः । यत्र न निरमंति कर्हिचिदपि नितरां न रमंते उशिक्क्षयाः ॥ उशिक् कमनीयं ब्रह्म क्षयो निवासो येषां ते ॥ यथा प्रसिद्धा हंसा मा
नसे सरसि चरंतः ॥ कमनीयपद्मषंडनिवासाः ॥ त्यक्तविचित्रान्नादिषु च्छिष्टगर्त्ते काकक्रीडास्थाने न निरमंत इति शेषः ॥१०

विनापिपदत्वातुर्यभगवद्यशःप्रधानं॥ वचःपवित्रमित्याह॥ तद्वाग्विसर्गइति॥ सचासौवाग्विसर्गः॥ वाचांप्रयोगःजनतानांसमूहोजननं तस्याः॥ अघौघविप्लावयतिनाशयतीतितथायस्मिन्वाग्विसर्गेअबद्धवत्यपि॥ अपशब्दादियुक्तेपिप्रतिश्लोकंअनंतस्ययशोंकितानि नामानिभवंतितत्रहेतुः॥ यत्यानिनामानिसाधवोमहांतः॥ वक्तरिसतिशृण्वंतिश्रोतरिसतिगृणंति॥ अन्यज्ञातुस्वयमेवगायंतिकीर्तयं तीति॥११॥ भक्तिहीनंकर्मबंधनमेवकिंकेवलज्ञानमपिनेत्याह नैष्कर्म्यमिति नैष्कर्म्यंनिष्कर्मब्रह्मतदेकाकारत्वान्निष्कर्म्यतारू

तद्वाग्विसर्गोजनताघविप्लवोयस्मिन्प्रतिश्लोकमबद्धवत्यपि॥ नामान्यनंतस्ययशोंकितानियच्छृण्वंति गायंतिगृणंतिसाधवः॥११॥ नैष्कर्म्यमप्यच्युतभाववर्जितंनशोभतेज्ञानमलंनिरंजनं॥ कुतःपुनः शश्वदभद्रमीश्वरेनचार्पितंकर्मयदप्यकारणं॥१२॥ ॥ ७

पंनैष्कर्म्यं॥ अजयतेनेनेतिअंजनंउपाधिः॥ तन्निवर्तकंनिरंजनंएवंभूतमपिज्ञानंअच्युतेभावोभक्तिस्तद्वर्जितंचेत्॥ अलमत्यर्थंनशो भतेसम्यगपरोक्षायनकल्पतइत्यर्थः॥ तदपिकर्मनकालेफलकालेचअभद्रंदुःखरूपंयत्काम्यंकर्मयदप्यकारणमकाम्यं तच्चेतिचकारणामकाम्यंतच्चेतिचकारस्यान्वयः॥ तदपिकर्मईश्वरेनार्पितंचेत्कुतःपुनःशोभतेबहिर्मुखत्वेनशोधकत्वाभावात्॥१२

तदेवंभक्तिशून्यानिज्ञानवाक्चातुर्यकर्मकौशलानिव्यर्थान्येवेत्युपसंहृतः॥अतोहरेश्चरितमेवानुवर्णयेत्याह॥अथोअतःकारणात्॥अमो
घायथार्थादृग्बुद्धिःशुचीयंयस्यशुचित्वंश्रवोयशोयस्यससत्येरतः॥धृतानिव्रतानियेनसभवानेवंमहागुणस्त्वात्॥अतउरुक्रमस्य
विविधंचेष्टितंलीलांसमाधिनाचित्तैकाग्र्येणखिलस्यबंधमुक्तयेत्वमनुस्मरस्ववर्णयेत्यर्थःएतच्चवाक्यांतरमितिमध्यमपुरुषप्रयोगो
नानुपपन्नः॥१३॥विपक्षेदोषांतरमाह॥ततउरुक्रमविचेष्टितात्पृथग्दृशः॥अन्यथाप्रकारांतरेणयत्किंचिद्दर्थांतरंविवक्षतः

अथोमहाभागभवानमोघदृक्शुचिश्रवाःसत्यरतोधृतव्रतः॥उरुक्रमस्याखिलबंधमुक्तयेसमाधि
नानुस्मरतद्विचेष्टितं॥१३॥ततोन्यथाकिंचनयद्विवक्षतःपृथग्दृशस्तत्कृतरूपनामभिः॥नकर्हि
चित्क्वापिचदुःस्थितामतिर्लभेतवाताहतनौरिवास्पदं॥१४॥ ॥ ७

तयाविवक्षयाकृतैःस्फुरितैःरूपैर्नामभिश्चवक्तव्यत्वेनोपस्थितैःदुःस्थितानवस्थितासतीमतिः॥कदाचित्क्वापिविषयेआस्पदं
स्थानंनलभेत॥वातेनाहता॥आघूर्णितानौरिव॥तदुक्तंगीतासुव्यवसायात्मिकाबुद्धिरेकेहकुरुनंदनबहुशाखाह्यनंताश्चबुद्ध
योव्यवसायिनामित्यादि॥१४॥

भा० प्र०
॥ २६ ॥

तदेवं हरियशो विना मात्रनादिषु कृतं धर्मादिवर्णनम किंचित्करमित्युक्तं प्रत्युत विरुद्धमेव जातमित्याह ॥ जुगुप्सितं निंद्यं ॥ काम्यकर्मादि स्व
भावत एव रक्तस्य जनस्य रागिणः ॥ पुरुषस्य धर्मकृते धर्मार्थं अनुशासतस्तव महानयं व्यतिक्रमः अन्यायः कुत इत्यत आह ॥ यस्य वाक्य
तो यमेव मुख्यो धर्म इति प्रज्ञया धनेन स्थाइति स्थितः ॥ इतरः प्राकृतो जनः तस्य काम्यकर्मादि ॥ अन्येन तत्त्वज्ञेन क्रियमाणं निवा
रणं सद्धर्मोयमेव बालया क्रियमाणं ॥ यद्वा नकर्मणा न प्रज्ञया धनेन त्यागेनैके अमृतत्वमानशुरित्यादि श्रुत्या क्रियमाणं निवारणं य

जुगुप्सितं धर्मकृतेनुशासतः स्वभावरक्तस्य महान्व्यतिक्रमः । यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते
तस्य निवारणं जनः ॥ १५ ॥ ॥ ॥ ॥

याथ्र्मेतदिति न मन्यते किंतु प्रवृत्तिमार्गानधिकृतविषयं तदिति कल्पयंति तदुक्तं मतांतरोपन्यासे भट्टैः ॥ नैवैवं शक्यते वक्तुं येषयं वा
न्वादृशो नराः ॥ गृहस्थत्वेन शक्ष्यंति कर्तुं तेषामयं विधिर्नोष्टिक ब्रह्मचर्येवा परिव्राजकतापि वा नैर वश्यं गृहीतव्यातेनाशक्तुं च
न इत्यादि ननु यद्येवं प्रवृत्तिमार्गो निषेधेनतर्हि निवृत्तिमार्गेण सर्वक्रियात्यागेनैव परमेश्वरसुखस्वरूपानुभवे किं तद्य ॥ ॥ ॥

राम
॥ २६ ॥

शः कथंतेनापितत्राह विचक्षणइति विचक्षणोतिनिपुणः कश्चिदेवनिवृत्तितः सर्वक्रियानिवृत्त्याअस्यविभोः सुखंनिर्विकल्पसुखात्मकंस्व
रूपंवेदितुंज्ञातुमर्हती ॥ नपुनरविचक्षणाः प्रवृत्तिस्वभावाः विमुखेहेतुः नअंतंकालतःपारंचदेशतोयस्यतस्यविभोश्चेष्टितंततः कारणा
द्विभोअनात्मनोदेहाद्यभिमानिनअतएवगुणैः ।प्रवर्तमानस्यजनस्यदर्शयभवानिनिजित्वमित्यर्थः ॥ पाठांतरेहे भगवन्निति संबोधनं ॥ १६
एवंतावत्काम्यधर्मादेरनर्थहेतुत्वात्तंविहाय ॥ हरेर्लीलैववर्णनीयेत्युक्तंइदानींतुनित्यनैमित्तिकस्वकर्मनिष्ठामप्यनादृत्यकेवलंहे

विचक्षणोस्यार्हतिवेदितुंविभोरनंतपारस्यनिवृत्तितः सुखं ॥ प्रवर्तमानस्यगुणैरनात्मनस्ततोभवान्द
र्शयचेष्टितंविभो ॥ १६ ॥ त्यक्त्वास्वधर्मंचरणांबुजंहरेर्भजन्नपक्वोथपतेत्ततोयदि ॥ यत्रक्ववाभद्रमभूद
मुष्यकिंकोवार्थआप्तोऽभजतांस्वधर्मतः ॥ १७ ॥ ॥ ७ ७

रिभक्तिरेवोपदेष्टव्येत्याशयेनाह त्यक्त्वेति नतुस्वधर्मत्यागेनभजन्भक्तिपरिपाकेनयदिकृतार्थोभवेत्तदानकाचिच्चिंतायदिपुनर
पक्वएवम्रियेततनतोभ्रश्येपतवातदास्वधर्मत्यागनिमित्तोनर्थःस्यादित्याशंक्याहततोभजनात्कथंचित्पतेत्भ्रश्येपतम्रियेतवायदित
दापिभक्तिरसिकस्यकर्मानधिकारत्वान्नर्थशंकाअंगीकृत्याप्याहवाशब्दः कटाक्षेयत्रक्ववानीचयोनावपिअमुष्यभक्तिरसिकस्यअ
भद्रमभूत्किंनाभूदेवेत्यर्थः ।भक्तिवासनासद्भावादितिभावः अभजद्भिस्तुकेवलस्वधर्मतः कोवाअर्थः आप्तः नकोपीत्यर्थः अभजतामपिच

ननु स्वधर्ममात्रादपि कर्मणा पितृलोक इति श्रुतेः पितृलोकप्राप्तिः फलमस्त्येव तत्राह तस्यैवेति तस्यैव हेतोस्तदर्थं प्रयत्नं कुर्यात् ॥ यदुपरि ब्रह्मलो-
कपर्यंतं ॥ अधः स्थावरपर्यंतं च भ्रमद्भिर्जीवैर्न लभ्यते षष्ठी तु सर्वत्र ॥ ननु विषयसुखं अन्यत एव प्राचीनकर्मणा सर्वत्र नरकादावपि लभ्य-
ते दुःखवत् ॥ यथा दुःखं प्रयत्नं विना लभ्यते दुःखवत् । यथा दुःखं प्रयत्नं विना लभ्यते तद्वत् ॥ तदुक्तं ॥ अप्रार्थितानि दुःखानि यथैवा-
यांति देहिनां ॥ सुखान्यपि तथा मन्ये दैन्यमत्रातिरिच्यत इति ॥१८॥ यदुक्तं यत्र क्व वाभद्रमभूदिति तदुपपादयति ॥ न वा इति मुकुंदसेवी

तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः ॥ तल्लभ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभी-
रंहसा ॥१८॥ नैवै जनो जातु कथंचनाव्रजेन्मुकुंदसेव्यन्यवदंग संसृतिं ॥ स्मरन्मुकुंदांघ्र्युपगूहनं पुनर्वि-
हातुमिच्छेन्न रसग्रहो यतः ॥१९॥ ॥

जनः जातु कदाचित्कथंचन कुयोनिगतोऽपि संसृतिं नाव्रजेत् नाविशेत् ॥ अंग अहो अन्यवत् केवलकर्मनिष्ठवदिति विधेयधर्मो ह दृष्टांतं कुत इ-
त्यत आह ॥ मुकुंदांघ्र्योः उपगूहनं पुनः स्मरन् विहातुं नेच्छेत् ॥ यतोऽयं जनो रसग्रहः रसेन रसनीयेन गृह्यते वशीक्रियते यः ह्यारसनीये
ग्रह आग्रहो यस्य तदुक्तं भगवता यतत्तेनैव ततो भयः ॥ संसिद्धो कुरुनंदन ॥ दृढाभ्यासेन तेनैव हि येन ह्यवशोऽपि सः इति ॥१९॥

नन्वेवं भगवल्लीलाप्राधान्येन वर्णयेत्युक्तं ॥ तत्र को भगवान्काश्च लीला इत्यपेक्षायामाह ॥ इदमिति ॥ इदं विश्वं भगवानेव स तु अस्माद्वि-
श्वस्मादितरः ईश्वरात्प्रपंचो न पृथक् ईश्वरस्तु प्रपंचात्पृथगित्यर्थः ॥ तत्र हेतुः ॥ यतो भगवतो हेतोर्जगतः स्थित्यादयो भवंति ॥ अनेने-
व लीला अपि प्रदर्शिताः यद्वा ॥ इदं विश्वं भगवान् इतर इव यः स जीवोपि भगवान् चेतनाचेतनप्रपंचस्तद्व्यतिरेकेण नास्ति स एवैकस्त्व-
मित्यर्थः ॥ हि शब्देन सर्वं खल्विदं ब्रह्मेत्यादिप्रमाणं सूचितं तद्धि स्वयमेव भवान्वेत्ति भगवांस्त्वदमादेशमात्रं ॥ आचार्यवान्पुरुषो वेद

इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसंभवाः ॥ तद्धि स्वयं वेद भवांस्तथापि वै प्रादेशमात्रं
भवतः प्रदर्शितं ॥ २० ॥ त्वमात्मनात्मानमवेह्यमोघदृक् परस्य पुंसः परमात्मनः कलां ॥ अजं प्रजातं ज-
गतः शिवाय तन्महानुभावाभ्युदयोधिगण्यतां ॥ २१ ॥ ॥ ७

त्यादिश्रुत्यर्थसंपादनाय प्रदर्शितं ॥ २० ॥ न च तवाचार्यापेक्षा ईश्वरावतारत्वादित्याह त्वमिति हे अमोघदृक् त्वं आत्मना स्वयं ॥ आत्मा-
नमजमेव संतं जगतः ॥ शिवाय प्रजातमवेहि ॥ कुतः परस्य पुंसः कलां अंशभूतं ॥ अतस्त्वत्तो महानुभावस्य हरेरभ्युदयः पराक्रमो
अधिकं गण्यतां निरूप्यतां ॥ २१ ॥

अनेनैव तप आदि सर्वं सफलं तस्येत्याह॥ इदंहीति॥ सूक्तं द्रव्यो नावेनिष्टाइदमेव हितपः श्रवणादरविच्युतो नित्योर्थः फलं किंतत
उत्तमश्लोकस्य गुणानुवर्णनमिति यत्॥२२॥ सत्संगतो हरिकथाश्रवणादिफलं स्वत्वं ज्ञानेन प्रपंचयति॥ अहमिति॥ अहं पुरा पूर्वकल्पे
अतीतभवे पूर्वजन्मनि वेदवादिनां दास्याः सकाशात् अभवं जातोस्मि निरूपितः नियुक्तः क्व योगिनां शुश्रूषणे प्रावृषि वर्षापलक्षिते चातुर्मा

इदंहिपुंसस्तपसःश्रुतस्यवास्विष्टस्यसूक्तस्यचबुद्धिदत्तयोः॥ अविच्युतोर्थःकविभिर्निरूपितोयदुत्त
मश्लोकगुणानुवर्णनं॥२२॥ अहंपुरातीतभवेभवंमुनेदास्यास्तुकस्याश्चनवेदवादिनां॥ निरूपितो
बालकएवयोगिनांशुश्रूषणेप्रावृषिनिर्विविक्षताम्॥२३॥ तेमय्यपेताखिलचापलेर्भकेदांते
धृतक्रीडनकेनुवर्तिनिचक्रुःकृपांयद्यपितुल्यदर्शनाः॥ शुश्रूषमाणेमुनयोल्पभाषिणि॥२४॥

स्य निर्विविक्षतां निर्वेशं एकत्र वासं कर्तुमिच्छतां॥२३॥ अपेतान्यखिलानि चापलानि यस्मात्तस्मिन् यतेंद्रिये अधृतक्रीडनके त्य
क्तक्रीडासाधने अनुवर्त्तिनि॥ अनुकूले॥२४॥ ॥ छ छ ॥

उछिष्टलेपात्पात्रलग्नान्नंतैर्द्विजैरनुज्ञातःसनसंभुंजेस्मतेनभोजनेनापास्तकिल्बिषोजातोस्मितेषांधर्मेपरमेश्वरभजनेएवआत्मनोमनसो
रुचिः प्रजायतेस्मेत्यनुषंगः ॥२५॥ अशृणवंश्रुतवानस्मि ॥ मेश्रद्धयामेमेवस्वतःशिद्धयानत्वन्येनबलाज्जनितया ॥ अतोममेतस्यास्या
योनरुक्त्वं ॥२६॥ प्रियंश्रवोयशोयस्यतस्मिन्भगवतिलब्धरुचेर्ममास्खलिताअप्रतिहतामतिः ॥ अभवदित्यनुषंगः ॥ ययामत्यापरेब्रं

उछिष्टलेपाननुमोदितोद्विजैः सकृत्स्मभुंजेतदपास्तकिल्बिषः ॥ एवंप्रवृत्तस्यविशुद्धचेतसस्तद्धर्मए
वात्मरुचिः प्रजायते ॥२५॥ तत्रान्वहंकृष्णकथाःप्रगायतामनुग्रहेणाशृणवंमनोहराः ॥ ताः श्रद्धया
मेनुपदंविशृण्वतः प्रियश्रवस्यंगममाभवद्रुचिः ॥२६॥ तस्मिंस्तदालब्धरुचेर्महामुनेप्रियश्रवस्य
स्खलितामतिर्ममययाहमेतत्सदसत्स्वमाययापश्यमयिब्रह्मणिकल्पितंपरे ॥२७॥ छ

पातीतेब्रह्मस्वरूपेमयिसदसत् ॥ स्थूलंसूक्ष्मंचरूपंतच्छरीरंस्वमाययास्वाविद्ययाकल्पितंनतुवस्तुतोस्तीतितत्स्वरूपमेवपश्यामि ॥२७

एवं शुद्धत्वंपदार्थे ज्ञाते देहादिष्वहंत्वविक्षेपनिवृत्ते तत्कारणभूतरजस्तमोनिवर्तिका दृढा भक्तिर्जातेत्याह इत्थमिति हरेर्यशः अनुसवं त्रिकालं
॥२८॥ तस्यैवं विशुद्धत्वंपदार्थस्य दृढभक्तिमतो मे प्रश्रितस्य विनीतस्य ॥२९॥ गुह्यतममिति साधनभूतं धर्मं तत्त्वज्ञानं गुह्यतरं ॥ तत्राप्यश्म

इत्थं शरत्प्रावृषिकावृतू हरेर्विशृण्वतो मेऽनुसवं यशोऽमलं ॥ संकीर्त्यमानं मुनिभिर्महात्मभिर्भक्तिः प्रवृत्ता
त्मरजस्तमोपहा ॥२८॥ तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः । श्रद्दधानस्य बालस्य दान्तस्यानुचरस्य
च ॥२९॥ ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितं ॥ अन्ववोचन्गमिष्यंतः कृपया दीनवत्सलाः ॥३०॥
येनैवाहं भगवतो वासुदेवस्य वेधसः ॥ मायानुभावमविदं येन गच्छंति तत्पदं ॥ ३१ ॥

त्ज्ञानं गुह्यतमं ॥ भगवतोदितं भागवतशास्त्रं अन्ववोचन् उपदिष्टवंतः ॥३०॥ तदेव ज्ञानं सर्वोक्तं त्वंपदार्थज्ञानात् ॥ विवेकेन दर्शयति
अविदं ज्ञातवानहं ॥ ३१ ॥ ॥ श्रीगंगादेव्यै नमः ॥ ॥ ॥

तत्साधनं धर्मरहस्यं च संसूचितमित्याह॥ एतदिति॥ तापत्रयस्याध्यात्मिकादेस्तस्य चिकित्सितं भेषजं निवर्त्तकं सहसाधकमिति यावत्॥ किं त द्भगवति भावितं समर्पितं यत्कर्म तत्॥ कीदृशे भगवति ईश्वरे सर्वनियंतरि एवमपि च ब्रह्मणि अप्रच्युतपूर्णतत्वे॥३२॥ ननु संसारहे तोः कर्मणः कथं तापत्रयनिवर्त्तकत्वं सामग्रीभेदेन घटत इति सदृष्टांतमाह द्वाभ्यां॥ य आमयो रोगः येन घृतादिना जायते॥ तदेव के वलमामयकारणभूतं द्रव्यं तमामयं न पुनाति न निवर्त्तयतीत्यर्थः किंतु चिकित्सितं द्रव्यांतरैर्भावितं सत्पुनात्येव यथा॥३३॥ तथा

एतत्संसूचितं ब्रह्मंस्तापत्रयचिकित्सितं॥ यदीश्वरे भगवति कर्म ब्रह्मणि भावितं॥३२॥ आमयो येन भूतानां जायते यश्च सुव्रत॥ तदेव ह्यामयं द्रव्यं न पुनाति चिकित्सितं॥३३॥ एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः॥ त एवात्मविनाशाय कल्पंते कल्पिताः परे॥३४॥ ॥ ॥६॥

आत्मविनाशाय कर्मनिवृत्तये कल्पंते समर्था भवंति परे ईश्वरे कल्पिताः संतः॥ अत्र च प्रथमं महत्सेवा ततस्तत्कृपा ततस्तद्धर्मश्रद्धा ततो भगवत्कथाश्रवणं ततो भगवति रतिः॥ तया च देहद्वयाविवेकात्मज्ञानं ततो दृढा भक्तिः ततो भगवत्तत्वज्ञानं ततस्तत्कृपया सर्वज्ञत्वादिभगवद्गुणाविर्भाव इति क्रमो दर्शितः॥३५॥

ननु च ज्ञानेन अज्ञानमात्रकर्मनाशः ॥ न च ज्ञानं भक्तियोगाद्भवति कथं कर्मणा कर्मनाशः ॥ स्यात्तत्राह यदत्रेति ॥ २५ ॥ भगवदर्पणेन क्रियमा-
णं कर्म भक्तियोगं जनयतीति सदाचारेण दर्शयति यत्र यदा भगवतः ॥ शिक्षया कर्माणि कुर्वाणा भवंति ॥ तदा कृष्णस्य गुणनामानि गृणं-
ति अनुस्मरंति च कृष्णमित्यर्थः ॥ इयं भगवच्छिक्षा यत्करोषि यदश्नासि यज्जुहोसि ददासि यत् यत्तपस्यसि कौंतेय तत्कुरुष्व मदर्पणं

यदत्र क्रियते कर्म भगवत्परितोषणं ॥ ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितं ॥ २५ ॥ कुर्वाणा यत्र कर्मा-
णि भगवच्छिक्षयासकृत् ॥ गृणंति गुणनामानि कृष्णस्यानुस्मरंति च ॥ २६ ॥ नमो भगवते तुभ्यं वासु-
देवाय धीमहि ॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च ॥ २७ ॥ इति मूर्त्यभिधानेन मंत्रमूर्तिममू-
र्तिकं ॥ यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान् ॥ २८ ॥ ॥ ७

मिति ॥ २६ ॥ कीर्तनस्मरणरूपभक्तिहेतुत्वमुक्तं ॥ ज्ञानहेतुत्वमाह द्वाभ्यां नम इति ॥ नमो धीमहि मनसा नमनं कुर्वीमहि ॥ २७ ॥ अमूर्तिं मूर्त्ति-
यजते पूजयति स पुमान् सम्यग्दर्शनो भवति ॥ २८ ॥ ॥ २९ ॥ ॥ ॥

एवं चकृतवतिमपि हरिः स्वसदृशं ज्ञानादिकं दत्तवान् इत्याह इदं मे स्वनिगमं स्वोपदेशं मया तुष्टेन ॥ अवेत्य ज्ञात्वा भावं प्रीति ॥ ३९ ॥ अनन्त्व
मप्येवं कुरु इत्याह त्वमिति ॥ अदभ्रं अनल्पं श्रुतं यस्य हे अदभ्रश्रुत विभो विश्रुतं यशः प्रख्याहि कथय येन विश्रुतेन बुद्धेन विदां विदुषां
बुभुत्सितं बोद्धुमिच्छा समाप्यते ॥ यतः दुःखैः पीडितानां क्लेशशांतिं प्रकारांतरेण न मन्यंते ॥ ४० ॥ इति प्रथमे पंचमः व्यासस्य प्रत्य पा

इदं मे स्वनिगमं ब्रह्मन् वेत्यमदत्तुष्टितं ॥ अदान्मे ज्ञानमैश्वर्यं स्वस्मिन्भावं च केशवः ॥ ३९ ॥ त्वमप्यदभ्रश्रुत
विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितं ॥ प्रख्याहि दुःखैर्मुहुरर्दितात्मनां संक्लेशनिर्वाणमुशंति ना
न्यथा ॥ ४० ॥ इति श्रीभा॰ म॰ पंचमोध्यायः ॥ ५ ॥ सूत उवाच ॥ एवं निशम्य भगवान्देवर्षेर्जन्म कर्म्म च ॥
भूयः प्रपच्छ तं ब्रह्मन्व्यासः सत्यवतीसुतः ॥ १ ॥ वेदव्या॰ ॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिस्तव ॥ व
र्तमानो वयस्याद्ये ततः किमकरोद्भवान् ॥ २ ॥

र्येव षष्ठे नारदजन्मसंभवं ॥ स्वभाग्यं नारदः प्राह कृष्णसंकथनोद्भवं ॥ १ ॥
स्वयमपि तथा चिकीर्षुर्गुरूपदेशानंतरंभाविनश्चरितं पृच्छति ॥ १ ॥ भिक्षुभिर्विप्रवसिते दूरं गते सति विज्ञानस्यादेष्टृभिः ॥ २ ॥ ॥

ना॰प्र॰
॥३१॥

परं वय उत्तरमाहुः नेत्वया कथं वर्त्तितं नीतं ॥ इदमिति दासीपुत्रमृतं कलेवरं उदस्राक्षीः उत्सृष्टवानसि ॥३॥ एषकस्यां तलक्षणः नेत्स्मृतिं ॥ कथं न व्यवधानं तत्स्वं दृष्टिनवान् ॥ अज्ञागमामावस्वार्थः ॥ हियतः एष समर्वस्यनिराकृतिरपलापोयस्मात्सः ॥४॥ अकार्षं कृतवानहं हेरेकप

स्वायंभुव कयाद्वृत्त्या वर्त्तितं तेपरं वयः ॥ कथं चेदमुदस्राक्षीः काले प्राप्ते कलेवरं ॥३॥ प्राक्कल्पविषयामेतां स्मृतिं ते मुनिसत्तम ॥ न ह्येष व्यवधात्काल एष सर्वनिराकृतिः ॥४॥ श्रीनारद उवाच ॥ भिक्षुभिर्विप्रवसिते विज्ञानादेष्टृभिर्मम वर्त्तमानो वयस्याद्य एतदकारषं ॥५॥ एकात्मजा मे जननी योषिन्मूढा च किंकरी ॥ मय्यात्मजेनन्यगतौ चक्रे स्नेहानुबंधनं ॥६॥ ॥

कारयोर्विश्लेषः छंदोनुरोधेन ॥५॥ तत्र तावत्कं यं चिकालं तत्रैव मातुः स्नेह यीत्रतोम्यवसमित्याह त्रिभिः एक एवाहमात्मजो यस्याः सा ये षिन्मूढेति च स्नेहानुबंधं हेतुः ॥६॥ ॥ ७ ॥ ॥ ॥

राम
॥३१॥

किं करीत्यस्यार्थं प्रपंचयति॥ अस्वतंत्रासा अतो नकल्पा नसमर्था आसीत्॥ दारुमयीषित्यतिपारवदृश्ये दृष्टांतः॥७॥ न देवं साल्ले हं चक्रे अ
हं च दिग्दिगदिषनभिज्ञः अत स्तत्रैवन्यवसमित्याह॥ अहं च तस्मिन्ब्रह्मकुले तस्याः मातुः स्नेहानुबंधस्यावेक्षयाक दाविरमोदिति प्रतीक्ष्येत्य

सास्वतंत्रानकल्पासीद्योगक्षेमंममेच्छती॥ ईशस्यहिवशेलोकोयोषादारुमयीयथा॥७॥ अहंचतद्ब्र
ह्मकुलेऊषिवांस्तदपेक्षया॥ दिग्देशकालाव्युत्पन्नोबालकःपंचहायनः॥८॥ एकदानिर्गतांगेहा
दुहंतींनिशिगांपथिसर्पोदशत्पदास्पृष्टःकृपणांकालचोदितः॥९॥ तदाहमतदहमीशस्यभक्ता
नांशमभीप्सतः॥ अनुग्रहंमन्यमानःप्रातिष्टंदिशमुत्तरां॥१०॥ ॥ ॥७॥ ॥७॥

थे॥ उषिवान्वाहं स्तत्र वान्पंचहायनः पंचवर्षकः॥८॥ गेहान्निर्गतांगां दुहंतीहेतोः शतप्रत्ययः दोग्धुं निर्गतामित्यर्थः पदा पादेनआ
स्पृष्टः॥ ईषदाक्रांतः अदशत्॥ अखादत्॥ ९॥ तन्मातुर्मरणं संकल्पांशंअभीप्सतईशस्यानुग्रहंमन्यमानः प्रातिष्टं प्रस्थितोस्मि॥१०॥

भा॰प्र॰
॥३२॥

स्फीतान्जनपदादीनतियातः सन्महद्विपिनमद्राक्षमिति वक्तुर्थेनान्वयः जनपदादिषु नानागुणदोषयुक्तेषु समदृष्टिः सन्गतोऽहमिति तात्पर्यार्थः स्फीतान्समृद्धान्जनपदान्देशान् ॥ तत्र तस्यां दिशि पुरग्रामव्रजाकरान् तत्र पुराणि राजधान्यः ग्रामाः स्मृगु प्रोक्ताः । विप्राश्च विश्वस्था श्चयत्र चैवश्वसंगिते ॥ सतु ग्राम इति प्रोक्तः ॥ शूद्राणां वासएव चेति ॥ व्रजा गोकुलानि ॥ आकराः रत्नाद्युत्पत्तिस्थानानि तान् खेटाः कर्षकग्रा

स्फीतान्जनपदांस्तत्र पुरग्रामव्रजाकरान् ॥ खेटखर्बटवाटीश्च वनान्युपवनानि च ॥११॥ चित्रधातु विचित्राद्रीनिम्नगा भुग्नद्रुमान् ॥ जलाशयान्शिवजलानलिनीः सुरसेविताः ॥१२॥ ॥ ७

माः खर्बटा गिरितटग्रामाः स्मृगु प्रोक्ता वा ॥ एकतो यत्र तु ग्रामो नगरं चैकतः स्थितं ॥ मिश्रं तु खर्बटं नाम नदीगिरिसमाश्रयमिति वाद्युः दश द्रुमपुष्पवाटिकाल्लाः वनानिस्वतः सिद्धवृक्षाणां समूहाः तानि च ॥११॥ चित्रैर्धातुभिः स्वर्णरजताद्यैः विचित्रान्नदीश्च इमैर्भग्ना भुग्नाः शा खा येषां ते द्रुमा येषु तान् ॥ शिवानि भद्राणि जलानि येषां तान्नलिनीः सरसीः ॥१२॥

राम
॥३२॥

चित्राः स्वना येषां तैः पत्ररथैः पक्षिभिः सन्नादमवुद्धैरित्यर्थः विभ्रमद्भिर्भ्रमरैः श्रीः शोभा यासां ताः ॥ नलिनीः अतियातः अतिक्रम्य गजः सन्‌महद्विपिनं वनमद्राक्षं ॥१३॥ कीदृशं नलवेणुशराणां स्तंवैः कुशैः कीचकैश्च गह्वरं दुर्गमं नलवेणुजातय एव विपुलां नरालगर्भाः कीचका इति घोरं दुःसहं प्रतिभयाकारं भयंकररूपं व्यालादीनामजिरं क्रीडास्थानं ॥१४॥ परिश्रांतानि इंद्रियाणि आत्मा देहश्च यस्य तृषा

चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः ॥ नलवेणुशरस्तंवकुशकीचकगह्वरं ॥१३॥ एक एवातियातोहमद्राक्षं विपिनं महत् ॥ घोरं प्रतिभयाकारं व्यालोलूकशिवाजिरं ॥१४॥ परिश्रांतेंद्रियात्माहं तृट्परीतो वुभुक्षितः ॥ स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः ॥१५॥ तस्मिन्निर्मनुजेरण्ये पिप्पलोपस्थ आश्रितः ॥ आत्मनात्मानमात्मस्थं यथाश्रुतमचिंतयम् ॥१६॥ ॥१६॥ ॥ छ छ

परीतो व्याप्तः उपस्पृष्टः आचांतः ॥१५॥ पिप्पलोपस्थे अश्वत्थमूले आश्रितः उपविष्टः आत्मना वुध्या आत्मस्थं हृदिस्थं आत्मानं परमात्मानम् ॥१६॥ ॥ छ छ ॥

भा॰ प्र॰ ॥३३॥

भावेन भक्त्या निर्जितं वशीकृतं यच्चेतः ॥ तेन औत्कंठ्येनाश्रुकलायुक्ते अक्षिणी यस्य ॥ १७ ॥ प्रेमातिभरेण निर्भिन्नपुलकान्यंगानि यस्य आनंद एव संप्लवे महापूरे परमानंदे ॥ उभयं ॥ आत्मानं परं च ॥ १८ ॥ मनसः कांतं मनोमीष्टं शुचा शोकः तमपहंतीति तथा तत् ॥ उत्तस्थे उत्थितोस्मि ॥ १९

ध्यायतश्चरणांभोजं भावनिर्जितचेतसा ॥ औत्कंठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः ॥ १७ ॥ प्रेमातिभरनिर्भिन्नपुलकांगोतिनिर्वृतः ॥ आनंदसंप्लवे लीनो नापश्यमुभयं मुने ॥ १८ ॥ रूपं भगवतो यत्तन्मनःकांतं शुचापहं ॥ अपश्यन्सहसोत्तस्थे वैक्लव्याद्दुर्मना इव ॥ १९ ॥ दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि ॥ वीक्षमाणोपि नापश्यमवितृप्त इवातुरः ॥ २० ॥ एवं यतंतं विजने मामाहागोचरो गिरां ॥ गंभीरश्लक्ष्णया वाचा शुचः प्रशमयन्निव ॥ २१ ॥

हृदि मलः ॥ प्रणिधाय स्थिरीकृत्य अवितृप्तोहमातुर इव अभवमिति शेषः ॥ २० ॥ गिरामगोचरः संवेदनस्याविषयभूतः ईश्वरः ॥ २१ ॥ ॥ ॥ श्रीगोविंदायनमः ॥ ॥ ॥

राम ॥३३॥

हंतेति सानुकंपसंबोधने ॥ माऽहमिमां द्रष्टुं नार्हति ॥ यतः न पक्वा दग्धाः कषाया मलाः कामादयो येषां तेषां कुयोगिनां ॥ अनिष्पन्नयोगानां
॥२२॥ कुतस्तर्हि दृष्टोसि तत्राह सकृदिति ॥ सकृद्दर्शितं मयेति पदेन तत्कामाय मय्यनुरागाय त्वत्कामेन किमित्यत आह मत्कामः पुमान्

हंतास्मिन्जन्मनि भवान्मा मां द्रष्टुमिहार्हति ॥ अविपक्वकषायाणां दुर्दर्शोहं कुयोगिनां ॥२२॥ सकृद्यद्दर्शि-
तं रूपमेतत्कामाय तेनघ ॥ मत्कामः शनकैः साधुः सर्वान्मुंचति हृच्छयान् ॥२३॥ सत्सेवयादीर्घयाते
जाता मयि दृढा मतिः ॥ हित्वावद्यमिमं लोकं गंतामसि ॥२४॥ मतिर्मयि निबद्धेयं न विपद्येत कर्हिचित्
प्रजासर्गनिरोधेपि स्मृतिश्च मदनुग्रहात् ॥२५॥ ॥ ७ ॥ ७ ॥ ७

मज्जनता २

हृच्छयान्कामान् ॥२३॥ अदीर्घयापि सतां सेवया अवद्यं निंद्यं लोकं देहं मज्जनतां मत्पार्षदतां गंतासि ॥२४॥ प्रजानां सर्गे सृष्टौ निरोधे सं-
हारेपि प्रजासर्गस्य निरोधे इति वा ॥२५॥ ॥ ७ ॥ ७ ॥ ७ ॥ ॥

भा॰प्र
॥३४॥

तत्प्रसिद्धं महद्भूतं अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादि श्रुतेः ॥ कीदृशमीश्वरं सर्वनियंतृत्वं न भवति लिंगं मूर्त्तिर्यस्य तं न लभो लिं
गं संनिहितमपि न लिंग्यत इति अलिंगं तस्मै अदृष्टाय अवनामं विदधे कृतवानहं तेनानुकंपितः सन् ॥२६॥ हतत्रपः सकलज्ञः ॥ विमत्स
रो जातोऽस्मीति शेषः ॥२७॥ कालेऽवसरे कालः मृत्युः प्रादुरभूत आविर्बभूव ॥ अकस्मात्प्रादुर्भावे दृष्टांतः ॥ विद्युदिवानि सौदामि

एतावदुक्त्वोपररामतन्महत्तत्त्वं नमो लिंगमलिंगमीश्वरं ॥ अहं च तस्मै महतां महीयसे शीर्ष्णावनामं विदधेनु
कंपितः ॥२६॥ नामान्यनंतस्य हतत्रपः पठन्गुह्यानि भद्राणि कृतानि च स्मरन् ॥ गां पर्यटंस्तुष्टमना गत
स्पृहः ॥ कालं प्रतीक्षन्विमदो विमत्सरः ॥२७॥ एवं कृष्णमतेर्ब्रह्मन्नसक्तस्यामलात्मनः ॥ कालः प्रादु
रभूत्काले तडित्सौदामिनी यथा ॥२८॥

नीतिविशेषणं स्फुटं तत्प्रदर्शनार्थं सुदाममालात्र भवा सौदामिनी मलाकारेत्यर्थः यद्वा सुदामा पर्वतः ॥ तेनैकदिगिति स्वेन स्फ
टिकादिमपर्वतप्रांतेन बहिर्विद्युदिति स्फुटा नवनीत द्युतिरित्यर्थः ॥ यद्वा तडिदिति अंतिकवस्येत्यर्थः ॥ यद्वा तडिदिति अंतिकुइ इत्यर्थः तडिदंति
कवाधयोरिति निरुक्तस्मरणात् ॥२८॥

राम
॥३४॥

प्रयुज्यमान इति अयमर्थः॥ हित्वावद्यमिमं लोकं गन्तामज्जननामसीति या भगवती भगवत्पार्षदरूपा शुद्धा सत्त्वमयी तनुः प्रतिश्रुता
तां प्रति भगवता मयि प्रयुज्यमाने नीयमाने॥ आरब्धं यत्कर्म तन्निर्वाणं समाप्तं यस्य आरब्धकर्मणो निर्वाणमेव निर्वाणं यस्येति वा
सः पंचभूतात्मको देहो न्यपतत्॥ अनेन पार्षदतनूनामकर्मारब्धत्वं शुद्धत्वं नित्यत्वमित्यादि सूचितं भवति॥२८॥ इदं त्रैलोक्यमा
दाय उपसंहृत्य उदन्वतः॥ एकार्णवस्याम्भसि शयाने श्रीनारायणे शिशयिषोः शयनं कर्तुमिच्छोर्ब्रह्मणः अंतर्मध्ये॥ अनुप्राणं

प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम्॥ आरब्धकर्मनिर्वाणो न्यपतत्पांचभौतिकः॥२८॥ कल्पांत
इदमादाय शयानेऽम्भस्युदन्वतः॥ शिशयिषोरनुप्राणं विविशेऽन्तरहं विभोः॥३०॥ सहस्रयुगपर्यंते उ
त्थायेदं सिसृक्षतः॥ मरीचिमिश्रा ऋषयः प्राणेभ्योऽहं च जज्ञिरे॥३१॥ ॥ ॥ छ

निश्वासेन सह विविशे प्रविष्टोऽहं ततो वर्तीय विश्वात्मा देहमाविश्य चक्रिणः अवाप्य वैष्णवीं निद्रां मे की भृत्यायविस्मिते ऽनि कूर्मो क्रे: स्वाय
नेऽभसीति पाठे स्वापने स्वस्य अयनं अम्भसि शिशयिषो ब्रह्मण इति श्रीनारायणेनाभेदविवक्षयोक्तिरिति गमयितव्यं॥३०॥ प्राणेभ्यः
इंद्रियेभ्यः अहं मरीचिमिश्राः तन्मुखाः ऋषयश्च जज्ञिरे॥३१॥

ये कर्मिणस्ते बहिर्न यांति तपआदिभिर्ब्रह्मलोकं गतास्तेंतर्न यांति॥ अहंतु महाविष्णोरनुग्रहादखंडितब्रह्मचर्यव्रतः सन्नंतर्बहिश्च पर्येमि पर्यटामि क्वचिदपि अविघाता अप्रतिहता गतिर्यस्य सः॥३२॥ किमिति पर्यटसि ईश्वराज्ञया लोकमंगलार्थमित्याह चतुर्भिः देवेन ईश्वरेण दत्तां स्वराः निषादर्षभगांधारषड्जमध्यमधैवतपंचमा इति सप्त त एव ब्रह्म व्रह्माभिव्यंजकत्वात्॥ तैर्विभूषितां तन्नः।

अंतर्बहिश्च लोकांस्त्रीन् पर्येम्यस्कंदितव्रतः॥ अनुग्रहान्महाविष्णोरविघातगतिः क्वचित्॥३२॥ देवदत्तामिमां वीणां स्वरब्रह्मविभूषितां॥ मूर्छयित्वा हरिकथां गायमानश्चराम्यहं॥३३॥ प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः॥ आहूत इव मे शीघ्रं दर्शनं याति चेतसि॥३४॥ एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः॥ भवसिंधुप्लवो दृष्टो हरिचर्यानुवर्णनं॥३५॥ ॥ ॥

सि स्फुटस्वराभित्यर्थः मूर्छनालापवतीं कृत्वा॥३३॥ स्वप्रयोजनमाह॥ एतद्धि मात्रा विषयास्तेषां स्पर्शा भोगास्तेषामिच्छया आतुराणि चित्तानि॥ येषां तेषां हरिचर्यानुवर्णनं॥ यत्प्रोतत्त्वं भवसिंधोः प्लवः पोतः न केवलं श्रुतिप्रमाणो न किं त्वन्वयव्यतिरेकाभ्यां दृष्ट एवेत्यर्थः॥३५॥

एतदेवस्फुटमवधारणमनुभवेन दृढयति यमादिभिः तथा न शाम्यति ॥ यद्वन्मुकुंदसेवया ॥ अद्धा साक्षादात्मा मनः शाम्यति कथंचिन्मुकुं-
दसेवामात्रेण शाम्यति किं पुनस्तद्गुणवर्णनेनेति भावः ॥ ३६ ॥ भवतो मनः परितोषणं चाख्यातं ॥ ३७ ॥ आमंत्र्यानुज्ञाप्य यादृच्छिकः स्वैरं योज-

यमादिभिर्योगपथैः कामलोभहतो मुहुः ॥ मुकुंदसेवया यद्वत्तथात्माद्धा न शाम्यति ॥ ३६ ॥ सर्वं तदि-
दमाख्यातं यत्पृष्टोहं त्वयानघ ॥ जन्मकर्मरहस्यं मे भवतश्चात्मतोषणं ॥ ३७ ॥ सूत उवाच ॥ एवं
संभाष्य भगवान्नारदो वासवीसुतं ॥ आमंत्र्य वीणां रणयन्ययौ यादृच्छिको मुनिः ॥ ३८ ॥ अहो देव-
र्षिर्धन्योयं यत्कीर्तिं शार्ङ्गधन्वनः ॥ गायन्माद्यन्निदं तंत्र्या रमयत्यातुरं जगत् ॥ ३९ ॥ इति प्रथमे
षष्ठः ॥ ६ ॥ शौनक उवाच ॥ निर्गते नारदे सूत भगवान्बादरायणः ॥ श्रुतवांस्तदभिप्रेतं ततः किमक-
रोद्विभुः ॥ १ ॥

न संकल्पशस्तः ॥ ३८ ॥ हरिकथागायकमार्गं प्रश्लाघ्यते अहो इति माद्यन् हृष्यन् तंत्र्या वीणया ॥ ३९ ॥ प्रथमे ष-
ष्ठः ॥ ६ ॥ अथ भागवतश्रोतुर्जन्म वक्तुं परीक्षितः सुतबालवधाद्द्रौणेर्दंडः सप्तम उच्यते ॥ १ ॥ तस्य नारदस्याभिप्रेतं श्रुतवानसन् ॥ १ ॥

भा॰ प्र॰
॥ २६ ॥

ब्रह्मनद्यांब्रह्मदैवत्यायांब्राह्मणैरन्वितायांवासत्रंकर्मवर्द्धयतीतितथा॥२॥बदरीणांखंडेनसमूहेनमंडितेमनःप्रणिदध्यौस्थिरीचकार समाधिनानुस्मरेतिनारदोपदिष्टध्यानंकृतवानित्यर्थः॥३॥प्रणिहितेनिश्चलेअत्रहेतुःभक्तियोगेनामलेपूर्वंप्रथमंपुरुषमीश्वरमपश्य त्पूर्णमितिवापाठः॥तदपाश्रयांईश्वराश्रयांतदधीनांमायांचापश्यत्॥४॥ईशमायाकृतांचजीवानांसंसृतिमपश्यदित्याहययासंमो

सूतउवाच॥ब्रह्मनद्यांसरस्वत्यामाश्रमःपश्चिमेतटे॥शम्याप्रासइतिप्रोक्तऋषीणांसत्रवर्द्धनः॥२॥तस्मि न्स्वआश्रमेव्यासोबदरीखंडमंडिते॥आसीनोपउपस्पृश्यप्रणिदध्यौमनःस्वयम्॥३॥भक्तियोगे नमनसिसम्यक्प्रणिहितेमले॥अपश्यत्पुरुषंपूर्वंमायांचतदपाश्रयां॥४॥ययासंमोहितोजीव आत्मानंत्रिगुणात्मकं॥परोपिमनुतेनर्थंतत्कृतंचाभिपद्यते॥५॥ ॥ ॥ ॥

हितःस्वरूपावरणेनविक्षिप्तः॥परोपिगुणत्रयाद्व्यतिरिक्तोपितत्कृतंगुणत्रयाभिमानकृतमनर्थंचकर्तृत्वादिकंप्राप्नोति॥५॥

राम
॥ २६ ॥

अनर्थमुपशमयति ॥ योधोक्षजे साक्षाद्भक्तियोगः तं चापश्यत् ॥ एतत्सर्वं स्वयं दृष्ट्वा एवमजानतो लोकस्यार्थे सात्वतसंहितां श्रीभागवता-
ख्यां चक्रे तदनेन श्लोकत्रयेण भागवतार्थः संक्षेपतो दर्शितः ॥ एतदुक्तं भवति विद्याशक्त्या मायानियंता नित्याविर्भूतपरमानंदस्वरू-
पः । सर्वज्ञः सर्वशक्तिरीश्वरः ॥ तन्मायया संमोहितस्तिरोभूतस्वरूपस्तद्विपरीतधर्मा जीवः तस्य चेश्वरस्य भक्त्या लब्धतत्त्वज्ञानेन

अनर्थोपशमं साक्षाद्भक्तियोगमधोक्षजे ॥ लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिता ॥ ६ ॥ यस्यां वै
श्रूयमाणायां कृष्णे परमपूरुषे ॥ भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा ॥ ७ ॥ ॥ छ

मोक्ष इति ॥ तदुक्तं विष्णुस्वामिना ह्लादिन्या संविदाश्लिष्टः । सच्चिदानंद ईश्वरः । स्वाविद्यासंवृतो जीवः । संक्लेशनिकराकरः तथा स ईशो
मायासजीवो यस्तयाहितः । स्वाविर्भूतपरानंदः स्वाविर्भूतसुदुःखभूः स्वादृगुत्थविपर्यासभवभेदजभीशुचः यन्मायया जुषन्ना-
स्ते तमिमं नृहरिं नुम इत्यादि ॥ ६ ॥ संहितायां अनर्थोपशमकत्वं दर्शयति यस्यां श्रूयमाणायामेव किं पुनः श्रुतायामित्यर्थः ॥

अनुक्रम्य शोधयित्वा ॥८॥ कस्य वा हेतोर्महतीं वितततां ॥९॥ निर्ग्रंथाः ग्रंथेभ्यो निर्गताः तदुक्तं गीतासु ॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्य
ति ॥ तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेति ॥ यद्वा ग्रंथिरेव ग्रंथः निर्वृत्तहृदग्रंथय इत्यर्थः नन्मुक्तानां किं भक्त्येत्यादि सर्वाक्षेप
परिहारार्थमाह इत्थंभूतगुण इति ॥१०॥ भक्तिं कुर्वंतु नाम एतच्छास्त्राभ्यासे शुकस्य किं कारणमित्यत आह हरेरिति ॥ अध्यगात् ॥ अ

ससंहितांभागवतींकृत्वानुक्रम्यचात्मजं ॥ शुकमध्यापयामासनिवृत्तिनिरतंमुनिः ८ ॥ शौनकउवा
च ॥ सवैनिवृत्तिनिरतःसर्वत्रोपेक्षकोमुनिः ॥ कस्यवामहतीमेतामात्मारामःसमभ्यसत् ९ ॥ सूतउ
वाच ॥ आत्मारामाश्चमुनयोनिर्ग्रंथाअप्युरुक्रमे ॥ कुर्वंत्यहेतुकींभक्तिमित्थंभूतगुणोहरिः ॥१०॥ ह
रेर्गुणाक्षिप्तमतिर्भगवान्बादरायणिः ॥ अध्यगान्महदाख्यानंनित्यंविष्णुजनप्रियः ॥११॥ ॥ छ

धीतवान् ॥ विष्णुजनाः प्रिया यस्येति व्याख्यानादिप्रसंगेन तत्संगतिकाम इति भावः ॥ एतेन तस्य पुत्रो महायोगीत्यादिना शुकस्य व्याख्या
नेप्रवृत्तिः कथमिति यत्पृष्टं तस्योत्तरमुक्तं ॥१२॥ ॥

यद्म तस्यं परीक्षितः प्रायोपवेशनश्रवणं कथमिति तस्य जन्म महाश्चर्यमित्यादिना तस्योत्तरं वक्तुमाह परीक्षित इति विलापनं मुक्तिं
मंस्तुरा संस्थां महाप्रस्थानं श्रीकृष्णकथानामुदयो यामवतितया ॥१२॥ परीक्षितो जन्मनि रूपयिष्यन् आदौ तावद्भग्नस्य एवा
श्वत्थाम्नो ब्रह्मास्त्रात् त्रातः कृष्णेन रक्षित इति वक्तुं कथां प्रस्तौति यदेत्यादिना यदा द्रौणिरश्वत्थामा हृत्वा सुप्तानां द्रौपदीपुत्राणां शिरांसि
उपाहरत् ॥ तदा तन्माता अरुदत् ॥ तां च सान्त्वयन् किरीटमाली अर्जुन आहेति तत्तीयेनान्वयः ॥ किमिति बालानां शिरांस्यानीतवान्

परीक्षितोऽथ राजर्षेर्जन्मकर्मविलापनं ॥ संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयम् ॥१२॥
यदा मृधे कौरवसंजयानां वीरेष्वथो वीरगतिं गतेषु ॥ वृकोदराविद्धगदाभिमर्शभग्नोरुदंडे धृतराष्ट्रपुत्रे ॥१३॥

त्वपेक्षायामाह ॥ मृधे युद्धे यद्यपि पांडवा अपि कौरवा एव तथापि संजयवंशजो धृष्टद्युम्नः पांडवानां सेनापतिरिति
संजयानामित्युक्तं ॥ वीरगतिः स्वर्गं ॥ अथो अनंतरं वृकोदरेणाविद्धायाः क्षिप्तायाः गदायाः अभिमर्शेन घातेन भग्नावूरुदंडौ यस्य त
स्मिन् धृतराष्ट्रपुत्रे दुर्योधने सति ॥१३॥ ॥ ॥१३॥

भा॰प॰
॥३८॥

भर्त्तुर्दुर्योधनस्यस्मेनिविमक्ते इति एवं प्रियं साद्विनिपत्यत ॥ तस्यतद्धि प्रियमेवेति वाक्यांतरं ॥ विप्रियत्वे हेतुः जुगुप्सितमिति ॥१४
घोरं दुःसहं यया भवति ॥ बाष्पकलाभिर्बिंदुभिराकुले अक्षिणी यस्याः ताः किरीटस्यैकत्वेपितत्स्थाणां बहुत्वात्किरीटमालीत्युक्तम्
१५ ॥ सुतः शोकाग्निपाग्न जामिमार्जयामयत्नप्रदात्रह्मवंधोर्ब्राह्मणाधमस्य आततायिन इति ॥ अग्निदोगरदश्चैव शस्त्रपाणिर्ध

निधनेस्मुतानां

भर्त्तुः प्रियं द्रौणिरितिस्मपश्यन्कृष्णासुतानांस्वपतां शिरांसि ॥ उपाहरद्विप्रियमेव तस्य तत्तज्जुगुप्सि
तं कर्मविगर्हयंति ॥१४॥ माता शिशूनां निशम्य घोरं परितप्यमाना ॥ तदारुदद्बाष्पकलाकुलाक्षीतां
सांत्वयन्नाह किरीटमाली ॥१५॥ तदाश्रुवस्त्रेमप्रमृजामि भद्रेयद्ब्रह्मबंधोः शिरआततायिनः गांडीव
मुक्तैर्विशिखैरुपाहरे त्वाक्रम्ययत्सीस्यसिदग्धपुत्रा ॥१६॥ ॥

नापहः क्षेत्रदारहरश्चैवषडेते ह्याततायिनः इति स्मरणात् ॥ अत्राततायी शस्त्रपाणितेन च पुत्रहंतत्वं लक्ष्यते ॥ गांडीवाद्धनुषोमुक्तै
विशिखैर्बाणैरुपाहरे त्वत्समीपमानयामियच्छिरआक्रम्य आसनं विधाय दग्धपुत्रा सती ॥१६॥ ॥

राम
॥३८॥

वलाषो रम्या विविचित्रा जल्पाः भाषणानि तैः । स अर्ज्जुनः अच्युत एव मित्रं तस्य श्वपस्य दर्शितः ॥ वद्धकृवचः उग्रं धनुश्चार्यं यस्य सः कपिर्हनु
मान् ध्वजे यस्य सः गुरोः पुत्रं रथेन अन्वा इवत अन्वधावत ॥१७॥ आपतंतं ॥ आधावंतं ॥ स द्रौणिः कुमारहा बालघाती उद्विग्नमनाः कं
पितहृदयः प्राणपरीप्सुः प्राणानलब्धुमिच्छुः । न तु कीर्त्तिं यावद्भूमं यावद्रूं तुशकं भावदुर्व्यापादव वलायत कः ॥ वह्नामग्रो मत्वा सुनां गं
तुमुद्यतः सन् रुद्रस्य नयाद्यथा पलायते स्म ॥ अर्कोद्द इति पाठे वामनपुराणकथा स्मर्तव्या ॥ तथाहि विद्युन्माली नाम कश्चिद्राक्षसो माहे

इति प्रियां वल्गु विचित्रजल्पैः स सांत्वयित्वाच्युतमित्रसूतः ॥ अन्वाद्रवद्दंशितउग्रधन्वा कपिध्वजो
गुरुपुत्रं रथेन ॥१७॥ तमापतंतं स विलस्य दूरात् कुमारहोद्विग्नमना रथेन ॥ पराद्रवत्प्राणपरी
प्सुरुर्व्यां यावद्गमं रुद्रभयाद्यथार्कः ॥१८॥ ॥ छ छ

श्वरः । तस्मै रुद्रेण सौवर्णविमानं दत्तं ततो सावर्कस्य पृष्ठतो भ्राम्यन् विमानदीप्त्या रात्रिं विलोपितवान् ततोर्केण निजतेजोभिर्द्रावयि
त्वा तद्विमानं पातितं ततः क्रुद्धः कुपितो रुद्रे सन्निभघातकेः । पर्यद्रवत्ततो रुद्रस्य क्रूरदृष्ट्या दंदह्यमानो पततत्वाराणस्यां यतितो लोलार्क
नाम्ना विख्यातो जातः ॥१८॥ ॥ छ

भा॰ प्र॰
॥३६॥

अशरणं रक्षकरहितं ॥ ननु पलायनमेव रक्षकमस्ति ॥ न तस्यापि कुंठितत्वादित्याह श्रांतवाजिनो यस्य तं ब्रह्मास्त्रं द्विजात्मज इत्यस्य दीर्घदर्शिनामाह ॥१९॥ न द्रह्मास्त्रं द्विजात्मज इत्यस्य दीर्घदर्शिनामाह ॥२४॥ न ब्रह्मास्त्रसमाहितः कृतध्यानः। उपसंहारमजानतोऽपि संधा

यदाशरणमात्मानमैक्षत श्रांतवाजिनं ॥ अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः ॥ अथोपस्पृश्य सलिलं संदधे तत्समाहितः ॥ अजानन्नपि संहारं प्राणकृच्छ्र उपस्थिते ॥२०॥ ततः प्रादुःकृतं तेजः प्रचंडं सर्वतो दिशं ॥ प्राणापदमभिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥२१॥ अर्जुन॰ ॥ कृष्ण कृष्ण महाबाहो भक्तानामभयंकर ॥ त्वमेको दह्यमानानामपवर्गोऽसि संसृतेः ॥२२॥ ॥ छ ॥

ने हेतुः प्राणकृच्छ्र इति ॥२०॥ ततः अस्मात्सर्वतो दिशं प्रादुःकृतं प्रकटीभूतं तेजोऽभिप्रेक्ष्य ततः प्राणापदं चाभिप्रेक्ष्य ॥२१॥ प्रसक्तं विघ्नापयितुं प्रथमं स्तौति कृष्णेति चतुर्भिः संसृतेर्हेतोर्दह्यमानानां त्वम् अपवर्गोऽपवर्जयिता नाशक इत्यर्थः ॥२२॥ ॥ छ

राम
॥३६॥

यतस्त्वमीश्वरः साक्षीनकुतः यतः प्रकृतेः परः पुरुषः नकुतः यतआद्यः कारणं कारणत्वेप्यविकारितामाह मायांव्युदस्य अभिभूय के
वल्यरूपे आत्मन्येव स्थितइति ॥ २३ ॥ त्रिवर्गदातायित्वमेवेत्याह सइति यस्त्वं मायामभिभूय स्थितः सएव मायाभिभूतस्सजनस्य धर्मा

त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः ॥ मायांव्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि ॥ २३ ॥ स
एव जीवलोकस्य मायामोहितचेतसः ॥ विधत्से स्वेन वीर्येण श्रेयोधर्मादिलक्षणं ॥ २४ ॥ तथायं
चावतारस्ते भुवोभारजिहीर्षया ॥ स्वानांचानन्यभावानामनुध्यानायचासकृत् ॥ २५ ॥ ॥

दिफलमुपासितः सन्विधत्से वीर्येण प्रभावेन ॥ २४ ॥ तथाचानेनावतारेणतवसाधुपक्षपातोलक्ष्यतइत्याह ॥ तथेति किं ॥ भूभार
हरणं मदिच्छामात्रेणनभवति तत्राह ॥ स्वानां ज्ञातीनामनुध्यानाय चतथानन्यभावानां एकांतभक्तानांच ॥ २५ ॥ ॥

एवं स्तुत्वा प्रस्तुतं विज्ञापयति किमात्मकमिदं कुतो वा यातीति स्वितत्त्वितर्के ॥ २६ ॥ इदं द्रोणापुत्रस्य ब्राह्ममस्त्रं तेन च प्राणबाधे प्राप्ते प्रदर्शितं केवलं न तु तत्प्रयोगे कुशल इत्यर्थः ॥ यतोसावुपसंहारं न वेद एनच्च स्त्वं तु वेत्स्य जानासि ॥ २७ ॥ प्रत्यवकर्षणं न्हस्तलक्षकरं निवर्त्तकमित्यर्थः

किमिदं क्व कुतो वेति देवदेव न वेद्म्यहं ॥ सर्वतोमुखमायाति तेजः परमदारुणं ॥ २६ ॥ श्रीभगवानुवाच ॥ वेत्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितं ॥ नैवासौ वेद संहारं प्राणबाध उपस्थिते ॥ न ह्यस्यान्यतमं किंचिदस्त्रं प्रत्यवकर्षणं ॥ जह्यस्त्रतेज उन्नद्धमस्त्रतेजसा ॥ २८ ॥ श्रुत्वा भगवता प्रोक्तं फाल्गुनः परवीरहा स्पृष्ट्वापरिक्रम्य ब्राह्मं ब्राह्माय संदधे ॥ २९ ॥ ॥ ७ ॥

अतः तदस्त्रतेजः ॥ उन्नद्धं उत्कटं ब्रह्मास्त्रतेजसैवाज्ञ हि घातय ॥ स्वप्रयुक्तं चास्त्रं न तु परं संहृत्य स्वयमुपशाम्येत ॥ यतस्त्वमस्त्रज्ञोसि ॥ ३ ॥ परे शत्रवस्त एव वीरास्तान् हंतीति तथा ॥ फाल्गुनोर्ज्जुनः ॥ अपः स्पृष्ट्वा आचम्य तं श्रीकृष्णं परिक्रम्य प्रदक्षिणीकृत्य ब्राह्माय ब्रह्मास्त्रं निवर्त्तयितुं ॥ २९ ॥ ॥

ततश्च उभयोर्व्रोह्लास्त्रयोस्तेजसी शरैः संहृते संवेष्टिते परस्परं मिलित्वा ववृधाते अवर्द्धेतां किंकृत्वा रोदसी द्यावापृथिव्यौ आवृत्य अंतरिक्षमावृ
त्य यथा प्रलये संकर्षणमुखाग्निः उपरिस्थितो र्कश्च संहृत्य वर्द्धेते तद्वत् ॥३०॥ तयोर्द्रौणिफाल्गुनयोः ॥ तेन दह्यमानाः सांवर्त्तकं प्रलया
ग्निममंसत मेनिरे ॥३१॥ लोकानां व्यतिकरं क्षयं स्वयं नाशमिच्छथ्थेः ॥ वासुदेवस्य मतं चालक्ष्य ब्रह्मास्त्रद्वयमुपसंहृतवान ॥३२॥ गौतम

संहत्यान्योन्यमुभयोस्तेजसी शरसंवृते ॥ आवृत्य रोदसी खं च ववृधाते र्कवह्निवत् ॥३०॥ दृष्ट्वास्त्रते
जस्तयोस्त्रीन्लोकान्प्रदहन्महत् ॥ दह्यमानाः प्रजाः सर्वाः सांवर्त्तकममंसत ॥३१॥ प्रजोपप्लवमा
लक्ष्य लोकव्यतिकरं च तम् ॥ मतं च वासुदेवस्य संजहारार्जुनो द्वयम् ॥३२॥ तत आसाद्य तरसा दारु
णं गौतमीसुतं ॥ बबंधामर्षताम्राक्षः पशुं रशनया यथा ॥३३॥ ॥ छ ॥ छ

वंशजा गौतमी कृपी तस्याः सुतं ॥ अमर्षेण कोपेन ताम्रे अक्षिणी नी यस्य सः । निःकृपत्वे दृष्टांतः पशुं यथेति तस्य बंधनं धर्मेऽदृष्ट
त्वात् दृष्टांतः यथा याज्ञिकः पशुमिति रशनया रज्ज्वा ॥३३॥ ॥ छ ॥ छ ॥

शोकरोषादियुक्तस्याप्यर्जुनस्य धर्मनिष्ठास्थापनाय श्रीकृष्णवाक्यं तदाह पंचभिः शिविरायेत्यादिभिः शिविराय नेतुमिच्छंतं प्रकुपित इवेति ||३४|| अनागसो निरपराधान् ||३५|| रिपोरपि सुप्तस्य बालस्य च वधो न धर्म इत्यस्यार्थे दर्शयति || मत्तं मद्यादिना प्रमत्तं अनवहितं उन्मत्तं ग्रहवातादिना जडं अनुद्यमं || प्रपन्नं शरणागतं विरथं भग्नरथं ||३६|| तद्वधो दंडरूपः तस्यैव श्रेयः पुरुषार्थः यद्यस्मात्तदंडभग्ना

शिविराय निनीषंतं रज्वा बध्वा रिपुं बलात् || प्राहार्जुनं प्रकुपितो भगवानंबुजेक्षणः ||३४|| मैनं पार्थार्हसि त्रातुं ब्रह्मबंधुमिमं जहि || योसावनागसः सुप्तानवधीन्निशि बालकान् ||३५|| मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडं || प्रपन्नं विरथं भीतं न रिपुं हंति धर्मवित् ||३६|| स्वप्राणान्यः परप्राणैः प्रपुष्णात्यघृणः खलः || तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ||३७|| प्रतिश्रुतं च भवता पांचाल्यै शृण्वतो मम || आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा ||३८||

यश्चित्ररहिता द्दोषात्स पुमान् || अधो याति नि || तथा च स्मरंती राजभिर्धृतदंडा स्तु कृतापापानि मानवाः || निःकृतकल्मषा यांति स्वर्गं सुकृतिनो यथेति ||३७|| ३८|| श्रीकृष्णेति जयती ||

३९ ॥ यद्यपि चोदितः तथापि हंतुं नेच्छत् ॥ आत्महननं पुत्रहंतारमपि यतो महान् ॥ ४० ॥ गोविंदः प्रियः सारथिर्यस्य सः आत्मजाननुशोचं
त्यै प्रियायै ॥ ४१ ॥ तथा परिभवेनाहूतमानी निजकर्मणा जुगुप्सितेन दोषेणावाङ्मुखं ॥ अपकृतं अपकारिणं कृपया मनस्विभावो यस्याः सा

नदृशो वध्यतां पाप आततायात्मबंधुहा ॥ भर्तुश्च विप्रियं वीर कृतवान कुलपांसनः ॥ ३९ ॥ एवं परीक्ष्
ता धर्मं पार्थः कृष्णेन चोदितः ॥ नैच्छद्धंतुं गुरुसुतं यद्यप्यात्महनं महान् ॥ ४० ॥ अथोपेत्य स्वशिबिरं
गोविंदप्रियसारथिः ॥ न्यवेदयत्तं प्रियायै शोचंत्या आत्मजान् हतान् ॥ ४१ ॥ तथाहृतं पशुवत्पाशबद्धम
वाङ्मुखं कर्मजुगुप्सितेन ॥ निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया ननाम च ॥ ४२ ॥ उ
वाच चासहंत्यस्य बंधनानयनं सती ॥ मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ॥ ४३ ॥

ननाम च ॥ ४२ ॥ उवाच चेति चकाराभ्यां संभ्रमः सूचितः बंधनानयनं असहमाना ॥ ४३ ॥ ॥ छ ॥ २ निरीक्ष्य वामः शो

सरहस्यः गोप्यमंत्रसहितः विसर्गो ऽस्त्रप्रयोगः उपसंयमः उपसंहारः ताभ्यां सहितो ऽस्त्रसमूहश्च ॥४४॥ किंच तस्य द्रोणस्यात्मार्द्धं देहस्यार्द्धं रूपी ह्यास्ते ॥ अर्द्धत्वे हेतुः पत्नी अर्द्धो वा एष आत्मनो यत्पत्नीति श्रुतेः ॥ जायापती अग्निमादधीयातामिति श्रुतेः ॥ उभयोरेककार्यकत्वाव गमाच्च ॥ ननु भर्तरि मृते सा कथं जीवति तत्राह नान्वगादिति वीरसूः पुत्रवती ॥४५॥ तत्तस्माद्गौरवं गुरोः कुलं भवद्भिः कर्तृभिः ह

सरहस्यो धनुर्वेदः सविसर्गोपसंयमः ॥ अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् ॥४४॥ स एष भगवान्द्रोणः प्रजारूपेण वर्त्तते ॥ तस्यात्मनोर्द्धं पत्न्यास्ते नान्वगाद्वीरसूः कृपी ॥४५॥ तद्धर्मज्ञ महाभाग भवद्भिर्गौरवं कुलं ॥ वृजिनं नार्हति प्राप्तुं पूज्यं वंद्यमभीक्ष्णशः ॥४६॥ मा रोदीदस्य जननी गौतमी पतिदेवता ॥ यथाहं मृतवत्सार्त्ता रोदिम्यश्रुमुखी मुहुः ॥४७॥ यैः कोपितं ब्रह्मकुलं राजन्यैरजिता त्मभिः ॥ तत्कुलं प्रदहत्याशु सानुबंधं शुचार्पितं ॥४८॥

वृजिनं दुःखं प्राप्तुं नार्हति किंतु पूज्यं वंद्यं च ॥४६॥ मृतवत्सा मृतपुत्रा ॥४७॥ विपक्षे दोषमाह यैरिति तेषां राजन्यानां कुलं कर्मकर्तृ सानुबंधं सपरिवारं शुचा शोकेनार्पितं व्याप्तं सत् ब्रह्मकुलकर्तृ प्रदहति ॥४८॥

धर्मेमिसाद्योवचसः षड्गुणाः पूर्वश्लोकषट्केनदर्शिताः ॥ तत्रधर्म्यंधर्मादनपेतंमुच्यतांसूच्यतामिति ॥ न्याय्यंन्यायादनपेतंसरहस्यइत्या
दि ॥ सकरुणंनत्स्यात्मनोधर्ममिति ॥ निर्व्यलीकंनिष्कपटंतद्धर्मज्ञेति ॥ समंपक्षपातशून्यंमारोदीरितिदुःखसाम्योक्तेः महत्वैः कोपितमि
ति ॥ निष्ठुरोक्त्याहितोपदेशात् ॥ एवंभूतंराज्ञ्याः वचः हेद्विजाःप्रत्यनंदत् ॥ अनुमोदितवान् ॥ ४९ ॥ नकुलादयश्चप्रत्यनंदन् युयुधानःसा

सूतउवाच ॥ धर्म्यंन्याय्यंसकरुणंनिर्व्यलीकंसमंमहत् ॥ राजाधर्मसुतोराज्ञ्याःप्रत्यनंदद्वचोद्वि
जाः ॥ ४९ ॥ नकुलःसहदेवश्चयुयुधानोधनंजयः ॥ भगवान्देवकीपुत्रोयेचान्येयाश्चयो
षितः ॥ ५० ॥ तत्राहामर्षितोभीमस्तस्यश्रेयान्वधःस्मृतः ॥ नभर्तुर्नात्मनश्चार्थेयोहन्सुप्तान्
शिशून्वृथा ॥ ५१ ॥ निशम्यभीमगदितंद्रौपद्याश्चचतुर्भुजः ॥ आलोक्यवदनंसख्युरिदमाहहसन्निव

त्यकिः ५० तस्यतथाविधस्यद्रौणेःवधएवश्रेष्ठः अन्यथाऽस्यनरकपातप्रसंगात् तदाह नभर्तुरिति अहन् जघान ५१ चतुर्भुजोक्तेर
यंभावः भीमेणतंहंतुंप्रवृत्तेद्रौपद्यांचसहसातन्निवारणेप्रवृत्तायामुभयोःसंवारणायाविष्कृतचतुर्भुजइति संदिहानस्यसख्युरर्जुनस्य ५२

॥भा॰ प्र॰॥
॥३१॥

वधार्हणः वधार्हः मयैव शास्त्रकृता ॥ ब्राह्मणो न हन्तव्यः ॥ तथा आततायिनमायान्तमपि वेदान्तपारगं ॥ जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेदिति वदता तदुभयमप्यनुशासनं परिपालय ॥५३॥ तत्र च प्रतिज्ञातं सत्यं सा इह ॥ प्रियां सान्त्वयता त्वया यत्प्रतिश्रुतं तदिह न नन्तव्यं सत्यं कुरु ॥ मह्यं मम तत्र वधे भीमस्य प्रियं भवति ॥ अवधे द्रौपद्याः ॥ द्वये श्रीकृष्णस्य ॥५४॥ हार्दं अभिप्रायं आज्ञाय ज्ञात्वा ॥ न ह्यशक्यमनुभयं वरं ध्यात्वा ॥ अतो

श्रीभगवानुवाच ॥ ब्रह्मबन्धुर्न हन्तव्य आततायी वधार्हणः ॥ मयैवोभयमाम्नातं परिपाह्यनुशासनं ॥५३॥ कुरु प्रतिश्रुतं सत्यं यत्तत्सान्त्वयता प्रियां ॥ प्रियं च भीमसेनस्य पाञ्चाल्या मह्यमेव च ॥५४॥ सूत उवाच ॥ अर्जुनः सहसाज्ञाय हरेर्हार्दमथासिना ॥ मणिं जहार मूर्धन्यं द्विजस्य सहमूर्धजं ॥५५॥ विमुच्य रशनाबद्धं बालहत्याहतप्रभं ॥ तेजसा मणिना हीनं शिबिरान्निरयापयत् ॥५६॥ ॥

यमभिप्राय इति ज्ञात्वेत्यर्थः ॥ असिना खड्गेन मूर्धन्यं मूर्ध्नि जातं सहमूर्धजं सकेशं ॥५५॥ मणिना च हीनं निरयापयत् निःसारितवान् ॥५६॥ ॥ ॥५६॥ ॥ ॥ छ

॥राम॥
॥३१॥

अनेन श्रीकृष्णोक्तं सर्वं संपादितमित्याह वपनमिति ॥५७॥ निर्हरणं दाहार्थं नयनं ॥५८॥ इति श्रीमद्भागवते दीपिकायां प्रथम
स्कंधे टीकायां निर्णयहेनाम सप्तमोध्यायः ॥७॥ अष्टमे कुपितद्रोणेरस्त्राद्रक्षा परीक्षितः श्रीकृष्णेन स्तुतिः कुंत्या राज्ञः शोकश्च कीर्त्यते ॥८॥
ते पांडवाः संपरेतानां मृतानां स्वानां गंगायामुदकं दातुं सकृष्णाः श्रीकृष्णेन सहिताः स्त्रियः पुरस्कृत्य अग्रतः कृत्वा तस्मिन्कार्ये स्त्री

वपनं द्रविणादानं स्थानान्निर्यापणं तथा ॥ एष हि ब्रह्मबंधूनां वधो नान्योस्ति दैहिकः ॥५७॥ पुत्रशोका
तुराः सर्वे पांडवाः सह कृष्णया ॥ स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकं ॥५८॥ इति श्रीभा० म० प्रथम
स्कंधे सप्तमोध्यायः ॥७॥ सूत उवाच ॥ अथ ते संपरेतानां स्वानामुदकमिच्छतां ॥ दातुं सकृष्णा गंगा
यां पुरस्कृत्य ययुः स्त्रियः ॥१॥ ते निनीयोदकं सर्वे विलप्य च भृशं पुनः ॥ आप्लुता हरिपादाब्जरजः पूतस
रिज्जले ॥२॥ ॥

पुरःसरत्वविधानात् ॥१॥ निनीय दत्वा हरिपादाब्जरजोभिः पूतायां सरितः गंगायाः जले पुनर्ग्रहणाद
दावपि स्नाता इति गम्यते ॥२॥ ॥ श्रीकृष्णो जयति ॥

कुलपतिं युधिष्ठिरं सहानुजं भीमादिभिः सहितं ॥३॥ मुनिभिः सहितः ॥४॥ कितवैर्धूर्तैर्दुर्योधनादिभिः द्रौपद्याः कचग्रहणादिना क्षतं नष्टमायुर्येषां तान् ॥५॥ याजयित्वाद्दिशा विकथा संक्षेपः शतमन्योः शतक्रतोरिव ॥६॥ शैनेयः शिनोर्नप्ता सात्यकिस्तेन चोद्धवेन च सं

तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजं ॥ गांधारीपुत्रशोकार्त्तां धर्यां कृष्णां च माधवः ॥३॥ सांत्वयामास मुनिभिर्हतबंधूञ्छुचार्पितान् ॥ भूतेषु कालस्य गतिं दर्शयन्नप्रतिक्रियां ॥४॥ साधयित्वाजातशत्रोः स्वराज्यं कितवैर्हृतं ॥ घातयित्वासतो राज्ञः कचस्पर्शक्षतायुषः ॥५॥ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः ॥ तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ॥६॥ आमंत्र्य पांडुपुत्रांश्च शैनेयोद्धवसंयुतः ॥ द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः ॥७॥ गंतुं कृतमतिर्ब्रह्मन्द्वारकां रथमास्थितः ॥ उपलेभेऽभिधावंतीमुत्तरां भयविह्वलां ॥८॥

युतः ॥७॥ रथमास्थितः सन् उत्तरां परीक्षिन्मातरं अभिमुखं धावंतीं उपलेभे ददर्श ॥८॥

उत्तराश्रीकृष्णंप्रार्थयतेपाहिपाहीतिद्वाभ्यां॥ अन्यस्त्वत्प्रार्थनायोग्योनास्तीत्याहत्वत्त॥ त्वत्तःअन्यंअभयंभयरहितंनपश्यामि॥ यत्रलोकेपरस्परंमृत्युर्भवति॥९॥ तत्रप्रसक्तंभयमावेदयति॥ अभिद्रवति॥ अभिमुखमायाति॥ तप्तमायसंलोहमयंशल्यंयस्यसः॥ अतिकार्पण्यमाहकाममितिकामंयथेष्टं॥१०॥ पराभवेनातिकुपितस्यद्रौणेःअपाण्डवंपाण्डवशून्यंपरंइदंविश्वंकर्तुंप्रवृत्तंब्रह्मास्त्रमबुध्यत॥११॥

उत्तरोवाच॥ पाहिपाहिमहायोगिन्देवदेवजगत्पते॥ नान्यंत्वदभयंपश्येयत्रमृत्युःपरस्परं॥९॥ अभिद्रवतिमामीशशरस्तप्तायसोविभो॥ कामंदहतुमांनाथमामेगर्भोनिपात्यतां॥१०॥ सूतउवाच॥ उपधार्यवचस्तस्याभगवान्भक्तवत्सलः अपाण्डवमिदंकर्तुंद्रौणेरस्त्रमबुध्यत॥११॥ तर्ह्येवाथमुनिश्रेष्ठपाण्डवाःपंचसायकान॥ आत्मनोभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाददुः॥१२॥ व्यसनंवीक्ष्यतत्तेषामनन्यविषयात्मनां॥ सुदर्शनेनस्वास्त्रेणस्वानांरक्षांव्यधाद्विभुः॥१३॥ ॥ छ ॥

अतएवतद्भुजमुखंतदागतमित्याहतर्ह्येवेति॥१२॥ ब्रह्मास्त्रस्यास्त्रान्तरैरनिवर्त्यत्वात॥ ततदुःपरिहरंव्यसनंवीक्ष्यअनन्यविषयआत्मायेषांसेकनिष्ठानामिति॥१३॥

वैराट्या उत्तरायाः अंतस्थः सन् गर्भमावृतवान् ॥ तत्र हेतुः यतः आत्मा अंतर्यामी योगेश्वर इति बहिःस्थस्यापि प्रवेशघटनार्थमुक्तमकुरू
णां तंतवे संतानाय पांडवानामपि कुरुवंशजातत्वादेवमुक्तं ॥१४॥ अमोघमप्रतिक्रियं च समशाम्यत् शांतमासीत् ॥१५॥ एतदस्त्रशाल्लमतं
आश्चर्यमा मंस्थाः मा मन्यस्व ॥१६॥ कृष्णया सह ॥१७॥ लीलां तां नमस्ये नमस्करोमि ॥ ननु कृतनिष्ठमां कथं नमस्करोषि तत्राह ॥ आद्यं पुरु

अंतस्थः सर्वभूतानामात्मा योगेश्वरो हरिः ॥ स्वमायया वृणोद्गर्भं वैराट्याः कुरुतंतवे ॥१४॥ यद्यप्यस्त्रं ब्र
ह्मशिरस्त्वमोघं चाप्रतिक्रियम् ॥ वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह ॥१५॥ मा मंस्था ह्येतदाश्चर्यं
सर्वाश्चर्यमयेऽच्युते ॥ य इदं मायया देव्या सृजत्यवति हंत्यजः ॥१६॥ ब्रह्मतेजोविनिर्मुक्तैरात्मजैः स
ह कृष्णया ॥ प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती ॥१७॥ कुंत्युवाच ॥ नमस्ये पुरुषं त्वाद्यमीश्वरं
प्रकृतेः परं ॥ अलक्ष्यं सर्वभूतानामंतर्बहिरवस्थितं ॥१८॥

षं कुतः प्रकृतेः परं तत्कुतः ईश्वरं प्रकृतेरपि नियंतारं ॥ अत एव सर्वभूतानामंतर्बहिश्च चरणत्वेनावस्थितं तथाप्यलक्ष्यं ॥१८॥

तत्र हेतुः मायैव जवनिका तिरस्करिणी तया आछन्नं प्रतिछन्नं अतो हमतां भक्तियोगेनाभिज्ञा केवलं नमस्यामि अधः अक्षजं इंद्रियज्ञानं यस्मात् तं अपरिछिन्नं तत्त्व प्रपंचः मूढदृशा देहाभिमानिना संसारेण न लक्ष्यसे ॥१९॥ किंच ॥ परमहंसानामात्मानात्मविवेकिनां ॥ ततो मुनीनां मननशीलानामपि ततः श्चामलात्मनां निवृत्तरागादीनामपि तथा जेन निजमहिम्ना न लक्ष्यस्य: कथं हि पश्येम ॥ यद्वा ॥ परमहंसानामपि म

मायाजवनिकाछन्नमज्ञाधोक्षजमव्ययं ॥ न लक्ष्यसे मूढदृशा नटो नाट्यधरो यथा ॥१९॥ तथा परमहंसानां मुनीनाममलात्मनां ॥ भक्तियोगविधानार्थं पश्येम हि स्त्रियः ॥२०॥ कृष्णाय वासुदेवाय देवकीनंदनाय च ॥ नंदगोपकुमाराय गोविंदाय नमो नमः ॥२१॥ नमः पंकजनाभाय नमः पंकजमालिने नमः पंकजनेत्राय नमस्ते पंकजांघ्रये ॥२२॥ ॥ छ छ

क्तियोगविधानार्थं त्वां आत्मारामायणामप्यविंसनिजगुरो राकृष्णभक्तियोगं विधातुं कारयितुं अवतीर्णमित्यर्थः ॥ ज्ञानभक्त्योरशक्यत्वमुक्त्वा पुनः ॥ केवलं नमस्करोति कृष्णायेति द्वाभ्यां ॥२१॥ पंकजं नाभौ यस्य पंकजानां मालास्ति यस्य पंकजवत्सुसन्ने नेत्रे यस्य पंकजांकितावंघ्री यस्य तस्मै नमः ॥२२॥

भा॰ प्र॰ मा तत्कृतोपकारान्नुस्मरति यथेति द्वाभ्यां ॥ अयमर्थः मातृतोपि मम प्यधिकानवप्रीतिः नयाहि हे हृषीकेश यथा देवकी कंसेन रुद्धा तथा

॥४६॥ विमोचिता ॥ अहं च तथैव कंसे मोचिते ति का का महानु विशेषउक्तः ॥ तं दर्शयति ॥ सा अतिचिरं रुद्धासती मत्सादेव सकृद्विमोचिता तथा सुचा

पिता च सती न च तस्याः पुत्रा रक्षिताः ॥ अतिवान्यो नाथ स्तस्याः ॥ अहं तु विपत्क्षणात् ॥ तत्रापि मुकुंदः शीघ्रं च सात्मजा च त्वयैव च नाथेन

यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता ॥ विमोचिताहं च सहात्मजा विभो त्वयैव ना

थेन मुहुर्विपद्गणात् ॥ २३ ॥ विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वनवासकृच्छ्रतः ॥ मृधे मृधे

नेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेऽभिरक्षिताः ॥ २४ ॥ विपदः संतु ताः शश्वत्तत्र तत्र जगद्गुरो ॥ भ

वतो दर्शनं यत्स्यादपुनर्भवदर्शनं ॥ २५ ॥ ॥ ॥ ॥ ॥

ति ॥ २३ ॥ विपद्गणमेव दर्शयति विषादिति भीमस्य विषमोदकदानात् ॥ महाग्नेः जतुगृहदाहात् पुरुषादा हिडिंबादयो राक्षसास्तेषां दर्शनात्

असत्सभायाः द्यूतस्थानात् ॥ अभितो रक्षिताः ॥ आस्म अभवाम ॥ २४ ॥ ननु यास्तु विपत्सु कीदृशं दर्शनं नास्ति पुनरपि भवदर्शनं

यस्मात् ॥ २५ ॥ ॥

राम ॥४६॥

संपदस्तुश्रेयःपरिपंथिन्यइत्याहजन्मसत्कुलेजन्मादिभिरेधमानोमदोयस्यसः ॥ अभिधातुंश्रीकृष्णगोविंदेतिवक्तुमपि ॥ अकिंचनानांगोचरंविषयभूतं ॥ २६ ॥ प्रसक्तंनमनोरथपूरणायप्रणाममिति ॥ अकिंचनाभक्ताएववित्तंसर्वस्वंयस्यतस्मैतेनतः । किंनिवृत्तागुणाप्रवृत्तयोधर्मार्थकामविषयायस्मात्तस्मै ॥ कुतः आत्मारामायनतुकुतः शांतायरागादिरहितायकिंचकैवल्यंदातुंसमर्थाय ॥ २७ ॥ ननुदेवकीपुत्रंमां

जन्मैश्वर्यश्रुतश्रीभिरेधमानमदःपुमान् ॥ नैवार्हत्यभिधातुंवैत्वामकिंचनगोचरं ॥ २६ ॥ नमोकिंचनवित्तायनिवृत्तगुणवृत्तये ॥ आत्मारामायशांतायकैवल्यपतयेनमः ॥ २७ ॥ मन्येत्वांकालमीशानमनादिनिधनंविभुं ॥ समंचरंतंसर्वत्रभूतानांयन्मिथःकलिः ॥ २८ ॥ ॥ छ ॥

कथमेवंस्तोषितत्राह ॥ मन्येत्वांकालंननुदेवकीपुत्रं ॥ तत्रहेतवः ईशानंनियंतारं ॥ अनादिनिधनं ॥ आद्यंतशून्यंविभुंप्रभुंसमंयथाभवतितथासर्वत्रचरंतं ॥ ननुपार्थसारथेःकथंममसाम्यंतत्राहयद्यतः त्वन्निमित्तंभूतानांभूतानामेवमिथःकलिःकलहोभवतिनतुत्वस्त्वपिवैषम्यं ॥ २८ ॥ ॥ छ

भा·प्र·
॥४७॥

ननु वियहानुग्रहरूपं मयि प्रसिद्धं वैषम्यं जनआह न वेदेति॥ नृणां विडंबनमनुकरणं मूढ ईहमानस्य कुर्वतः॥ यस्मिंस्त्वयि विषमा मतिरनुग्रहनिग्रहरूपा भवति॥२९॥ अजस्य जन्म अकर्तुः कर्मेति तिर्यक्षु वाराहादिरूपेण नृषु रामादिरूपेण ऋषिषु वामनादिरूपेण॥ यादस्सु मत्स्यादिरूपेण॥३०॥ नरविडंबनमस्याश्चर्यमित्याह गोपीयशोदा त्वयि कृतागसि दधिभांडस्फोटनं कृतवति यावद्दाम रज्जुं आ

नवेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडंबनं॥ न यस्य कश्चिद्दयितोस्ति कर्हिचिद्द्वेष्यश्च यस्मिन्विषमा मतिर्नृणां॥२९॥ जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः॥ तिर्यङ्नृषिषु यादस्सु तदत्यंत विडंबनं॥३०॥ गोप्याददे त्वयि कृतागसि दाम तावद्या ते दशाश्रुकलिलांजनसंभ्रमाक्षं वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति॥३१॥ ॥

ददे जग्राह॥ तावत्तत्क्षणमेव या ते दशा अवस्था सा मां विमोहयति किं भूतस्य अश्रुभिः कलिलं व्याप्तमिश्रं अंजनं ययोस्ते च ते संभ्रमे व्याकुले अक्षिणी यस्मिंस्तद्वक्त्रं निनीय अधः कृत्वा माता ताडयिष्यतीति भयस्य भावनया स्थितस्य यद्यतः त्वत्तः भीरपि स्वयं बिभेति तत्र सा ते दशा॥३१॥

राम
॥४७॥

अत एव जगन्मोहनतया दुर्ज्ञेयत्वात्तव जन्मादि व कुधा वर्णयंतीत्याह केचिदिति चतुर्भिः पुण्यश्लोकस्य प्रियस्य युधिष्ठिरस्य कीर्त्तये यदोरव
कीर्त्तये वंशे वा चंदनं यथा ॥३२॥ तथा वसुदेवस्य भार्यायां देवक्यां अज एव त्वमभ्यगात् पुत्रत्वमिति शेषः प्रथमपुरुषस्त्वार्षः ॥ अभ्यमि
तिपाठः सुगमः ताभ्यामेव पूर्वं सुतपः पृश्निरूपाभ्यां याचितः सन् ॥ अस्य जगतः क्षेमाय ॥३३॥ आत्मभुवेति ब्रह्मप्रार्थनस्य प्राधान्य

केचिदाहुरजं जातं पुण्यश्लोकस्य कीर्त्तये ॥ यदोः प्रियस्यान्ववाये मलयस्येव चंदनम् ॥३२॥ अपरे व
सुदेवस्य देवक्यां याचितोभ्यगात् ॥ अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषाम् ॥३३॥ भारावतारणा
यान्ये भुवो नाव इवोदधौ ॥ सीदंत्या भूरिभारेण जातो ह्यात्मभुवार्थितः ॥३४॥ भवेस्मिन् क्लिश्यमा
नानामविद्याकामकर्मभिः ॥ श्रवणस्मरणार्हाणि करिष्यन्निति केचन ॥३५॥ ॥ छ

विवक्षया मतांतरं ॥३४॥ परमानंदस्वरूपाज्ञानमविद्या ॥ ततो देहाद्यभिमानात्कामः ततः कर्माणि तैः क्लिश्यमानानां तन्निवृत्तये श्रव
णाद्यर्हाणि कर्माणि करिष्यन् ॥३५॥ ॥ छ छ ॥ ॥

अस्य पक्षस्य सिद्धांतेनाभिप्रेत्य श्रवणादि फलमाह शृण्वंतीति ॥ नंदंति ॥ अन्ये कीर्त्तिमानमभिनंदंति ये जनाः ईहितं चरितं तावकं त्वदीयं पदांबुजं त एव पश्यंत्येव ॥ अचिरेणैवेति वर्त्तवेत्रावधारणं ॥ कीदृशं भवप्रवाहस्य जन्मपरंपराया उपरमो यस्मिन् तत् ॥ ३६ ॥ इदानीं तावत्संसारत्यागोनुचित इत्याशयेनाह ॥ अपीति चतुर्भिः हे प्रभो सुहृदो नुजीवनश्च नोद्य अपि स्वित् ॥ त्वं जिहासि सि ये षामस्माकम् अन्यत्परायणं नैवास्ति कुतः राजसु योजितमंहो दुःखं यैस्तेषां त्वानां कृतमीहितमपेक्षितं येन तत्संबोधनं विसर्गांतपाठे त्वं पदविशे

शृण्वंति गायंति गृणंत्यभीक्ष्णशः स्मरंति नंदंति तवेहितं जनाः ॥ त एव पश्यंत्यचिरेण तावकं भवप्रवाहोपरमं पदांबुजं ॥ ३६ ॥ अप्यद्य नस्त्वं स्वकृतेहित प्रभो जिहाससि स्वित्सुहृदो नुजीवनः ॥ येषां न चान्यद्भवतः पदांबुजात्परायणं राजसु योजितांहसां ॥ ३७ ॥ के वयं नामरूपाभ्यां यदुभिः सह पांडवाः ॥ भवतो दर्शनं यर्हि हृषीकाणामिवेशितुः ॥ ३८ ॥ ॥ ७ ७

षणं ॥ ३७ ॥ ननु नवंबंधवो यादवाः पुत्राश्च पांडवाः शूराः समर्थाश्च तत्किं कार्पण्यं भाषसे अत आह के वयमिति ॥ यर्हि भवतोदर्शनं यत्त्वमस्मान्न पश्यसि तदा नाम्ना विख्याता रूपेणासमृद्धा वयं यदुभिः सहिताः पांडवा नाम के वयं न केपि अनितुच्छा इत्यर्थः ॥ हृषीकाणामीशितुर्जीवस्यादर्शने यथा न किंचिल्लाम च रूपं च तद्वत् ॥ ३८ ॥

किंच॥ यथेदानीमियमस्मस्मात्पाभूमिः स्वरसाधारणैर्वज्राकुशादिभिर्लक्षणैर्विलक्षिता अन्विह्नैस्त्वत्पदैरंकिता सती भाति तत्र तदा त्वयि निर्गते सति न शोभिष्यते॥३९॥ अपिच इमे जनपदा देशाः स्त्रद्धाः सुसमृद्धाः संतः॥४०॥ गमने पांडवानामकुशलं॥ अगमने च यादवानामकुशलं॥ अगमने च यादवानामिस्युभयतो व्याकुलचित्तासती तेषु स्नेहनिबद्धं प्रार्थयते॥ अथेति विश्वेशत्वादिसंबोधनानि स्ते

नेयं शोभिष्यते तत्र यथेदानीं गदाधरः॥ त्वत्पदैरंकिता भाति स्वलक्षणविलक्षितैः॥३९॥ इमे जनपदाः स्त्रद्धाः सुपक्वौषधिवीरुधः वनाद्रिनद्युदन्वंतो ह्येधंते तव वीक्षितैः॥४०॥ अथ विश्वेश विश्वात्मन् विश्वमूर्ते स्वकेषु मे॥ स्नेहपाशमिमं छिंधि दृढं पांडुषु वृष्णिषु॥४१॥ त्वयि मेनन्यविषया मतिर्मधुपतेस कृदेत्॥ रतिमुद्वहतादद्धा गंगेवौघमुदन्वति॥४२॥ ॥ ॥

हे कृष्ण सामर्थ्यस्वाप्तता यदृढं संतं॥४१॥ ततः किमत आह॥ त्वयीति अनन्यविषयासती मे मतिः रतिमुद्वहतात्॥ अनवच्छिन्नां प्रीतिं करोत्वित्यर्थः॥ ओघं प्रवाहं यथा गंगा अप्रतिबंधेन गमयति॥ एवं ममाप्यविघ्नान्मा गणयत्वितिभावः॥४२॥ ॥

एवमभ्यर्थ्यपुनःप्रणमतिहेश्रीकृष्णेतेनमःउपकारानतुस्मरंतीवकुधासंवोधयति।। कृष्णसखअर्जुनस्यसखेवृष्णीनामृषभश्रेष्ठ अवनेध्रुहंसंयदुद्यतिपराजन्यास्तेषांवंशस्यदहनएवमप्यनपवर्गवीर्य।। अक्षीणप्रभावगोविंदप्राप्तकामधेनैश्वर्यगोद्विजसुराणामार्त्तिह

श्रीकृष्णकृष्णसखवृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य।। गोविंदगोद्विजसुरार्त्तिहरावतारयोगेश्वराखिलगुरोभगवन्नमस्ते।।४३।। सूतउवाच।। पृथयेत्थंकलपदैः परिणूताखिलोदयः।।मंदंजहासवैकुंठोमोहयन्निवमायया।।४४।। ७ श्री· ७

ॐअवतारोयस्येति।।४३।।कलानिमधुराणिपदानियेषुतैर्वाक्यैःपरिणूतोखिलउदयोमहिमायस्यसःशुक्लनाविस्यसाम्यरिणुनेतिविभ्रयदीर्घंछंदोनुरोधेनमंदमीषत्।। तस्यहासएवमायावक्ष्यतिहिहासोजनोन्मादकरीचमायेतिद्वितीये।।४५।। ७

त्वयिमेनन्यविषयामतिरितियत्प्रार्थितंतद्दृष्टमिसंगीकृत्यरथस्यानाहूआहूयमागत्यपश्यान्तांवान्पाश्वसुभद्राप्रमुखाः स्त्रियश्चपासंश्चानुत्ता
प्यसपुत्रंयास्यन्राज्ञायुधिष्ठिरेणप्रेमगात्रेवकंविल्काललेनिवसेतिसंप्रार्थ्यनिवारितः ॥४५॥ अथभीष्मनिर्याणोत्सवंवक्तुमुपोद्घातकथांत्रलो
ति ॥ व्यासाद्यैः प्रबोधितोपिस्तुचार्पितः व्यासः ॥ सत्वाबुध्यतविवेकंनप्रापकुतः ईश्वरेहायाजस्तैःस्वभक्तभीष्मनिर्याणमहोत्सवायराज्ञास

तद्दृष्टमिस्तुपार्थंसप्रविश्यागतमाहूय ॥ स्त्रियश्चसपुत्रंयास्यस्त्रेण्णाराज्ञानिवारितः ॥४५॥ व्यासा
धैरीश्वरेहीतेः कृष्णेनाद्भुतकर्मणा ॥ प्रबोधितोपीतिहासैर्नाबुध्यतशुचार्पितः ॥४६॥ ॥ छ

हकुरुक्षेत्रंगंतव्यंतत्रतन्मुखेनैवायंप्रबोधनीयइति ईश्वराभिप्रायत्कार्यहृदयविधायकत्तमजानाद्विरित्यर्थः श्रीकृष्णेनप्रबोधितो
पिनाबुध्यततत्रहेतुः ॥ अद्भुतकर्मणेति ॥ यथाकुरुपांडवसंधानार्थंगतोपियथोचितमेववदन्नपिविग्रहमेवदृढीकृतवान् ॥ एव
मत्रापिप्रबोधयन् ॥ अबोधमेवदृढीकारेत्यर्थः ॥ ४६॥ ॥ छ छ छ

अबोधमेवमपंचयसि ॥ आहेतिषड्भिः प्राकृतेन अविवेकप्रायेन आत्मना वित्तेन हे विप्राः ॥४७॥ पारकास्य स्वशृगाद्याहारस्य तस्यार्थे मम
यावद्याः अक्षौहिणीः अक्षौहिण्यः ॥ अक्षौहिणीः अक्षौहिण्यः ॥ अक्षौहिणीप्रमाणं व्यासेनोक्तं ॥ अक्षौहिणीप्रसंख्यानां रथानां द्विजस
त्तमाः ॥ संख्यागणनतत्त्वज्ञैः सहस्राण्येकविंशतिः ॥ शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः गजानां च प्रसंख्यानमेतदेव प्रकीर्तितं ॥ दे

अहं राजा धर्मसुतश्चिंतयन्सुहृदां वधं ॥ प्राकृतेनात्मना विप्राः स्नेहमोहवशंगतः ॥४७॥ अहो मे
पश्यतां ज्ञानं हृदि रूढं दुरात्मनः ॥ पारकस्यैव देहस्य बह्व्यो मेक्षौहिणीर्हताः ॥४८॥ बालद्विजसु
हृन्मित्रपितृभ्रातृगुरुद्रुहः ॥ न मे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः ॥४९॥ ॥ छ

पंचाशतसहस्रं तु सहस्राणि नवैव तु ॥ नराणामपि पंचाशत् शतानि त्रीणि चैव हि ॥ पंचषष्टिसहस्राणि तथाश्वानां शतानि च दशोत्तरा
णि षट् प्राहुः संख्यातत्त्वविदो जनाः ॥ एतामक्षौहिणीं प्राहुः यावदिह संख्ययेति ॥४८॥ सुहृदः संबंधिनः मित्राणि सखायः पि
तरः पितृव्याः ॥४९॥

द्विषां वधः एनः पापं न भवतीति यच्छासनं शिक्षारूपं वचः कुतो न कल्पते ॥ यत स्तत्र्य प्रजाभर्तुरेव अयं यथा वः स्वप्रजानाम्प्रतो वा धेप्रस
क्तेत द्द्धोत्तुत्तात: दुर्योधनेन तु प्रजायां पाल्यमानायांमयाकेवलं राज्यलोभेन हतत्वात् ॥ पापमेवेदमिति ॥ ५० ॥ किंच युद्धे पुंसां वधो भ
वतु नाम धर्मः स्त्रीणां तु मया हतानां बंधवो यासां तासां यो सौ द्रोहोनुदिष्टो प्युत्थितः तं व्यपोहितुमपाकर्तुं कल्पः समर्थो नाहं गृहमेधीये
गृहाश्रमविहितैः ॥ ५१ ॥ ननु अश्वमेधे सर्वं पाप्मानं तरति ब्रह्महत्यां यो अश्वमेधेन यजते य उ चैनमेवं वेदेति श्रुतेः पापमश्वमेधेन नश्यत्वेदं वेत्याशं

नैनो राज्ञः प्रजाभर्तुर्धर्मयुद्धे वधो द्विषां ॥ इति मे न तु बोधाय कल्पते शासनं वचः ॥ ५० ॥ स्त्रीणां मद्धतबंधू
नां द्रोहो यो सावि होत्थितः ॥ कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुम् ॥ ५१ ॥ यथा पंकेन पंकांभः सुरया
सुराकृतं ॥ भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ॥ ५२ ॥ ॥ ८ ॥ ॥ ६ ॥ ॥

कृत्वा अविवेककृतं भिन्नं हेतुवादमाश्रित्य निराकरोति यथा पंकेन पंकांभो न मृज्यते ॥ यथा सुरालेशकृत मपावित्र्यं बह्व्या सुरया तु न ज्यते ॥ न
थैव भूतहत्यामेकां प्रमादतो जातां ॥ बुद्धिपूर्वहिंसाप्रायैर्यज्ञैर्मार्ष्टुं शोधयितुं नार्हति ॥ ५२ ॥ ॥ ॥ ८ ॥

सुरया

इतिप्रथमेअष्टमोध्यायः ॥८॥ युधिष्ठिरायभीष्मेणसर्वधर्मनिरूपणं ॥ हलनिश्चमुक्तिश्चमुक्तिश्चनवमेतत्सवर्ण्यते ॥१॥ यथयद्दर्थे
नस्याविवेकः श्रीकृष्णेनसंवर्द्धितस्तद्दर्शयंनि ॥ इतीतिसर्वेषांधर्माणांविविक्षयावेदितुमिच्छयाविनशनंकुरुक्षेत्रंदेवव्रतोभीष्मः ॥१॥

इतिश्रीभागवतेमहापुराणेयुधिष्ठिरानुतापोनामअष्टमोध्यायः ॥८॥ सूतउवाच ॥ इतिप्रजाद्रोहा
सर्वधर्मविवित्सया ॥ ततोविनाशनंप्रागाद्यत्रदेवव्रतोपतत् ॥१॥ तदातेभ्रातरःसर्वेसदश्वैःस्वर्णभू
षितैः ॥ अन्वगच्छन्रथैर्विप्राव्यासधौम्यादयस्तथा ॥२॥ भगवानपिविप्रर्षेरथेनसधनंजयः ॥ सतै।
र्विरोचतनृपःकुबेरइवगुह्यकैः ॥३॥ दृष्ट्वानिपतितंभूमौदिवःच्युतमिवामरम् ॥ प्रणेमुःपांडवाभी
ष्मंसानुगाःसहचक्रिणा ॥४॥ तत्रब्रह्मर्षयःसर्वेदेवर्षयश्चसत्तम ॥ राजर्षयश्चतत्रासन्द्रष्टुंभरतपुंग
वं ॥५॥ ॥

सेनः श्रेष्ठाअश्वायेषुतैःरथैः ॥२॥३॥ तत्रतदातत्रासन्ततत्क्षणमेवागताइत्यर्थः भरतपुंगवंभीष्मम् ॥५॥

रेणुकासुतः परसुरामः ॥ ६ ॥ ७ ॥ ब्रह्मरातः शुकः आंगिरसो बृहस्पतिः ॥ ८ ॥ वसूत्तमो भीष्मः ॥ ९ ॥ हृदिस्थं संतं पुरतश्चासीनं पूजयामास ॥ १०
उपासीनान् उपसमीपे ॥ उपविष्टान् ॥ प्रश्रयो विनयः प्रेम स्नेहः ताभ्यां संगतान् तु पसंनान् पारां गते रेताभ्याम् एव नूतान् अभ्याचष्ट अ

पर्वतो नारदो धौम्यो भगवान्बादरायणः ॥ बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ॥ ६ ॥ वशिष्ठ इंद्रप्रमदस्त्रितो गृत्समदोसितः ॥ कक्षीवान्गौतमो त्रिश्च कौशिकोथ सुदर्शनः ॥ ७ ॥ अन्ये च मुनयो ब्रह्मन्ब्रह्मरातादयोमलाः ॥ शिष्यैरुपेता आजग्मुः कश्यपांगिरसादयः ॥ ८ ॥ तान्समेतान्महाभागानुपलभ्य वसूत्तमः ॥ पूजयामास धर्मज्ञो देशकालविभागवित् ॥ ९ ॥ कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरम् ॥ हृदिस्थं पूजयामास माययोपात्तविग्रहं ॥ १० ॥ पांडुपुत्रानुपासीनान्प्रश्र
यप्रेमसंगतान् ॥ अभ्याचष्टानुरागाश्रैरंधीभूतेन चक्षुषा ॥ ११ ॥

भ्यभाषत अनुरागास्रैः स्नेहाश्रुभिः अंधीभूतेन च
चक्षुषा उपलक्षितः ददर्श तिवा ॥ ११ ॥

भा॰ प
॥५२॥

अभिभाषणमाह ॥ अहो इत्येकादशभिः हे धर्मनंदनाः क्लिष्टं यथा भवत्येवं जीवितुं नार्हथ यद्यस्मिन्निति ॥ यत एतत् दहो कष्टं जुगुप्सितं
अहो अन्याय्यं चैतत् ॥ येनाद्यस्य विप्राः धर्माच्युतश्चाश्रयो येषां ते ॥१२॥ किंच संस्थिते मृते बालाः प्रजाः पुत्रा यस्यास्सा वधूर्ये ति दैन्यं द
र्शितं ॥ नोकेन पापस्थानिन दूती अपत्यैस्सह क्लेशान्प्राप्तेत्यर्थः ॥१३॥ कालकृतं त्वेन शोकं वारयति सर्वमिति द्वाभ्यां भवन्तामापिय हे

अहो कष्टमहोन्याय्यं यद्यूयं धर्मनंदनाः ॥ जीवितुं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः ॥१२॥ संस्थिते तिरथेयं पांडौ तथा बालप्रजा वधूः ॥ युष्मत्कृते बहून्क्लेशान्प्राप्तानोकवती मुहुः ॥१३॥ सर्वं कालकृतं मन्ये भवतां च यदप्रियम् ॥ सपालो यद्वशे लोको वायोरिव घनावलिः ॥१४॥ यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः ॥ कृष्णोस्त्री गांडिवं चापं सुहृत्कृष्णस्ततो विपत् ॥१५॥ ॥ छ ॥ ॥

यस्य वशवर्ती ॥१४॥ अहो दुर्घटघटनापटुः काल इत्याह यत्रेति ॥ कृष्णोर्जुनः अस्त्री धन्वी ॥ नतः तत्रापि विपत् पुण्यशारीरबलं
स्तत्रैव पुण्यशस्त्रदैवसंपन्नावपीत्यर्थः ॥१५॥

राम
॥५२॥

ननु कृष्णं कथं कालोतिक्रामेदित्यपेक्षायामाह ॥ नह्यस्य श्रीकृष्णस्येत्यंगुल्यानिर्देशनिविधित्सितं कर्तुमुदिष्टं यस्य विविधित्सितं यस्य विजिज्ञास
या ॥ १६ ॥ दैवतंत्रमीश्वराधीनं इदं सुखदुःखादिकं वस्य निश्चित्य तस्येश्वरस्यानुविहितः अनुवर्त्ती सन्कर्त्तारिक्तः हे नाथकुलपरंपरा
गतस्वामिन ॥ प्रभो समर्थ अनाथाः प्रजाः पाहि ॥ १७ ॥ अनुविधेयः परमेश्वरः श्रीकृष्ण एवेत्याह ॥ एष भगवान्नीश्वरः यत आद्यः

नह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितं ॥ यद्विजिज्ञासया युक्ता मुह्यंति कवयोपि हि ॥ १६ ॥ तस्मा
दिदं दैवतंत्रं व्यवस्य भरतर्षभ ॥ तस्यानुविहितोनाथा नाथ पाहि प्रजाः प्रभो ॥ १७ ॥ एष वै भगवा
न्साक्षादाद्यो नारायणः पुमान ॥ मोहयन्मायया लोकं गूढश्चरति वृष्णिषु ॥ १८ ॥ अस्यानुभावं
भगवान्वेद गुह्यतमं शिवः ॥ देवर्षिर्नारदः साक्षाद्भगवान्कपिलो नृप ॥ १९ ॥ यं मन्यसे मातुलेयं प्रि
यं मित्रं सुहृत्तमं ॥ अकरोः सचिवं दूतं सौहृदादथ सारथिं ॥ २० ॥

पुमानतश्चकुत यतो नारायणः साक्षात ॥ १८ ॥ न कुप यादयति
अस्येति अनुभावं प्रभावं ॥ १९ ॥ त्वमज्ञानाद्यमेवं मन्यसे मातुलेयं देवकाः सुतं प्रियं प्रीतिविषयं मित्रं प्रीतिकर्त्तारं ॥ सुहृत्तमं उपकार
नपेक्ष्योपकारकं च सौहृदाद्विश्वासात अकरोः कृतवानसि सचिवं मंत्रिणम ॥ २० ॥

भा॰ प्र॰
॥ ५३ ॥

नन्वीश्वरः चेत्कथं नीचे सारथ्यादौ प्रवृत्तस्तत्राह सर्वेति ॥ न तत्कृतं नीचोच्चकर्मकृतं ममयोग्यमयोग्यमयोग्यमिति मतैर्वैषम्यं क्वचिदपि नास्ति
कुतः निरवद्यस्य रागादिशून्यस्य ॥ तत्कुतः अनहंकृतेः तच्च कुतः यद्वयस्य ॥ तदपि कुतः समदृशः तत्रापि हेतुः सर्वस्यात्मनः पृथक्
हेतुहेतुमद्भावः २१ ॥ तथापि समत्वेपि हे नृप ॥ अनुकंपितमनुकंपां ॥ २२ ॥ इदानीं स्वदेहत्यागपर्यंतं श्रीकृष्णावस्थानं प्रार्थयते भ

सर्वात्मनः समदृशो ह्यद्वयस्यानहंकृतेः ॥ तत्कृतं मतिवैषम्यं निरवद्यस्य न क्वचित् ॥ २१ ॥ तथाप्येकां
तभक्तेषु पश्य भूपानुकंपितं ॥ यन्मेसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः ॥ २२ ॥ भक्त्यावेश्य मनो य
स्मिन्वाचा यन्नाम कीर्तयेत् ॥ त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः ॥ २३ ॥ स देवदेवो भगवान्प्रतीक्ष
तां कलेवरं यावदिदं हिनोम्यहं प्रसन्नहासारुणलोचनोल्लसन्मुखांबुजो ध्यानपथश्चतुर्भुजः ॥ २४ ॥

नेपगिहाभ्यां ॥ २३ ॥ यावदिति विलंबं यो न यति ॥ अहं हिनोमि त्यजामीति स्वाभेत्यर्थः दमि स्तनात्मलेन ज्ञातं ॥ प्रसन्नहासेन अरुणलोचना
भ्यां च उल्लसत् रुचिरं मुखांबुजं यस्य ध्यानस्य पंथा विषयः ॥ योन्यैरपिंसते केवलं सोऽयं तः स्थितः सन्मां प्रतीक्षतामित्यर्थः ॥ २४ ॥

राम
॥ ५३ ॥

गतं तानुकंपं वाक्यमाकर्ण्य ॥ २५ ॥ पुरुषस्वभावेन विहितान्नरजातिसाधारणान्वर्णयामासेति तृतीयेनान्वयः यथा वर्णो वर्णस्य धर्मोन्यथा
श्रमं आश्रमं आश्रमधर्मांश्च वैराग्यरागाभ्यामुपाधिभ्यां क्रमेणाम्नातं उभयं निवृत्तिप्रवृत्तिरूपं लक्षणं येषां तान् २६ पुनस्तत्रैव विशेषमाह
दानेति ॥ मोक्षधर्मान् शमदमादीन् भगवद्धर्मान् हरितोषणान् द्वादश्यादिनियमरूपान् समासव्यासौ संक्षेपविस्तारौ तेनैव योगो उ

सूत उवाच ॥ युधिष्ठिरस्तदाकर्ण्य शयानं शरपंजरे ॥ अपृछद्विविधान्धर्मान्नृषीणां चानुशृण्वतां
॥ २५ ॥ पुरुषस्वभावविहितान्यथाश्रमं ॥ वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ॥ २६ ॥ दान
धर्मान्राजधर्मान्मोक्षधर्मान्विभागशः ॥ स्त्रीधर्मान्भगवद्धर्मान्समासव्यासयोगतः ॥ २७ ॥ धर्मार्थकाम
मोक्षांश्च सहोपायान्यथा मुने ॥ नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् ॥ २८ ॥ धर्मं प्रवदतस्त
(स्य स कालः प्रत्युपस्थितः ॥ योगिनश्छंदमृत्योर्वांछितस्तूत्तरायणः ॥ २९ ॥

पायौ तु तः ताभ्यां ॥ २७ ॥ धर्मादींश्च यथाधिकारं मनिनि
यत्नोपायसहितान् ॥ यथायथावत् नानाख्यानेषु ये इतिहासाः तेषु यथासंति तथा वर्णयामासेति ॥ २८ ॥ छंदेन इच्छया मृत्युर्यस्य ॥ २९ ॥
॥ २९ ॥

सहस्रणीयुद्धेसमीपस्थानसहस्रंरथिनोनयजिपालयन्तीजितहस्रणीर्भीष्मः।सहस्रिणीरिजिपार्श्वेसहस्रांर्थ्यवतींर्गिरः।लसंतोप
नोपदेशोयस्यतस्मिन्॥अमीलितदृगेवमनोव्यधारयत्॥३०॥अनयैवविशुद्धयाधारणयाहतमशुभंयस्यसः।तस्यश्रीकृष्णेछ

त्तदोपसंहृत्यगिरःसहस्रणीर्विमुक्तसंगंमनआदिपूरुषे॥कृष्णेऽमलेलसत्पीतपटेचतुर्भुजेपुरःस्थि
तेमीलितदृग्व्यधारयत्॥३०॥विशुद्धयाधारणयाहताशुभस्तदीक्षयैवाशुगतायुधश्रमः॥निवृ
त्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टावजन्यंविसृजञ्जनार्दनं॥३१॥ ॥ छ

यादृष्ट्यैवगतआयुधश्रमोयस्यसः॥अतएवनिवृत्तः॥सर्वेन्द्रियवृत्तीनांविभ्रमः।विविधंभ्रमणंयस्मात्सः।जन्यंदेहम्॥३१॥ ॥

परमफलरूपां श्रीकृष्णे रतिं प्रार्थयितुं प्रथमं स्वकृतमर्पयति इति नानार्थमाप्युपायैर्मतिर्मनोधारणालक्षणा उपकल्पिता समर्पिता क्क सात्वतानां पुंगवे श्रेष्ठे भगवति वितृष्णा निःकामा अवितृष्णेति वा छेदः अविगतस्तर्षः विगतो भूमा यस्मात् तस्मिन् ॥ यमपेक्ष्यान्यत्र महत्त्वं नास्तीत्यर्थः ॥ तदेव परमैश्वर्यमाह स्वसुखं स्वस्वरूपभूतं परमानंदं उपगते प्राप्तस्यैव क्कचित् कदाचिद् विहर्तुं क्रीडितुं प्रकृतिं उपेयुषि स्वीकृतवति न तु स्वरूपतिरोधानेन जीववत् पारतंत्र्यमित्यर्थः विहर्तुमिति यदुक्तं तत्प्रपंचयति यतो यतः प्रकृतेर्भवप्रवाहः सृष्टिपरंपरा भवति ॥ ३२ ॥

भीष्म उवाच ॥ इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि ॥ स्वसुखमुपगते क्कचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥ ३२ ॥ त्रिभुवनकमनं तमालवर्णं रविकरगौरवरांबरं दधाने ॥ वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तु मेनवद्या ॥ ३३ ॥ ॥

इदानीं श्रीकृष्णमूर्तिं वर्णयन् रतिं प्रार्थयते त्रिभुवनकमनं त्रिलोकामेकमेव कमनीयं यत् वपुर्दधाने रतिर्मेस्त्विति संबंधः ॥ वपुः तमालवत्नीलो वर्णो यस्य तत् प्रागे: कालीनारवे: करा इव सदृशं गौरं पीतं वरं निर्मलं च अंबरं यस्मिन् तत् अलककुलैः पर्यावृतमाननाब्जं यस्मिन् तत् ॥ विजयसखे पार्थसारथौ अनवद्या अहैतुकी फलाभिसंधिरहिता रतिरस्तु ॥ ३३ ॥

भा॰प्र॰
॥५५॥

विजयमखिलमेवानुवर्णयन्नरनिप्रार्थ्यते ॥ युधियुद्धेतुरगाणां खुरजमलरगरजः । नेनविधूम्राधूसरालेपवतेविधंचः इतस्ततश्चलनःक
चाः कुंतलाः नैर्लुलितैविकीर्णश्रमवारिखेदंविडुरूपंनेनभक्तवास्तल्पद्योतकेनालंकृतमास्यंयस्यतस्मिन्श्रीकृष्णेममात्मामनः ॥ अ
स्मरमतापुनः किंमृतेममनिशितैः तीक्ष्णैः शरैर्विभिद्यमानात्वकूघस्यतस्मिन्शरैरेवविलसत्तनुद्युतककवचंयस्यतस्मिन् ॥ ३४ ॥ किं
च ॥ सपदीतिसेनयोरुभयोर्मध्येरथंस्थापयमेस्युत ॥ यावदेवमान्निरीक्ष्येहयोद्धुकामानवस्थितानितिसरव्युरर्जुनस्यवचोनिश

युधितुरजोविधूम्रंविधक्वचलुलितश्रमवार्यलंकृतास्ये ॥ ममनिशितशरैर्विभिद्यमानत्वचिविल
सत्कवचेस्तुकृष्ण आत्मा ॥ ३४ ॥ सपदिसरिववचोनिशम्यमध्येनिजपरयोर्बलयोरथंनिवेश्यस्थि
तवतिपरसैनिकायुरक्ष्णहृतवतिपार्थसरवेरतिर्ममास्तु ॥ ३५ ॥ ॥

म्यसपदितत्क्षणामेवस्वपरबलयोः सैन्ययोः मध्येस्थितेपार्थसखेरतिरस्तु ॥ तत्रस्थिलाकंतंसर्वंदर्शयति ॥ परस्यदुर्योधन
स्यसैनिकानामायुरक्षणकालदृष्ट्याहृतवति ॥ असौभीष्मः असौद्रोणः असौकर्णइत्यादितत्तत्प्रदर्शनव्याजेनदृष्ट्यैवसर्वेषाम
युरकृष्णार्जुनस्यजयंकृतवति ॥ ३५ ॥

राम
॥५५॥

नकेवलमर्जुनस्यसयन्तृतायुर्हरणेनैवजयमावहत् ॥ किंत्वविद्याहरणेनापीत्याहव्यवहितेतिदूरेस्थितायाःपृतनायास्तस्यामुखमिवमुखं
अग्रेस्थितान्भीष्मादीन्निरीक्ष्यस्वजनवधाद्विमुखस्यनिवृत्तस्य ॥ तदुक्तंगीतासुएवमुक्त्वार्जुनःसंख्येरथोपस्थउपाविशत् ॥ वि
सृज्यसशरंचापंशोकसंविग्नमानसइति ॥ कुमतिंअहंहन्तास्यादिकुबुद्धिं ॥३६॥ ममतुमहान्तमनुग्रहंकृतवानित्याहद्वाभ्यां ॥ स्वनिगमंअ
शस्त्रएवाहंसाहाय्यमात्रंकरिष्यामि ॥ इत्येवंभूतांस्वप्रतिज्ञांअपहायहित्वाश्रीकृष्णःशस्त्रंग्राहयिष्यामीतिएवंरूपांमत्प्रतिज्ञांतस

व्यवहितपृतनामुखंनिरीक्ष्यस्वजनवधाद्विमुखस्यदोषबुध्या ॥ कुमतिमहरदात्मविद्ययायश्चर
णरतिःपरमस्यतस्यमेस्तु ॥३६॥ स्वनिगममपहायमत्प्रतिज्ञामृतमधिकर्तुमवप्लुतोरथस्थः ॥ धृतरथ
चरणोभ्ययाच्चलद्गुर्हरिरिवहन्तुमिभंगतोत्तरीयः ॥३७॥ ॥

त्यांभवति ॥ तथाअधिकर्तुंयोरथस्थःसन्नवप्लुतःसहसैवावतीर्णःसन्योभ्ययात्अभिमुखमधावत्इभंहन्तुंहरिःसिंहइ
वकिंभूतः ॥ धृतोरथचरणःचक्रंयेनसःतदाचसंरंभेणगमनानुष्पनाप्रविष्टेनोदरस्थसर्वभूतभुवनभारेणप्रतिपदंचलन्ती
गौःपृथिवीयस्मात्सः ॥ तेनैवसंरंभेणपतितमुत्तरीयंवस्त्रंयस्यसःसमुकुंदोमेगतिर्भवत्वित्युत्तरेणान्वयः ॥३७॥ ॥

भा॰ प्र॰
||५६||

एवं पदाभ्ययात्त दास्मयमानस्याततायिनो धन्विनो धन्विनो मे शितैस्तीक्ष्णैर्विशिखैर्हतः अतो विशीर्णदंशः विध्वस्तकवचः क्षतजेन स्वधिरेण परिप्लुतः व्याप्तः प्रसभं बलाद्धारयंतमर्जुनमप्यतिक्रम्य मद्वधार्थमभितं सार अभिजगाम || एवं पालोकप्रतीत्या अर्जुनपक्षपाती बलक्षितः वस्तुतस्तु भक्तमेवानुग्रहीतुं वान्यत्तमम भक्तेनोक्तं वचो मा भूदित्यात्मसमभगवान्मेगतिर्भवतित्स्यर्थः ||३८|| तद्देवमम्यायेरपि मत्स्वरक्षाभ्यपेक्षणे रतिमाशास्ते विजयोऽर्जुनः तस्य रथ एव कुटुंबं अक्तस्यैरपि रक्षणीयं यस्य तस्मिन् || आत्तं तोत्रं प्रतोदो येन तस्मि

शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे || प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान्गतिर्मुकुंदः ||३८|| विजयरथकुटुंब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये || भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः स्वरूपं ||३९|| छ

न् धृता अश्वानां रश्मयः || प्रग्रहा स्तेन यस्य तस्मिन् तच्छ्रिया पार्थसारथ्यश्रिया प्रतिदृशि पश्यतः ईक्षणीये दर्शनीये भगवति तस्याः श्रियाः सारथ्यशोभमानेन मुमूर्षोर्मुमूर्षोमिच्छोः न त्वन्यां यत्र्यां ता निकामिनि रतिः पार्थ्यते अत आह नभगवति अर्धे दर्शयेत दान्हम्भु दहता सर्वेन्निरीक्ष्य स्वरूपं न तु समानं रूपं गताः प्राप्ताः इतिदिभागैः ||३९||

राम
||५६||

क्षत्रधर्मेणायुध्यमानानां स्वरूपं मा धुरित्येनं नलविवेचयतो मदांधा अपि प्रायुरित्याह ललितगतिर्विलाससंभ्रमासादि वल्गु मंजुग
त्यादिभिराक्षेपसंदीपैर्वा कल्पितकुरूमानः प्रज्ञायासां ता ॥ जनऊह्ल्केटेन मदेनांधाः अत एवानंदैकचित्तत्वेन तस्य स्कंधेक मेगावृद्धे
नोद्धरणादिकमनुकूलवत्संगोपवेध्यो यस्य प्रकृतिं स्वरूपं अगमन्नं कारलोपस्त्वाषे किल प्रसिद्धं तस्मिन्नमरतिरस्त्विति पूर्वेणान्व

ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः ॥ कृतमनुकृतवत्य उन्मदांधाः
प्रकृतिमगन्किल यस्य गोपवध्वः ॥ ४० ॥ मुनिगणनृपवर्षसंकुलेंतःसदसि युधिष्ठिरराजसूय
एषः ॥ अहह महदुपैति दीक्षणीयो मम दृशिगोचर एष आविरात्मा ॥ ४१ ॥ ॥

यः ॥ ४० ॥ जगत्स्वरूपतामनुस्मरन्नाह ॥ मुनिगणैर्नृपवर्यैश्च संकुले व्याप्ते अंतःसदसि सभामध्ये ॥ युधिष्ठिरस्य राजसूये एषं
मुनिगणादीनां ईक्षणीयः अहो रूपमहो महिमेत्येवमाश्चर्येण विलोकनीयः सन् दीक्षाय ॥ एष जगतामात्मा मम दृष्टिगोचरः ॥ दृ
ष्टिविषयः सन्नाविः प्रगटो प्रवर्त्तते ॥ अहो मे भाग्यमिति भावः ॥ ४१ ॥ ॥ छ ॥ छ ॥

भा॰ प्र॰
॥ ५१ ॥

सोहं कृतार्थोस्मीत्याह ॥ तमिममजं सम्यगधिगतः प्राप्तोस्मि ॥ सम्यक्त्वमाह विधूतभेदमोहः तदर्थं भेदस्योपाधिकत्वमाह आत्मकल्पितानां स्वयं निर्मितानां शरीरभाजां हृदि हृदि प्रतिहृदयं धिष्ठितं अधिष्ठाय स्थितं अकारलोपस्त्वार्षः ॥ नैकधा अनेकधा अधिष्ठानभेदादनेकधा भातमित्यर्थः ॥ तत्र दृष्टांतः सर्वप्राणिनां दृशं दृशं प्रति एकमेवार्कमनेकधा प्रतीतमिवेति ॥ ४२ ॥ मनोवाग्दृष्टीनां वृत्तिभिः परमा

तमिममहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानां ॥ प्रतिदृशमिव नैकधार्कमेकं समधिगतोस्मि विधूतभेदमोहः ॥ ४२ ॥ सूत उवाच ॥ कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः ॥ आत्मन्यात्मानमावेश्य सोंतःश्वास उपारमत ॥ ४३ ॥ संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले ॥ सर्वे बभूवुस्ते तूष्णीं वयांसीव दिनात्यये ॥ ४४ ॥ तत्र दुंदुभयो नेदुर्देवमानववादिताः ॥ शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ॥ ४५ ॥

त्मनि श्रीकृष्णे अंतरेव लीनः श्वासो यस्य ॥ ४३ ॥ निष्कले निरुपाधौ संपद्यमानं मिलितं आज्ञाय आलक्ष्य ॥ ४४ ॥ देवैर्मानवैश्च वादिताः एतेषां मध्ये ये साधवः अंतस्तु पर्व ॥ ४५ ॥

रा॰ म॰
॥ ५१ ॥

निर्हरणादीनि संस्कारादीनि सम्यक्कारे तस्य मुक्तस्यापीत्यर्थः ॥४६॥ ४७ ॥ पितरं धृतराष्ट्रं तपस्विनीं संतापवतीं ॥४८॥ राजा युधिष्ठिरः ॥४९॥
इति श्रीभावार्थदीपिकायां नवमोऽध्यायः ॥९॥ दशमे कृतकार्यस्य हस्तिनापुरतो हरेः स्त्रीभिः संस्तूयमानस्य वर्ण्यते द्वारकागमः ॥१॥ राज्य

तस्य निर्हरणादीनि संपरेतस्य भार्गव ॥ युधिष्ठिरः कारयित्वा मुहूर्त्तं दुःखितोऽभवत् ॥४६॥ तुष्टुवुर्मुनयो हृष्टाः कृष्णं तद्गुह्यनामभिः ॥ ततस्ते कृष्णहृदयाः स्वाश्रमान्प्रययुः पुनः ॥४७॥ ततो युधिष्ठिरो गत्वा सहकृष्णो गजाह्वयं ॥ पितरं सांत्वयामास गांधारीं च तपस्विनीं ॥४८॥ पित्रा चानुमतो राजा वासुदेवानुमोदितः ॥ चकार राज्यं धर्मेण पितृपैतामहं विभुः ॥४९॥ इतिश्री·म·प्र० युधिष्ठिरराज्यप्रलंभो नाम नवमोऽध्यायः ॥ शौनक उवाच ॥ हत्वा स्वऋक्थस्पृध आततायिनो युधिष्ठिरो धर्मभृतां वरिष्ठः ॥ सहानुजैः प्रत्यवरुद्धभोजनः कथं प्रवृत्तः किमकार्षीत्ततः ॥१॥

प्रकारे त्वुक्तं तत्र पृच्छति ॥ हत्वेति ॥ स्वऋक्थे धने स्पर्द्धिनः स्म
येनेतथा ॥ यद्वा ॥ स्वऋक्थाय स्पर्द्धते संग्रामो येषां ॥ अत एव धनादिहरणादाततायिनः तान्हत्वा प्रत्यवरुद्धभोजनः बंधुवधदुःखेन
संकुचितभोगः राज्यलाभेन प्राप्तभोगो वा ॥ कथं राज्ये प्रवृत्तः प्रवृत्तो वा ततः किमकार्षीत् ॥१॥ ॥ ॥

भा॰प्र॰
॥५८॥

राजप्रवृत्तौ श्रीकृष्णस्य प्रीतिं पर्यालोच्य प्रवृत्त इत्याशयेनोत्तरमाह ॥ कुरोर्वंशं संरोहयित्वा परीक्षिद्रूपेणांकुरितं कृत्वा कथंभूतं वंशं वंशदवाग्निनिर्हृतं वंश एव दवो वनं तस्मादुद्भूतो यः क्रोधरूपोऽग्निः तेनानुनिर्हृतं नेदं स्वधर्मं निजराज्ये निवेश्य च ॥१॥ प्रवृत्तौ हेतुमुक्त्वा किमकार्षीदित्यस्योत्तरमाह निशम्येति ॥ प्रवृत्तं यद्विज्ञानं परमेश्वराधीनं जगन्नास्वतंत्रं इत्येवंभूतं तेन विधूतो विभ्रमो अहो कर्तृत्वंभूतो मोहो यस्य सः अजिते

सूत उवाच ॥ वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवभावनो हरिः ॥ निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह ॥२॥ निशम्य भीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः ॥ शशास गामिंद्र इवाजिताश्रयः परिध्युपांतामनुजानुवर्तितः ॥३॥ कामं ववर्ष पर्जन्यः सर्वकामदुघा मही ॥ सिषिचुः स्म व्रजान्गावः पयसोधस्वतीर्मुदा ॥४॥ ॥ ७

एतु वर्तितः सेवितः सन् अजितः श्रीकृष्ण एव आश्रयो यस्य सः परिधिः समुद्रः तत्पर्यंतां गां पृथ्वीं पालयामास ॥३॥ तस्य तत्त्वमनुवर्णयति कामममिति त्रिभिः । मही सर्वकामदोग्ध्री बभूव ॥ अजा गावोऽत्रानिह धस्वतीः ऊधस्वत्यः । ऊधः क्षीराशयः तद्वत्यः स्थूलोधस इत्यर्थः शिषिचुः अभ्यषिंचन् ॥४॥ ॥

राम
॥५८॥

अन्वृतु ऋतावृतौ ॥ ५ ॥ आधयो मनोव्यथाः व्याधयो रोगाः क्लेशाः शीतोष्णादिकृताः दैवं च भूतानि च आत्मा च हेतुर्येषां आधिदैवि
कादीनां ते जंतूनां नाभवत ॥ ६ ॥ इदानीं द्वारकागमनं निरूपयितुमाह उषित्वेति स्वसुः सुभद्रायाः ॥ ७ ॥ तं युधिष्ठिरं ॥ ८ ॥ युयुत्सुः धृ

नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः ॥ फलंत्योषधयः सर्वाः काममन्वृतु तस्य वै ॥ ५ ॥ नाधयो व्या
धयः क्लेशा दैवभूतात्महेतवः ॥ अजातशत्रावभवन् जंतूनां राज्ञि कर्हिचित् ॥ ६ ॥ उषित्वा हास्तिनपु
रे मासान्कतिपयान्हरिः ॥ सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ॥ ७ ॥ आमंत्र्य चाभ्यनुज्ञातः
परिष्वज्याभिवाद्य तं ॥ आरुरोह रथं कैश्चित्परिष्वक्तोभिवादितः ॥ ८ ॥ सुभद्रा द्रौपदी कुंती विराटतन
या तथा ॥ गांधारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ॥ ९ ॥ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः
न सेहिरे विमुह्यंतो विरहं शार्ङ्गधन्वनः ॥ १० ॥

तराष्ट्रस्य वैश्यायां जातः गौतमः कृपः यमौ नकुलसहदेवौ ॥ ९ ॥ अ
न्याश्च स्त्रियः मत्स्यसुता उत्तरा तस्याः पुनर्ग्रहणं गर्भरक्षकश्रीकृष्णविरहे मोहाधिक्यात् ॥ यद्वा मत्स्यसुता सत्यवती ॥ १० ॥ ॥ ७

तेषां श्रीकृष्णविरहासहने कैमुत्यन्यायेनाह सत्संगादिति द्वाभ्यां सतां संगाद्धेतोर्मुक्तः पुत्रादिविषयो दुःसंगो येन सः सद्भिः कीर्त्यमानं रुचिकरं यस्य यशः सकृदप्याकर्ण्य सत्संगं त्यक्तुं न शक्नोति ॥११॥ दर्शनादिभिस्तस्मिन्नृ श्रीकृष्णे न्यस्तात्मनस्ता धीर्येषां ते ॥१२॥ अत एवानिमिषैर्नेत्रैः तमेव वीक्ष्यमाणाः तत्र तत्राहेणानयनाद्यर्थं च चलंति स्म यतः स्नेहेन सम्यक् बद्धाः अत एव तमनु द्रुतानि अनुगतानि

सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः ॥ कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनं ॥११॥ तस्मिन्न्यस्तधियः पार्थाः सहेरन् विरहं कथं ॥ दर्शनस्पर्शसंलापशयनासनभोजनैः ॥१२॥ सर्वे तेऽनिमिषैरक्षैस्तमनु द्रुतचेतसः ॥ वीक्षंतः स्नेहसंबद्धा विचेलुस्तत्र तत्र ह ॥१३॥ न्यरुंधन्नुद्गलद्बाष्पमौत्कंठ्याद्देवकीसुते ॥ निर्यात्यगारान्नोऽभद्रमिति स्याद्बांधवस्त्रियः ॥१४॥ मृदंगशंखभेर्यश्च वीणापणवगोमुखाः ॥ धुंधुर्यानकघंटाद्या नेदुर्दुंदुभयस्तदा ॥

चेतांसि येषां ते ॥१३॥ आगारान्निर्याति निर्गच्छति सति औत्कंठ्याद्धेतोः उद्गलत् उल्लसत् बाष्पं अश्रु न्यरुंधन् नेत्रेष्वेव स्तंभितवत्यः तत्र हेतुः ॥ अभद्रं नो स्यात् अमंगलं मा भूदित्येतदर्थम् ॥१४॥ मृदंगादयो दशवाद्यभेदाः ॥१५॥

प्रेमव्रीडास्मितयुक्तमीक्षणं यासां ताः ॥२६॥ गुडाका निद्रा तस्या ईशः जितनिद्रोऽर्जुनः ॥२७॥ व्यजने चामरे स्वजग्गृहतुः मधुपतिः श्रीकृष्णः ॥२८॥ सत्याः श्रीकृष्णे नासामप्यभिचारात् किंतु नानुरूपाश्च निर्गुणस्य परमानंदस्य सुखी भवेत्यादयो नानु

प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया ॥ ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः ॥२६॥ सितातपत्रं जग्राह मुक्तादामविभूषितं ॥ रत्नदंडं गुडाकेशः प्रियः प्रियतमस्य ह ॥२७॥ उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते ॥ विकीर्यमाणः कुसुमैरेजे मधुपतिः पथि ॥२८॥ अश्रूयंताशिषः सत्यास्तत्र तत्र द्विजेरिताः ॥ नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः ॥२९॥ अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसां ॥ कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥२०॥ ॥ ॥ छ ॥ ॥

रूपाः गुणात्मनो मनुष्यनाट्यावतारेऽनुरूपाश्च स्वधर्मसंधिराजेषः ॥२९॥ सर्वेषां श्रुतीनां मनोहरः ॥ उपनिषदोऽपि मूर्तिमत्यः सत्य
लीसंजल्पमम्पानंदन्निस्वधी ॥२०॥

भा॰ प्र॰
॥ ६० ॥

त्रतेजसौंदर्य्याद्यतिशयेनविस्मिताभ्यः सखीभ्योन्यास्त्रियः कथयंतिनात्रविस्मयः कार्यः साक्षादीश्वरत्वादस्येतिसर्वाइतिचतुर्भिः ॥ वेस्मरणे
किलेतिप्रसिध्यागमाणद्योतकं ॥ यएकएवाद्वितीयः पुरुषः आसीत्सएवायंश्रीकृष्णः कुत्रासीत् अविशेषे आत्मनिप्रपंचेवनिजस्वरूपे
कदाअग्रेगुणेभ्यः गुणक्षोभात् पूर्वंनयानिशिप्रलयेचतत्स्थलक्षणंजगतामात्मनिजीवेनिमीलितात्मनि निमीलितात्मन्निलितिलुप्तसम्प
त्पदंजाताविकवचनंइश्वरेलीनरूपेषुजीवेषुसत्स्वित्यर्थः ॥ ननुजीवानांब्रह्मत्वान्नकथंलयस्तत्राह ॥ सुप्तासुसक्तिषुसतीषुजीवोपा

**स्त्रीयऊचुः ॥ सवैकिलायंपुरुषः पुरातनोयएकआसीदविशेषआत्मनि ॥ अग्रेगुणेभ्योजगदात्मनीश्व
रेनिमीलितात्मन्निशिसुप्तशक्तिषु ॥ २१ ॥ सएवभूयोनिजवीर्यचोदितांस्वजीवमायांप्रकृतिंसिसृक्षतीं
अनामरूपात्मनिरूपनामनीविधित्समानोनुससारशास्त्रकृत ॥२२**

धिभूतसत्वादिशक्तिलयएवजीवलयइत्यर्थः ॥ २१ ॥ तदेवंसंस्तनेरादौप्रलयानंतरंचनिष्प्रपंचावस्थानमुक्त्वासृष्टिप्रलयोर्मध्येसप्रपंचा
वस्थानमाह ॥ सएवाप्रच्युतस्वरूपस्थितिरेवप्रकृतिं अनुससार ॥ अधिष्ठितवान्भूयः पुनः सृष्टिप्रवाहस्यानादित्वात्कीदृशीनिजवीर्यचो
दितां स्वकालशक्तिप्रेरितांस्वांसम्भूतानांजीवानांमायांमोहिनीअतएवसिसृक्षंतीस्रष्टुमिच्छंतीकिमर्थमनुससार ॥ अनामरूपे आत्मनिजी
वेरूपनामनीविधातुमिच्छन् उपाधिसृष्ट्याजीवानांभोगायेत्यर्थः कर्माणिचविधातुंवेदान्कृतवानित्याह ॥ शास्त्रकृदिति ॥ २२ ॥

राम
॥ ६० ॥

अस्य दर्शनमतिदुर्लभमस्माभिर्लब्धमित्याहुः स वै अयं यस्य परं स्वरूपं अंघ्रिं वा निर्जितो मातरिश्वा प्राणो यैः हृत्स्थस्वमार्गे तेस्त्स्य
एव पश्यंति ॥ केन भक्त्या उत्कलितेन उत्कंठितेन अमलो य आत्मा बुद्धिस्तेन हृद्यपे तत्र ध्यायाबुध्येति व्यक्तमे ॥ बुद्धिं वै मलस्य स्वाप्पं यमेन
हेतुरित्याहुः ननु हे सखि एष एव सत्त्वं बुद्धिं परिमार्ष्टुं सम्यक् शोधयितुं अर्हति ननु योगाद्यस्य इत्यर्थः ॥ यद्वा नु अहो एष सत्त्वं

स वा अयं यत्पदमत्र सूरयो जितेंद्रिया निर्जितमातरिश्वनः ॥ पश्यंति भक्त्युत्कलितामलात्मना
नन्वेष सत्त्वं परिमार्ष्टुमर्हति ॥ २३ ॥ स वा अयं सख्यनुगीतसत्कथो वेदेषु गुह्येषु च गुह्यवादिभिः
य एक ईशो जगदात्मलीलया सृजत्यवत्यत्ति न तत्र सज्जते ॥ २४ ॥ ॥ छ ॥ ॥ छ ॥

ज्ञानं परिमार्ष्टुं नाशयितुं दृग्गमनेन न अप्रत्यक्षीभवितुं नार्हतीति किं त्वनेन सहैव गंतव्यमित्यर्थः ॥ २३ ॥ पुण्यश्लोकं आमाहुः हे सखि
यो वेदेषु रहस्यागमेषु च रहस्यनिरूपकैरनुगीतः ॥ सत्कथः अन्वनुगीताः सत्यः कथा यस्य सर्वासां गानप्रकारमाहुः ॥ य एक ई
श इत्यादि ॥ २४ ॥

एवंभूतस्य नानावतारे कारणमाह ॥ यदा हीति तमोव्याप्ताधीर्ययां तेनत्पायदा ॥ अधर्मेणाजीवंति केवलं प्राणान्नपुष्णंति ॥ तत्र तदा एष एव भगवा-
न् पृथिव्यै सत्त्वतः ॥ विशुद्धसत्त्वरूपेण सत्त्वेन रूपाणि दधत् भगादीनि धत्ते प्रकटयति युगे युगे तत्र ह्यवसरे भगं ऐश्वर्यं सत्यं सत्यप्रतिज्ञत्वं ॥ ऋतं
यथार्थोपदेशकत्वं ॥ दयां भक्तकृपां यशः अद्भुतकर्मत्वं ॥ २५ ॥ विशेषतः श्रीकृष्णावतारे सौभाग्यं वर्णयंति ॥ अहो इति पंचभिः यद्यस्माद्येव :

यदा ह्यधर्मेण तमोधियो नृपा जीवंति तत्रैव हि सत्त्वतः किल ॥ धत्ते भगं सत्यमृतं दयां यशो भवाय रू-
पाणि दधद्युगे युगे ॥ २५ ॥ अहो अलं श्लाघ्यतमं यदोः कुलं अहो अलं पुण्यतमं मधोर्वनं ॥ यदेष पुं-
सामृषभः श्रियः प्रियः स्वजन्मना चंक्रमणेन चांचति ॥ २६ ॥ ॥ छ ॥ ॥

पुरुषोत्तमः श्रियः प्रियः पतिः स्वजन्मना यदोः कुलं अंचति पूजयति सत्करोति ॥ अतः श्लाघ्यतमं नतं ॥ चंक्रमणेन च मधोर्वनं मथुरं
सत्करोति अतस्तत्पुण्यतममिति ॥ तमवर्धस्यापि असंभाति श्राये अलमिति नत्राप्याश्चर्ये अहो इत्युक्तम् ॥ २६ ॥ ॥ छ

अहोबतआश्चर्यं किंनतत्॥ कुशस्थलीद्वारकास्वर्गउत्कृष्टइतिउच्यशसस्यतिरस्कारीपरिभवकर्त्रीभुवश्चपुण्ययशःकर्त्रीभवति॥ यस्
सः यत्रस्थाः सर्वाः प्रजाः स्वानुग्रहेणाईषितंप्रेषितंस्मितंदृष्टावलोकोयस्यतं॥ यद्वा॥ अनुग्रहार्थमिषितंदृष्टंस्वस्यात्मनःपतिंश्रीकृष्णं
नतुपित्रादिवद्दृष्टंमात्रपानिनिसंपश्यंतिस्मउषितमितिपाठःस्वानुग्रहार्थमुषितंकृतंनिवासंनेनतस्वर्गेतस्यातीस्यर्थः॥२७॥ हेसखि अ

अहोबतस्वर्यशसस्तिरस्करीकुशस्थलीपुण्ययशस्करीभुवः। पश्यंतिनित्यंयदनुग्रहेषितंस्मिता
वलोकंस्वपतिंस्मयत्प्रजाः॥२७॥ नूनंव्रतस्नानहुतादिनेश्वरः॥ समर्चितोह्यस्यगृहीतपाणिभिः॥
पिबंतियाः सख्यधरामृतंमुहुर्व्रजस्त्रियः संमुमुहुर्यदाशयाः॥२८॥ ॥छ॥ ॥ ॥

स्यगृहीतपाणिभिः॥ पत्नीभिरीश्वरोयमेवनूनंजन्मांतरेषुसमर्चितः यस्मिन्नधरामृतेआशयश्चित्तंयासांताः संमोहंप्रापुरितिमनोह
रत्वमुक्तं॥२८॥ श्रीकृष्णः॥ ॥ ॥छ॥ ॥छ॥ ॥२८॥ ॥२८॥

एतत्प्रपंचयति द्वाभ्यां वीर्यप्रभाव एव शुल्कं मूल्यं तेन शुष्मिणो बलिष्ठान् प्रद्युम्नश्च सांबश्च अंबश्च सुता यासां रुक्मिणीजांबवतीनाग्नजितीनां
ता आदिर्यासां सत्यभामादीनां ताः ॥ याश्चापराः ॥ अस्य श्लोकस्योत्तरश्लोकेनान्वयः ॥२९॥ एताः स्त्रीत्वमेव परं केवलं साधु शोभनं कुर्वते किं च

या वीर्यशुल्केन हृताः स्वयंवरे प्रमथ्य चैद्यप्रमुखान् हि शुष्मिणः प्रद्युम्नसांबांबसुतादयोऽपरा याश्चा
हृता भौमवधे सहस्रशः ॥२९॥ एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बत साधु कुर्वते ॥ यासां
गृहात्पुष्करलोचनः पतिर्न जात्वपैत्याहृतिभिर्हृदि स्पृशन् ॥३०॥ एवंविधा गदंतीनां स गिरः
पुरयोषितां ॥ निरीक्षणेनाभिनंदन्सस्मितेन ययौ हरिः ॥३१॥ ॥

तत्स्त्रीत्वं अपास्तं गतं पेशलं भद्रं स्वातंत्र्यं यस्मात्तत् निरस्तं शौचं शुद्धित्वं यस्मात्तत् यासां गृहात् अपि जातु कदाचिदपि नापैति न निर्गच्छति आहृति
भिर्व्याहारैः पद्मापारिजातादिप्रियवस्त्वाहरणैः हृदि स्पृशन् आनंदयन् ॥३०॥ एवंविधा विचित्राः गिरः सस्मितेन निरीक्षणेनाभिनं
दन् सहरिर्ययौ ॥३१॥ ॥

मधुद्विषोपिगोपीथायरक्षणायस्नेहासरेम्पः शत्रुम्पः शंकितः सन्नूयायुंक्तहस्त्यश्वरथपादातंत्सेनांगस्याच्चतुर्विधमितिसैवचतुरंगि
णीदृतनां सेनां ॥ ३२ ॥ पांडोकुरुवंशजत्वात्सांडवाअपिकौरवाएवतारपिथेरुद्धवादिभिः सह ॥ ३३ ॥ कुरुक्षेत्रंकुरुदेशांतरगतमेवक्रमोः

आजातशत्रुः स्तनंगोपीत्यायमधुद्विषः परेम्पः शंकितः स्नेहात्सायुंक्तचतुरंगिणी ॥ ३१ ॥ अथदू
रागतान्शौरिः कौरवान्विरहातुरान ॥ सन्निवर्त्यदृढंस्निग्धान्स्वायान्स्वनगरीं विपेः ॥ ३२ ॥ कुरुजां
गलपांचालान् ॥ शूरसेनान्सयामुनान् ॥ ब्रह्मवर्त्तंकुरुक्षेत्रंमत्स्यान्सारसनानथ ॥ ३४ ॥ मरुधन्वम
तिक्रम्यसौवीराभीरयोः परान् ॥ आनर्त्तान्भार्गवोयागाच्छ्रांतवाहोमनाग्विभुः ॥ ३५ ॥ ॥

त्नतविवक्षितः ॥ ३४ ॥ मरुर्निरुदकोदेशः धन्वोत्सोदकः आनर्त्तोस्योद्वारकादेशः सविभुः उपागात्प्राप्तः हेभार्गवमनाकुईषतश्रांता
वाहनायस्यसः ॥ ३५ ॥ श्रीरामायनमः ॥ श्रीकृष्णः ॥ ७ श्रीगोविंदाय॥ ७ ७

तत्रतत्रतीदेशे ॥ तत्रस्थैर्जनैः प्रत्युद्यतानिनिवेदितान्यर्हणानिउपायनानियस्मैसः ॥ सायमपराह्नेपश्चिमांदिशंभेजेप्राप्तः तदागविष्टः स्वर्गस्थः सूर्यः गोउदकंगतःप्रविष्टः अस्तंगतइत्यर्थः ॥ अप्सुवाएषप्रातःरुदेत्ययः सायंप्रविशतीतिश्रुतेः ॥ यद्वातदासायंकालेजातेरथादवतीर्य गविष्टः भूमौस्थितः ॥ गांउदकंजलाशयंगतः सन् ॥ पश्चाद्दिशंसायंसंध्यांभेजेउपासितवान् ॥ ३६ ॥ अथमेदशमः ॥ १० ॥ आनर्त्तान्सउपव्रज्य

तत्रतत्रहतत्रस्थैर्हरिः प्रद्युम्नार्हणाः ॥ सायंभेजेदिशंपश्चात्गविष्टोगांगतस्तदा ॥ ३६ ॥ इतिश्री भागवतेमहापुराणेमः स्कन्धोध्यायः ॥ सूतउवाच ॥ आनर्त्तान्सउपव्रज्यस्वृद्धान्जनपदान्स्वकान् ॥ दध्मौदरवरंतेषांविषादंशमयन्निव ॥ १ ॥ छ छ ॥

स्वपुरीनिर्विश्यवंधुभिः एकादशेरतिः सम्यक्कृयाद्वैवद्वारस्यवर्ण्यते ॥ १ ॥ उत्सवैरुच्चलत्सौरमुंदच्चतूध्वजतोरणांउल्लसद्रत्नदीपालिस्वपुरंम धुराविशत्सद्वानसमद्वानसमद्वान्दरवरंशंखोत्तमंपांचजन्यंदध्मौवादितवान् ॥ १ ॥ छ ॥

दरः शंखः उच्चकाशे शुभ्रमेधवलमुदरं यस्य उरुक्रमस्याधरस्य शोणागुणाः ॥ तेन शोणिमा यस्य सः सकथमुच्चकाशे अब्जखंडे रक्तकमलसमूहे कलहंसो
राजहंसः उच्चशब्दो यद्वा नदन् ॥ २ ॥ जगतो यद्भयं तस्य भयावहे ॥ प्रत्युद्ययुः प्रत्युजग्मुः भर्तुर्दर्शने लालसा औत्सुक्यं यासां ताः ॥ ३ ॥ तत्र तस्मिन् श्रीकृष्णे
उपनीताः समर्पिताः ॥ बलय उपायनानि याभिः ताः निरपेक्षेऽपि तस्मिन्नादरेण तत्समर्थे होऽदृष्टांतः रवेर्दीपमिव निपितरं अर्भका इव तं सर्वसुहृदम्

समुच्चकाशेधवलोदरोप्युरुक्रमस्याधरशोणशोणिमा ॥ दध्मायमानः करकंजसंपुटे यथाब्जखंडे कलहंस उत्स्वनः ॥ २ ॥ तमुपश्रुत्य निनदं जगद्भयभयावहं ॥ प्रत्युद्ययुः प्रजाः सर्वा भर्तृदर्शनलालसाः ॥ ३ ॥ तत्रोपनीतबलयो रवेर्दीपमिवादृताः ॥ आत्मारामं पूर्णकामं निजलाभेन नित्यदा ॥ ४ ॥ प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्गदया गिरा पितरं सर्वसुहृदमवितारमिवार्भकः ॥ ५ ॥

वितारं रक्षितारं पुत्रेणान्वयः सुहृत्त्वे नैवावितारं न तु कामेन अत्र हेतुः आत्मारामं तत्रापि हेतुः परमानंदनिजस्वरूपलाभेनैव पूर्णकामं ॥ ४ ॥ ॥ ५ ॥ ॥

किं मूचुरेतदित्याह नताः स्मेति विरिंच्यो ब्रह्मा वैरिंच्याः सनकादयः ॥ इह संसारे परं क्षेममिच्छतां परायणं परमं शरणं कुतः परेषां ब्रह्मादीनां प्रभुरपि
कालो यत्र प्रभुर्न भवेत् ॥६॥ अतः भवाय उद्भवाय नोऽस्माकं त्वं भव हे विश्वभावन कृतिनः कृतार्थाः बभूविम जाता वयं ॥७॥ कृतार्थत्वमेवाह

वैरिंच्य

नताः स्म ते नाथ सदांघ्रिपंकजं विरिंचवैरिंच्यसुरेंद्रवंदितं ॥ परायणं क्षेममिहेछतां परं न यत्र कालः प्रभवेत्परः प्रभुः ॥६॥ भवाय नस्त्वं भव विश्वभावन त्वमेव माताथ सुहृत्पतिः पिता ॥ त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम ॥७॥ अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनं ॥ प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगं ॥८॥ ॥

अहो भवता वयं सनाथाः स्म यस्मात्तव रूपं पश्येम त्रैविष्टपानामपि दूरे दर्शनं यस्य तत् ॥ देवानामपि दुर्लभमित्यर्थः प्रेम्णा यत्स्मितं तद्युक्तं
स्निग्धं निरीक्षणं यस्मिंस्तत् आननं यस्मिंस्तत् सर्वसौभगं सुभगं ॥८॥ ॥

अमुकइवसकरुरामाक्रुः पाहि यदा ॥ भो अंबुजाक्ष नो भवानि पाठे नइत्यनादरे षष्ठी ॥ यस्मात् ॥ अनादृत्य अपससार अपहाय जगाम कुरून्हस्ति
नापुरं मधून्मथुरां वा तत्र नदा रविविना आंध्या दृक्ष्णोर्यथा एवं तव नस्त्वदीयानामस्माकमपीत्यर्थः ॥ ९ ॥ इति च एवं विधाः अन्याश्चोदीरिता

यद्यंबुजाक्षापससारभो भवान्कुरून्मधून्वाथसुहृद्दिदृक्षया ॥ नत्राब्दकोटिप्रतिमः क्षणोद्भवेद्रविंविनाक्ष्णोरिवनस्तवाच्युत ॥ १९ ॥ कथं वयं नाथ विशोषिते त्वयि प्रसन्नदृष्ट्याखिलतापशोषणं जीवाम ते सुंदरहासशोभितं ह्यपश्यमाना वदनं मनोहरं ॥ २० ॥ इति चोदीरिता वाचः प्रजानां भक्तवत्सलः ॥ शृण्वानोनुग्रहं दृष्ट्या वितन्वन्प्राविशत्पुरीं ॥ २१ ॥ मधुभोजदशार्हार्हकुकुरांधकवृष्णिभिः ॥ आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ॥ २२ ॥ सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः ॥ उद्यानोपवनारामैर्वृतपद्माकरश्रियम् ॥ २३ ॥

वाचः शृण्वन्दृष्ट्या ॥ सानिंदावलोकनेनानुग्रहं कुर्वन्पुरीं द्वारकां ॥ २१ ॥
तां पुरीं स्तौति पंचभिः ॥ स्वतुल्यबलैर्मधुभोजादिभिर्गुप्तां ॥ २२ ॥ सर्वेषु ऋतुषु सर्वे विभवाः पुष्पादिसंपदो येषां ते पुण्यवृक्षाः । लताश्र
माः लतानां उपाश्रयेषु नेरुधाना दिभिर्वृता ये पद्माकराः सरांसि तैः श्रीः शोभा यस्यां तां उद्यानं फलप्रधानं उपवनं पुष्पप्रधानं आराम क्री
डार्थं वनं ॥ २३ ॥

गोपुरं पुरद्वारं द्वारं गृहद्वारं कृतानि कौतुकेनोत्सवेन तोरणानि यस्यां तां॥ गरुडादिचिह्नैरंकिता ध्वजाः जयप्रदर्पत्रांकिताः पताकाः वीत्राणा ध्वजप
ताकानामग्रैरंतः प्रतिहत आतपो यस्यां तां॥१३॥ संमार्जितानि नीः सारितरजस्कानि महामार्गाः राजमार्गाः रथ्याः इतरमार्गाः आपणकाः पश्य

गोपुरद्वारमार्गेषु कृतकौतुकतोरणां॥ चित्रध्वजपताकाग्रैरंतः प्रतिहतातपां॥१३॥ मार्जितमहामा
र्गरथ्यापणकचत्वरां॥ सिक्तां गंधजलैरुप्तां फलपुष्पाक्षतांकुरैः॥१४॥ द्वारि द्वारि गृहाणां च दध्य
क्षतफलेक्षुभिः॥ अलंकृतां पूर्णकुंभैर्बलिभिर्धूपदीपकैः॥१५॥ निशम्य प्रेष्ठमायांतं वसुदेवो महा
मनाः॥ अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः॥१६॥ प्रद्युम्नश्चारुदेष्णश्च सांबो जांबवतीसुतः
प्रहर्षवेगोच्छशितशयनासनभोजनाः॥१७॥ ॥१७॥ ॥ छ

वीथयः॥ चत्वराण्यंगणानि फलादिभिरुप्तां अवकीर्णां॥१४॥ प्रेष्ठं अंतरात्मानं आयांतं निशम्य श्रुत्वा वसुदेवादयः प्रत्युज्जग्मुरिति चतु
र्थेनान्वयः॥१६॥ प्रकर्षवेगेन उच्छशितानि उल्लंघितानि शयनादीनि यैस्ते॥ रा शा लुतगतौ॥१७॥ ॥ छ

वारणेंद्रं मंगलार्थं पुरतः कृत्वा ससुमंगलपुष्पादियुक्तपाणिभिः ॥ ब्रह्मघोषो मंत्रपाठः प्रणयेन स्नेहेन आगतं साध्वसं संभ्रमो येषां ते ॥ १८ ॥
वारमुख्या नरादयश्च प्रत्युज्जग्मुः । लसत्कुंडलैर्निर्भातानि यानि कपोलानि तैर्वदनेषु श्रीर्यासां ताः ॥ वारमुख्या नर्तक्यो वेश्या इति यावत् ॥ १९ ॥
अद्भुतानि चेति चकारस्य वंदिनश्चेत्यन्वयः नटा नवरसाभिनयचतुराः नालाटानुसारेण नृत्यंतो नर्तकाः गंधर्वा गायकाः । सूताः पौराणिकाः सू-

वारणेंद्रं पुरस्कृत्य ब्राह्मणैः ससुमंगलैः ॥ शंखतूर्यनिनादेन ब्रह्मघोषेण चादृताः ॥ प्रत्युज्जग्मू रथैर्हृष्टाः
प्रणयागतसाध्वसाः ॥ १८ ॥ वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः ॥ लसत्कुंडलनिर्भातकपो-
लवदनश्रियः ॥ १९ ॥ नटनर्तकगंधर्वाः सूतमागधवंदिनः ॥ गायंति चोत्तमश्लोकचरितान्यद्भुतानि
च ॥ २० ॥ भगवांस्तत्र बंधूनां पौराणामनुवर्तिनां ॥ यथाविध्युपसंगम्य सर्वेषां मानमादधे ॥ २१ ॥ छ ॥

ता मागधा वंशशंसकाः ॥ वंदिनस्त्वमलप्रज्ञाः प्रस्तावसदृशोक्तयः ॥ इति ते सर्वे गायंति चेति चकारस्यान्वयः ॥ २० ॥ यथाविधि यथा विधिपैः सह
यथोचितैस्तैस्तथा समागमं कृत्वा सर्वेषां मानं कृतवानित्यर्थः ॥ २१ ॥ ॥ छ ॥ छ ॥ छ ॥ छ ॥

भा॰प्र॰
॥६६॥

नदाह प्रह्वेति ॥ प्रह्वनं शिरसा नतिः । अभिवादनं वाचा नतिः आश्वासस्याभयं दत्त्वाश्वपाकानभिव्याप्य वैरैरभीष्टदानैश्च मानं कृतवान् ॥ स्व
अन्यैश्च वेदिभिश्च ॥२३॥ तस्य सत्रेण न महानुत्सवो यासां ता ॥२४॥ यत् यस्मात् नित्यं सदा अच्युतं निरीक्ष्यमाणानामपि दृशो
नैव तृप्यन्ति ॥ अत आहरुद्धः कथंभूतं श्रियः शोभायाः धामस्थानं अंगं यस्य तं ॥२५॥ एवं देवाभिनयेनाह श्रियो लक्ष्म्याः

प्रह्वाभिवादनाश्लेषकरस्पर्शैस्मिनेक्षणैः ॥ आश्वासयच्चाश्वपाकेभ्यो वैरेभ्यश्चाभिमतैर्विभुः ॥२२॥ स्व
यं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि ॥ आशीर्भिर्युज्यमानोऽन्यैर्वेदिभिश्चाविशत्पुरं ॥२३॥ राजमा
र्गगते कृत्स्ने द्वारकायाः कुलस्त्रियः ॥ हर्म्याण्यारुरुहुर्विप्रजनरीक्षणमहोत्सवाः ॥२४॥ नित्यं निरी
क्ष्यमाणानां यदपि द्वारकौकसां ॥ न वितृप्यन्ति हि दृशः श्रियो धामांगमच्युतं ॥२५॥ श्रियो निवासो य
स्योरः पानपात्रं मुखं दृशां ॥ बाहवो लोकपालानां सा

यस्योरः वक्षः निवासः । यस्य मुखं सर्वप्राणिनां दृशां सौन्दर्यामृतपानाय
पात्रं यस्य बाहवो लोकपालानां निवासः सारंस्त्रीकृष्णं गायंतीति सारंगा भक्ताः तेषां यस्य सर्वांबुजं निवासः तं निरीक्षमाणानां दृश इति शे
षेणान्वयः ॥२६॥

राम
॥६६॥

सितेनेरातपत्रव्यजनैरुपस्कृतो मंडितः ।। अर्कश्चउडुपो नक्षत्रसहितश्चंद्रश्च चापमिंद्रधनुश्च वैद्युतं विद्युत्तेजश्च तैः अर्कश्छत्रस्योपमानां नक्षत्रा
णि पुष्पवृष्टेः ।। चंद्रः परिभ्रमत्तन्मंडलाकारयोश्चामरव्यजनयोः ।। चापं वनमालायाः विद्युत्तेजः पिशंगवाससोः अद्भुतोपमेयं यथा घन
स्योपरि सूर्यबिंबं उभयतः चंद्रो सर्वतो नक्षत्राणि ।। मध्ये च मिलितं चापद्वयं स्थिरं विद्युत्तेजश्च यदि भवेत्तर्हि स घनो यथा भाजित्तथा

सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि ।। पिशंगवासा वनमालया बभौ घनो यथार्कोडुपचापवैद्युतैः ।। २७ ।। प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ।। ववंदे शिरसा सप्त देवकीप्रमुखा मुदा ।। २८ ।। ताः पुत्रमंकमारोप्य स्नेहस्नुतपयोधराः ।। हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ।। २९ ।। अथाविशत्स्वभवनं सर्वकाममनुत्तमं ।। प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ।। ३० ।।

हरिर्बभौ ।। २७ ।। देवकीप्रमुखाः सप्त ववंदे इति मातॄणां दर्प्यादादर्शविशेषज्ञापनार्थमुक्तं अष्टादशापि देवस्य भार्या मातरस्तु सप्त्वाल्पमस्त
ना ।। २८ ।। २९ ।। सहस्राणि च षोडशेति चकारादष्टोत्तरशताधिकानीति हेयमित्यर्थः ।। ३० ।।

प्रोष्य देशांतरे उषित्वा ॥ आराद्दूरादेव विलोक्य संजातो मनसि महोत्सवो यासां ता ॥ आसनादाशयाच्च ॥ आसनाद्देहेनोत्तस्थुः आशयात्कारणं तस्मात् हृद्यात्मना उत्तस्थुः ॥ श्री कृष्णेनात्मनः संश्लेषं तत्करणात्मवधानमपिनासहंते स्यर्थः ॥ व्रीडितानि लोचनान्याननानि च यासां ता ॥ अपांगैरेव वीक्षणात् ॥ व्रीडितमलोचनाः अवनतमुखत्वाद्व्रीडिताननाः ॥ शाकं व्रतैरिति हास्यक्रीडादिवर्ज्जनादिनियमार्पिताभ्य उत्तस्थुरित्यर्थः ॥ धृतव्रता एवोत्तस्थुरिति वा ॥ व्रतानि यास्तत्वक्रीयोक्तानि क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनं हास्यं परगृहे यानं त्यजेत्प्रो

पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्सवाः ॥ उत्तस्थुरारात्सहसासनाशयात् साकं व्रतैर्व्रीडितलोचनाननाः ॥३१॥ तमात्मजैर्दृष्टिभिरंतरात्मना दुरंतभवाः परिरेभिरे पतिं ॥ निरुद्धमप्यास्रवदंबु नेत्रयोर्विलज्जतीनां भृगुवर्य्य वैक्लवात् ॥३२॥ ॥ छ

षितभर्तृकेति ॥३१॥ आयांतं तं पतिं दर्शनात्स्वं आत्मनावुद्ध्या परिरेभिरे ॥ ततो दृष्टिभिः ततः समीपमागतमात्मजैः पुत्रैर्गृहीतकंठमालिंगयंत्य इव स्वधमालिंगितवंत्य इत्यर्थः ॥ दुरंतभावाः गंभीराभिप्रायाः तदा नववासांनेत्रयोः निरुद्धमप्यंबुवाष्पं वैक्लव्यात्वैवस्यादास्रवत ईषत्सुस्राव अत एव वध्वैर्यहान्यादिलज्जतीनां हे भृगुवर्य्याचित्रमश्रसंवति ॥३२॥

पार्श्वगतः समीपस्थः तत्रापि रहोगतः एकांते प्रवर्त्ततेस्म ॥ पदे पदे प्रतिक्षणं नवं नवमेव अत्र कैमुत्यन्यायः का विरमेतेति ॥ चलापि चलस्व-
भावापि ॥ ३३ ॥ उक्तं श्रीकृष्णचरितं संक्षिप्याह एवमिति द्वाभ्यां क्षितेर्भाराय जन्म येषां अक्षौहिणीभिः कृत्वा परिवृत्तं सर्वतः प्रसृतं तेजः प्र-

यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्यांघ्रियुगं नवं नवं ॥ पदे पदे का विरमेत तत्पदाच्चलापि यच्छ्री-
र्न जहाति कर्हिचित् ॥ ३३ ॥ एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः परिवृत्ततेजसां ॥ विधाय
वैरं श्वसनो यथानलं मिथो वधेनोपरतो निरायुधः ॥ ३४ ॥ स एष नरलोकेस्मिन्नवतीर्णः स्वमाय
यारेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा ॥ ३५ ॥ ॥ ७ ॥ ७

वो येषां श्वसनो वायुर्वेणूनामन्योन्यसंघर्षेणानलं विधाय मिथो दाहेन यथा यथा शाम्यति तद्वत् ॥ ३४ ॥ स्त्रीरत्नकूटस्थः उत्तमस्त्रीक-
दंबस्थः ॥ ३५ ॥ ॥

भा॰ प्र॰ ॥ ६८ ॥

नन्वेवं स्त्रीसंगादिभिः संसारिमतीनेः कथं भगवानवतीर्णः ॥ इत्याशंक्यानेन त्राह ॥ उद्दामेति द्वाभ्यां यासां उद्दामः गंभीरो यो भावो भिप्रायः तस्य पिशुनः सूचको अमलो वल्गुः सुंदरो हासो व्रीडावलोकश्च ताभ्यां निहतः ॥ अमदनः श्रीमहादेवोपि संमुह्य लज्जया चापं पिनाकं अजहात् ॥ एवं प्रभावा याः स्त्रियः इत्येतावद्विसितं ॥ यद्वा ॥ भगवतो महिमराव ॥ एताभ्यश्चनादृष्विलासाएवेति ॥ न च्यार्क्ताकुहकैः कपटैर्वि

उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतो मदनोपि यासां ॥ संमुह्य चापमजहात्प्रमदोत्तमास्ता यस्येंद्रियं विमथितुं कुहकैर्न शेकुः ॥ ३६ ॥ तमयं मन्यते लोको ह्यसंगमपि संगिनं ॥ आत्मोपम्येन मनुजं व्यापृण्वानं यतो बुधः ॥ ३७ ॥ ॥ ॥ ८

भ्रमैर्यस्येंद्रियं मनः विमथितुं क्षोभयितुं न शेकुः न शक्ताः ॥ ३६ ॥ तं श्रीकृष्णं अयं प्राकृतो लोकः आत्मोपम्येन स्वसादृश्येन संगिनं मनुजं मन्यते अत्र हेतुः व्यापृण्वानं व्यापृयमाणं यतोयमबुधः अज्ञत्वः ॥ ३७ ॥ ॥

राम ॥ ६८ ॥

कुत इत्यपेक्षायामैश्वर्यलक्षणमाह एतदिति ईशस्य ईशनमैश्वर्यं नाम एतदेव किं तत् प्रकृतिस्थोपि तस्या गुणैः सुखदुःखादिभिः सदेव
र्युज्यत इति यद्वा यथा आत्मस्थैरानंदादिभिरात्माश्रयापि बुद्धिर्न युज्यते ॥ तद्वत्तैर्धर्मैर्दृष्टांतो वा आत्मस्थैः सत्ताप्रकाशादिभिर्यथा बुद्धिर्यु
ज्यत इति ॥ एवं वा ॥ असदात्मा देहः । तत्रस्थैर्गुणैस्तदाश्रया बुद्धिः तदुपाधिर्जीवो यथा युज्यते एवं प्रकृतिस्थोपि तद्गुणैर्न युज्यत इ

एतदीशनमीशस्य प्रकृतिस्थोपि तद्गुणैः ॥ न युज्यते सदात्मस्थैर्यथा बुद्धिस्तदाश्रया ॥ ३८ ॥ तं मे
निरेऽबला मूढाः स्त्रैणं चानुव्रतं रहः ॥ अप्रमाणविदो भर्तुरीश्वरं मतयो यथा ॥ ३९ ॥ इति श्रीभागवते
महापुराणे प्रथमस्कंधे श्रीकृष्णद्वारकाप्रवेशो नामैकादशोध्यायः ॥ ११ ॥ ॥ छ

तियत एतदीशनमीशस्येति ॥ ३८ ॥ तत्प्रकृत्योपि तस्य तं स्त्रैणं जानंतीत्याह तं मेनिरे स्त्रैणं आत्मवश्यं रहः एकांते अनुव्रतं च मेनिरे भर्तुरप्रमा
णाविदः प्रमाणमियत्तां महिमानमजानंत्य इत्यर्थः ईश्वरं क्षेत्रज्ञं मतयः अहंवृत्तयो यथा स्वाधीनं स्वसंयोगिनं मन्यंते तद्वत् ॥ यद्वा
यथा यथा तासां मतयः तथा तथा ईश्वरं स्त्रैणादिरूपं मेनिर इत्यर्थः ॥ ३९ ॥ इति श्रीभागवते प्रथमे एकादशः ॥ ११ ॥ ॥ छ ॥

भा० स्कं०

॥६९॥

पुरोक्तं यत्संतापयद्रौण्यिदंभादिविस्तरात्॥ द्वादशे तु नृदेवाय परीक्षिज्जन्म वर्ण्यते॥ परीक्षितो यद्राजर्षेर्जन्मकर्मविलापनं संस्थां च पांडुपुत्राणां वक्ष्ये हि कृष्णकथोदयमिति प्रतिज्ञाय पांडवानां राज्यस्थितिरूपो ह्यनन्तरं संगं सप्तमाध्यायमारभ्य निरूपिता इदानीमोपोद्घातिकमुक्तानुवादपूर्वकं॥ पृच्छति अश्वत्थाम्नेति उपसृष्टेन प्रयुक्तेन तस्य जन्मेत्यादि ब्रूहि इत्युत्तरेणान्वयः॥१॥ स परीक्षित्तमेव स

शौनक उवाच॥ अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा॥ उत्तराया हतो गर्भ ईशेनाजीवितः पुन॥१॥ तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः॥ निधनं च यथैवासीत्स प्रेत्य गतवान्यथा॥२॥ तदिदं श्रोतुमिच्छामि गदितुं यदि मन्यसे॥ ब्रूहि नः श्रद्धधानानां यस्य ज्ञानमदाच्छुकः॥३॥ सूत उ०॥ अपीपलद्धर्मराजः पितृवद्रंजयन्प्रजाः॥ निस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया॥४॥

देहं त्यक्त्वा॥२॥ प्रार्थयेन त्वा ज्ञापयामीत्याह गदितुं यदि मन्यसे॥ अनुग्रहेणान्तर्हितं ब्रूहीति यस्य ज्ञानमदात्शुक इति श्रवणोच्छायां कारणं॥३॥ निस्पृहस्यापि राज्ञः श्रीकृष्णानुग्रहात्ततो हि पौत्रः स मन्त्रनीतिवक्तुं तस्य श्रीकृष्णे भक्त्युद्रेकमाह अपीपलदिति त्रिभिः पितृवदपीपलत् पालयामास॥४॥

राम

॥६९॥

कृतवान् दुर्ग्गर्जितालोकाश्च ॥५॥ सुरस्पार्हाः सुराणां स्पृहणीयास्ते संपदादयः कामाः विषयाः राज्ञः किमुदं प्रीतिमधिजग्मुः न कृतवंतः इत्य
र्थः अत्र हेतुः मुकुंद एव मनो यस्येति ॥ क्षुधितस्य अन्नैकमनसः यथा इतरे सकुचंदनादयो न कुर्वंति तद्वत् तद्वत् ॥६॥ प्रकृतमाह मातुर्गे
ति ॥७॥ पुरटं सुवर्णं स्फुरत् पुरटमौलिर्यस्यास्ति तां जीह्यादिभ्यश्चेनीति स प्रत्ययः अप्रीच्यं अतिसुंदरं हरपत इति दर्शनं रूपं यस्य

संपदः कृतवो विप्रा महिषी भ्रातरो मही ॥ जंबूद्वीपाधिपस्यं च यशश्च त्रिदिवंगतं ॥५॥ किं ते का
मा सुरस्पार्हा मुकुंदमनसो द्विजाः ॥ अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ॥६॥ मातुर्गर्भगतो वी
रः स तदा भृगुनंदन ॥ ददर्श पुरुषं कंचित् दह्यमानोऽस्त्रतेजसा ॥७॥ अंगुष्ठमात्रममलं स्फुरत्
पुरटमौलिनं ॥ अपीच्यदर्शनं श्यामं तडिद्वाससमच्युतं ॥८॥ श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुं
डलं ॥ क्षतजाक्षं गदापाणिमात्मानः सर्वतो दिशं ॥९॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तं तडिद्वाससं पीयस्येति श्याममिति च यदाभ्यां विद्युद्भूषितमेघोपमास्य विना अच्युतं अविकारं ॥८॥ तप्तं संतप्तं होत्रीं रत्नीयस्कांचनं तन्मये कुं
डले यस्य तं क्षतजाक्षं संरंभात् रक्तनेत्रं ॥ अहो मद्भक्तस्यापि गर्भेऽस्त्रपीडेति क्रोधेनेति भावः ॥९॥ ॥ ॥९॥ ॥९॥ ॥९॥

अस्त्रतेजो विधर्मं तं विनाशयं तं नीहाहिमं गोपतिः ॥१०॥ सूर्यवंशे एवं गमेतो बालः सन्निकर्षे समीपे दर्शो दृष्ट्वा चासौ कश्चित पर्यैक्ष्यस्त तवि
तर्कितवान् अमेयात्माकथं तद्विभूतवानिस विस्तरूपः धर्मं गोपायतीति धर्मगुप् ॥११॥ दशमासपरिच्छेद्यस्य तत्स्य भिषजः पश्यतः

परिरम्मं तमुल्काभं त्रायं तं गदां मुरः ॥ अस्त्रतेजः खगादयानी हारमिव गोपतिः ॥१०॥ विधर्मं तं स
न्निकर्षे पर्यैक्षत कश्चित्सौ ॥ विध्यन्तमेयात्मा भगवान्धर्मगुप्विभुः ॥११॥ भिषजो दशमासस्य त
त्रैवांतर्दधे हरिः ॥१२॥ ततः सर्वगुणोदर्के सानुकूलग्रहोदये ॥ जज्ञे वंशधरः पांडोर्भूयः पांडुरिवौज
सा ॥१३॥ तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः ॥ जातकं कारयामास वाचयित्वा च मंगलं ॥१४॥

पतद्दृष्ट्वा तत्रैवांतर्हितः नत्वन्यत्र गतः यतो विभुः सर्वगतः ॥१२॥ उदर्क उत्तरं फलं सर्वे गुणाना मुत्तरोत्तराधिक्यस्सूचके लग्ने तत्र हेतुः अ
नुकूलैरन्यैः ग्रहैः सहितानां शुभग्रहाणामुदयो यस्मिन् ॥१३॥ जातकं जातकर्म मंगलं पुण्याहं ॥१४॥ ॥ ॥

वरान्श्रेष्ठान् स्वस्तं शोभनमलंच॥ तीर्थवित् दानकालः प्रावर्तच्छिद्यते नालं तावदन्नामो नि सूतकं छिन्ने नाले ततः पश्चात्सूतकं तु विधीयत इति वचनात्ततः सर्वं प्राशात आमान्नं वा प्रजाते तीर्थे पुत्रोत्पत्तिपुण्यतिथिपुण्यकाले पुत्रे जाते व्यतिपाते दत्तं भवति चाक्षयमिति स्मृतेः॥ देवाश्चापि तत्र एवं वपुत्रे जाते द्विजन्मनां आयातिहि तत्र पश्येष्टपुण्याहमिति चाब्रुवन्निति च॥१५॥ हे पौरव वृषभ कुरुवंश पानी

हिरण्यं गां महीं ग्रामान् हस्त्यश्वान्नृपतिर्वरान्॥ प्रादात्स्वन्नं च विप्रेभ्यः प्रजाते तीर्थवित्॥१५॥ तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयान्वितं॥ एष ह्यस्मिन्प्रजातंतौ कुरूणां पौरवर्षभ॥१६॥ दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि॥ रातो वोनुग्रहार्थाय विष्णुना प्रभविष्णुना॥१७॥ तस्मान्नाम्ना विष्णुरात इति लोके भविष्यति न संदेहो महाभागवतो महान्॥१८॥ ॥

१६॥ शुक्ले शुद्धे अस्मिन् प्रजातंतौ दैवेन कथंभूतेन अप्रतिघातेन दुर्वारेण संस्थां नाशं उपेयुषि गते सति वोनुग्रहार्थाय यस्मात् प्रभवनशीलेन श्रीविष्णुना रातो दत्तः॥१७॥ तस्मात् लोके विष्णुरात इति नाम्ना भविष्यति महाभागवतस्य गुणैश्च महात्म भविष्यति॥ नात्र संदेह इति तं राजानं ब्राह्मणा ऊचुरिति त्रयाणामन्वयः॥१८॥

महाभागवतो भविष्यतीत्युक्ते हृष्टः पृच्छति अपीति ॥ किंस्वित्साधुवादेन यशसा सत्कीर्त्या चानुवर्तिता भविष्यतीति पूर्वस्यैवानु
परमप्यनुषंगः ॥ १९ ॥ प्रजानामविता रक्षकः मानवः मनोः पुत्रः ॥ ब्राह्मणेषु हितः सत्यप्रतिज्ञश्च श्रीरामो यथा ॥ २० ॥ उशीनरदे

युधिष्ठिर उवाच ॥ अप्येवं श्यान्न राजर्षीन्पुण्यश्लोकान्महात्मनः ॥ अनुवर्तिता स्विद्यश
सा साधुवादेन सत्तमाः ॥ १९ ॥ ब्राह्मणा ऊचुः ॥ पार्थ प्रजाविता साक्षात्सोमो दिक्ष्वाकुरिव मानवः ॥ ब्र
ह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा ॥ २० ॥ एष दाता शरण्यश्च यथा ह्यौशीनरः शिबिः
यशो वितनिता स्वानां दौष्यन्तिरिव यज्वनाम् ॥ २१ ॥ धन्विनामग्रणीरेष तुल्यश्चार्जुनयोर्द्वयोः ॥ कृ
ताश इव दुर्धर्षः समुद्र इव दुस्तरः ॥ २२ ॥ मृगेंद्र इव विक्रांतो निषेव्यो हिमवानिव ॥ तितिक्षु
र्वसुधेवासौ सहिष्णुः पितराविव ॥ २३ ॥

शाधिपतिः शिबिः येन स्वमांसं श्येनाय दत्वा शरणागतः कपोतो रक्षितः स्वा
नां ज्ञातीनां यज्वनां च यशोविस्तारको दौष्यन्तिर्भरत इव ॥ २१ ॥ अर्जुनयोः पार्थकार्तवीर्ययोः ॥ २२ ॥ हिमवानिव सतां निषेव्यः अ
नन्यगतिकत्वेन वसुधेव तितिक्षुः क्षन्ता मीत्या मातापितराविव सहिष्णुः ॥ २३ ॥

पितामहो ब्रह्मा तेन समः साम्ये समत्वे रमाश्रयो हरिः ॥२४॥ सर्वैः सद्गुणैर्यन्माहात्म्यं तस्मिन् श्रीकृष्णतुल्यः ॥२५॥ धृत्या धैर्येणासनं भद्रग्रह अभिनिवेशो यस्य सः ॥ आहर्ता कर्ता ॥२६॥ राजर्षीणां जनमेजयादीनां ॥२७॥ द्विजपुत्रेण प्रेरितात्तक्षकात् आत्मनो मृत्युमुप

पितामहसमः साम्ये प्रसादे गिरिशोपमः ॥ आश्रयः सर्वभूतानां यथा देवो रमाश्रयः ॥२४॥ सर्वसद्गुणमाहात्म्य एष कृष्णमनुव्रतः ॥ रंतिदेव इवोदारो ययातिरिव धार्मिकः ॥२५॥ धृत्या बलिसमः कृष्णे प्रह्राद इव सद्ग्रहः ॥ आहर्तैषोऽश्वमेधानां वृद्धानां पर्युपासकः ॥२६॥ राजर्षीणां जनयिता शास्ता चोत्पथगामिनां ॥ निग्रहीता कलेरेष भुवो धर्मस्य कारणात् ॥२७॥ तक्षकादात्मनो मृत्युं द्विजपुत्रोपसर्जितात् ॥ प्रपत्स्यत उपश्रुत्य मुक्तसंगः पदं हरेः ॥२८॥ जिज्ञासितात्मयाथात्म्यो मुनेर्व्याससुतादसौ ॥ हित्वेदं नृप गंगायां यास्यत्यद्धाकुतोभयं ॥२९॥ ॥

श्रुत्य हरेः पदं प्रपत्स्यते भजिष्यति ॥२८॥ ततश्च जिज्ञासितमात्मनो याथात्म्यं येन सः इदं शरीरं गंगायां हित्वा अकुतोऽभयं पदं यास्यति ॥२९॥

लब्धाउपचितिःपूजायैस्ते॥३०॥ परीक्षिदितिनाममनिर्वक्तिसएषइति॥ यद्यस्मात्प्रभुःसमर्थःसन्गर्भेमदृष्टंपुरुषंअनुध्यायन्इहदृष्टपुमा-
नेषुनरेषुमध्येसर्वमपिपुनरंपरीक्षेत अयमसौभवेदितिमोषेतिविचारयेदतःपरीक्षिदितिविख्यातःपूर्वदृष्टमितिवापाठः॥३१॥ सु-
क्लेशुक्लपक्षेसप्रसिद्धउडुपोऽन्वहं॥ यथाकाष्ठाभिःपंचदशकलाभिःआपूर्यमाणोवर्द्धतेएवंपितृभिःयुधिष्ठिरादिभिःकामैश्च

इतिराज्ञउपादिश्यविप्राजातककोविदाः॥ लब्धापचितयःसर्वेप्रतिजग्मुःस्वकान्गृहान्॥३०॥
सएषलोकेविख्यातःपरीक्षिदितियत्प्रभुः पूर्वंदृष्टमनुध्यायन्परीक्षेतनरेष्विह॥३१॥ सराज-
पुत्रोववृधेआशुशुक्लइवोडुपः॥ आपूर्यमाणःपितृभिःकाष्ठाभिरिवसोऽन्वहं॥३२॥ यक्ष्य-
माणोऽश्वमेधेनज्ञातिद्रोहजिहासया॥ राजालब्धधनोदध्यावन्यत्रकरदंडयोः॥३३॥ ॥३३॥

तुःषष्टिकलाभिश्चापूर्यमाणोववृधे॥३२॥ पूर्वमपकृष्योज्ञानन्यमेधान्त्वावसरेसप्रकारंकथयतिज्ञातिद्रोहस्यहान्येच्छ-
यायक्ष्यमाणःकरदंडयोरन्यत्रतास्यांविनामलब्धधनोदध्यौचिंतयामाससकरदंडस्यपरिजनभरणमात्रोपक्षीणत्वात्॥३३॥

प्रहीनं मरुत्तस्य यज्ञे त्यक्तं सुवर्णपात्रादिकमानीतवंतः ॥३४॥ संभृतसंभारः संपादितयज्ञोपकरणः भीतो ज्ञातिद्रोहात् ॥३५॥३७॥
इति प्रथमे द्वादशः ॥१२॥ निर्गमो धृतराष्ट्रस्य विदुरेणात्र त्रयोदशे उक्तः पौत्राभिषेकेण च कुंतीगो महोदयं ॥१॥ इदानीं परीक्षि

तदभिप्रेतमालक्ष्य भ्रातरोऽच्युतचोदिताः ॥ धनं प्रहीनमाजह्रुरुदीच्यां दिशि भूरिशः ॥३४॥ तेन संभृतसंभारो लब्धकामो युधिष्ठिरः ॥ वाजिमेधैस्त्रिभिर्भीतो यज्ञैः समयजद्धरिं ॥३५॥ आहूतो भगवान्राज्ञा याजयित्वा द्विजैर्नृपं ॥ उवास कतिचिन्मासान्सुहृदां प्रीतिकाम्यया ॥३६॥ ततो राज्ञाभ्यनुज्ञातः कृष्णया सह बंधुभिः ॥ ययौ द्वारवतीं ब्रह्मन्सार्जुनो यदुभिर्वृतः ॥३७॥ इति श्रीभागवते म॰पु॰ प्रथमस्कंधे परीक्षिज्जन्मनिरूपणं नाम द्वादशोऽध्यायः ॥१२॥ सूत उवाच ॥ विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिं ॥ ज्ञात्वागाद्धास्तिनपुरं तयावाप्तविवित्सितः ॥१॥ ॥

तः कलिनिग्रहादिकर्माणि कर्माणि कथयिष्यन् विदुरागमनेन धृतराष्ट्रप्रस्थानं ततोऽर्जुनागमनं ततः कृष्णांतर्द्धानं ततः कृष्णांतर्द्धा
नेन ततः पांडवप्रस्थानं च निरूपयति त्रिभिरध्यायैः गतिं हरिं तत्पादमगस्त्याद्वाप्तं विवित्सितं ज्ञा

भा॰टी॰प्र॰स्कं॰ ॥ १२ ॥

भा॰ प्र॰
॥७३॥

तदेवाह यावतः कर्मयोगज्ञानादिविषयान्प्रश्नान् प्रथमं कृतवान्॥ कौषारवस्य पुरतः पश्चात्त्रिचतुरप्रश्नार्थज्ञानमात्रेण गोविंदे जातैकांतभक्तिः कृतार्थः सन् तेभ्यः प्रश्नेभ्यः प्रश्नेभ्यः उपरराम ततः परं न विजिज्ञासितवान्॥२॥ सूतः संजयः शारद्वतः कृपः॥३॥ कृपी

यावतः कृतवान्प्रश्नान्क्षत्ता कौषारवाग्रतः॥ जातैकभक्तिर्गोविंदे तेभ्यश्चोपरराम ह॥२॥ तं बंधुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः॥ धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा॥३॥ गांधारी द्रौपदी ब्रह्मन्सुभद्रा चोत्तरा कृपी॥ अन्याश्च जामयः पांडोर्ज्ञातयः ससुताः स्त्रियः॥४॥ प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतं॥ अभिसंगम्य विधिवत्परिष्वंगाभिवादनैः॥५॥ मुमुचुः प्रेमबाष्पौघं विरहौत्कंठ्यकातराः॥ राजा तमर्हयांचक्रे कृतासनपरिग्रहं॥६॥ ॥ ॥६॥

द्रोणभार्या जामयो ज्ञातिभार्या अन्याश्च स्त्रियः प्राणं तन्व इव तद्वेति कुतश्चिन्मूर्छादिदोषतः॥४॥ प्राणे सन्ने सति तन्वः करचरणाद्या यदेयानिश्चेष्टा भवंति पुनस्तस्मिन्नाविर्भूते उत्पद्यंते निष्ठंति तद्वत्॥५॥ विरहेण यदौत्कंठ्यं तेन कातरा विवशाः॥६॥ ॥ ७ ॥

राम
॥७३॥

७॥ पक्षिणोप्यपत्यानि यथातिस्नेहेन पक्षच्छायया वर्द्धयंति तद्वत्युष्मत॥ पक्षपातच्छायया समेधितान्नोस्मान् किं स्मरथ समेधितत्वमेवाह
विपद्गणात्यस्मात्मोचिताः स्म॥ ८॥ भो युष्माभिः कया वृत्त्या वर्तितं देहवृत्तिः कृता कानि च तीर्थादीनि सेवितानीति॥ ९॥ भवतां च तीर्थी

गं भुक्तवंतमासीनं विश्रांतं सुखमासने॥ प्रश्रयावनतो राजा प्राह तेषां च शृण्वतां॥ ७॥ युधि
ष्ठिर उ०॥ अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान्॥ विपद्गणाद्विषाग्न्यादेर्मोचिता यत्स
मातृकाः॥ ८॥ कया वृत्त्या वर्तितं वश्चरद्भिः क्षितिमंडलं॥ तीर्थानि सेवितान्यत्र मुख्यानि सेवितानीह
भूतले॥ ९॥ भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो॥ तीर्थी कुर्वंति तीर्थानि स्वांतस्थेन गदाभृ
ता॥ १०॥ अपि नः सुहृदस्तात बांधवाः कृष्णदेवताः॥ दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमास
ते॥ ११॥

स्वांतस्थेन कृतं किं तु तीर्थ्यातु यत्तार्थमित्याह भवद्विधेति मलिनजनसंपर्केण तानि तीर्थानि मलिनानि संति संतः पुनस्तत्यं तीर्थी कुर्वंति स्वांतम
नः तत्रस्थेन स्वस्थानस्थेनेतिवा॥ १०॥ अपि किं सुखमासते भवद्भिः क्वापि दृष्टाः श्रुता वा॥ ११॥ ॥ ७ ७

यदुकुलस्यावर्णनेकारणमाहनन्विति ॥१२॥१३॥ श्रेयस्कृन्तत्वमुपदिशत ॥१४॥ ननु शूद्रोसौ कथमुपदिशेत ॥ नह्ययमसौ शूद्रः किंतु यमस्तद्रू
पेणासीत् किं तत्र कारणं यमेवागते मुत्र को दंडधर इत्यपेक्षायामाह अविक्रदिति धृतवानित्यर्थः माण्डव्यस्य शापात् ॥ तथाहि कश्चिच्चोरान
नुधावंतो राजभटा माण्डव्य ॥ स्य ऋषेस्तपश्चरतः समीपे तेन मार्गं संप्राप्य तेन सह निबध्यानीय राज्ञे निवेदयंत राज्ञा सर्वान् शूलमारोपयामा

इत्युक्तो धर्मराजेन तत्सर्वं समवर्णयत् ॥ यथानुभूतं क्रमशो विना यदुकुलक्षयं ॥१२॥ नन्वप्रियं दुर्विषहं नृणां स्वयमुपस्थितं ॥ नावेदयत्सकरुणो दुःखितान्द्रष्टुमक्षमः ॥१३॥ कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखं ॥ भ्रातुर्ज्येष्ठस्य श्रेयस्कृत्सर्वेषां प्रीतिमावहन् ॥१४॥ अबिभ्रदर्यमा दंडं यथावदघकारिषु ॥ यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः ॥१५॥ ॥

सः ॥ ततो राजा तमृषिं ज्ञात्वा शूलादवतार्य प्रसादयामास ततो मुनिर्यमं गत्वा कुपित उवाच कस्मादहं शूलमारोपित इति तेनोक्तं त्वं बाल्ये शल
भं कुशाग्रेणाविध्य क्रीडितवानिति ॥ तच्छ्रुत्वा माण्डव्यस्तं शशाप बालेऽज्ञानतो मे महांतं दंडं यस्त्वं कारितवानतः शूद्रो भवेति ॥१५॥

इदानींराज्यापकर्षंनिरूपयतियुधिष्ठिरइतिकुलंधरंवंशधरं ॥ २६ ॥ नहीहयायहव्यापारेणप्रमत्तानां अत्यक्रामत् आयुः कालोतिक्रांत ॥ यद्वा तानत्यक्र
मतानभ्यभवदित्यर्थः ॥ २७ ॥ अभिप्रेत्यज्ञात्वा ॥ २८ ॥ नत्प्रतीकारः क्रियतां किंनिर्गमेन तत्राह प्रतिक्रियेति सर्वेषामिति येः प्रतिकर्तव्यं तेषामपीत्य

युधिष्ठिरोलब्धराज्योलब्धपौत्रंकुलंधरं ॥ भ्रातृभिर्लोकपालाभैर्मुमुदेपरयामुदा ॥ २६ ॥ एवं
गृहेषुसक्तानांप्रमत्तानांतदीहया ॥ अत्यक्रामदविज्ञातः कालः परमदुस्तरः ॥ २७ ॥ विदुर
स्तदभिप्रेत्यधृतराष्ट्रमभाषत ॥ राजन्निर्गम्यतांशीघ्रंपश्येदंभयमागतं ॥ २८ ॥ प्रतिक्रिया
नयस्येहकुतश्चित्कर्हिचित्प्रभो ॥ सएवभगवान्कालः सर्वेषांनःसमागतः ॥ २९ ॥ येनचैवाभि
पन्नोयंप्राणैः प्रियतमैरपि ॥ जनः सद्योवियुज्येतकिमुतान्यैर्धनादिभिः ॥ ३० ॥ ॥ छ

र्थः ॥ २९ ॥ कथंधनादिवियोगः सोढुंशक्यः अतआह येनचेति अभिपन्नः अभिग्रस्तः ॥ ३० ॥ ॥ छ ॥ छ ॥

अत्रावस्थानमति दैन्यमिति दर्शयन्वैराग्यमुत्पादयति ॥ पितृभ्रातृ इति सप्तभिः ॥ आत्मा च देहः ॥२१॥२२॥ येन पुत्रा हतास्तेन भीमेन दत्तं पिंडमन्नं गृहपालः श्वा ॥२३॥ निसृष्टः प्रक्षिप्तः गरो विषं दूषिता अवमताः तद्दत्तैरन्नादिभिर्लब्धैः ॥ असुभिः किंप्रयोजनं न किंचिदित्यर्थः ॥२४॥ तस्यापि एवं देहस्य मनु-

पितृभ्रातृसुहृत्पुत्रा हतास्ते विगतं वयः ॥ आत्मा च जरया ग्रस्तः परगेहमुपाससे ॥२१॥ अंधः पुरैव विधुरो मंदप्रज्ञश्च सांप्रतं ॥ विशीर्णदंतो मंदाग्निः सवाष्पकफमुद्वहन् ॥२२॥ अहो महीयसी जंतोर्जीविताशा यथा भवान् ॥ भीमेनावर्जितं पिंडमादत्ते गृहपालवत् ॥२३॥ अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः ॥ हृतं क्षेत्रं धनं येषां तद्दत्तैरसुभिः कियत् ॥२४॥ तस्यापि तव देहोयं कृपणस्य जिजीविषोः ॥ परैत्यनिच्छतो जीर्णो जरया वाससी इव ॥२५॥ गतस्वार्थमिमं देहं विरक्तो मुक्तबंधनः ॥ अविज्ञातगतिर्जह्यात्स वै धीर उदा-

वतोऽपि परैति क्षीयते ॥२५॥ गतस्वार्थं यशो धर्मादिशून्यं मुक्तबंधनः त्यक्ताभिमानः क्व गत इत्यविज्ञाता गतिर्यस्य सः धीरः प्राप्तदुःखस्य स्वयं सहनेन मुक्तिप्राप्तेः ॥२६॥

नरोत्तमस्तु ततः प्रागेवकृतप्रतीकारः स्वकात्स्वत एव परतः परोपदेशतो वा॥२७॥ त्वंतु नरोत्तमो मा भूरत इदानीं धीरो भवेत्याह अथेति अर्वाक्
अर्वाचीनः। एष्यन्नित्यर्थः। गुणान्धैर्यस्थ्यादीन्विकर्षति आछिनत्तीति तथा॥२८॥ आजमीढः अजमीढवंशजः प्रज्ञाचक्षुः अंधः एवंबोधितः सन्
द्रढिम्नः चित्तदार्ढ्यात् भ्रात्रा संदर्शितः अध्वा वनमोक्षयोर्मार्गो यस्य सः॥२९॥ सुबलस्य पुत्री गांधारी साध्वी सुशीला हिमालयं प्रयांतं पतिमनुज

यःस्वकात्परतोवेहजातनिर्वेदआत्मवान्॥ हृदिकृत्वाहरिंगेहात्प्रव्रजेत्सनरोत्तमः॥२७॥अ
थोदीचींदिशंयातुस्वैरज्ञातगतिर्भवान्॥ इतोर्वाक्प्रायसःकालःपुंसांगुणविकर्षणः॥२८॥ए
वंराजाविदुरेणानुजेनप्रज्ञाचक्षुर्बोधितोह्याजमीढः छित्वास्वेषुस्नेहपाशान्द्रढिम्नोनिश्चक्रा
मभ्रातृसंदर्शिताध्वा॥२९॥पतिंप्रयान्तंसुबलस्यपुत्रीपतिव्रताचानुजगामसाध्वी॥ हिमालयंन्य
स्तदंडप्रहर्षंमनस्विनामिवभिवसत्संप्रहारं॥३०॥

गाम कथंभूता सुकुमारी हिमादिदुःखबहुलं हिमवंतं गता अत आह न्यस्त
दंडानां प्रहर्षो यस्मिन् तं दंडः स्वदमयिकर्षो विस्महर्षकहेतुर्भवतीत्यत्र दृष्टांतः मनस्विनां शूराणां युद्धे सत्तीव्रः प्रहारो यथा पाठांतरे सत्संप्रहारं यु
द्धेप्रयेति॥३०॥

कृतं मैत्रं मित्रदेवत्वं संध्यावंदनं येन ॥ न त्वां संस्कृत्य पितरो विदुर धृतराष्ट्रो ॥ ३१ ॥ हे गावल्गाने गावल्गानस्य पुत्र संजय ॥ ३२ ॥ अकृतमद्र्ं मदमलोशमलं अ
पराधं आशंसमानः ॥ आशंकमानः भार्यया सह ॥ ३३ ॥ यो अक्षरतां नीतः स्यानात् ॥ ३४ ॥ कृपयालेह वैक्लव्याद्बाति पीडितः ॥ आत्मेश्वरं धृतराष्ट्रं अप

अजातशत्रुः कृतमैत्रोकृताग्निर्विप्रान्नतानिलगोभूमिरुक्वेनः ॥ ग्रहं प्रविष्टो गुरुवंदनाय नचापश्यत्पितरौ सौबलीं च ॥ ३१ ॥ तत्र संजयमासीनं पप्रच्छोद्विग्नमानसः ॥ गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः ॥ अंबा वा हतपुत्रार्ता पितृव्यः क्व गतः सुहृत् ॥ ३२ ॥ अपि मय्यकृतप्रज्ञे हतबंधुः सभार्यया ॥ आशंसमानः शमलं गंगायां दुःखितोपतत् ॥ ३३ ॥ पितर्युपरते पांडौ सर्वान्नः सुहृदः शिशून् ॥ अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ॥ ३४ ॥ सूत उवाच ॥ कृपया स्नेहवैक्लव्यात्सूतो विरहकातरः आत्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ॥

श्रयनविरहकर्षितश्चस्तुतः संजयः नाश्रस्तुतरमाह ॥३५॥

॥ ७ ॥ ॥ ॥

आत्मनाबुद्ध्या आत्मानं मनो विष्टभ्य धैर्येयुक्तं कृत्वा प्रभ्वोः धृतराष्ट्रस्य गांधार्याश्च ॥ ३६ ॥ व्यवसितं निश्चयं यतो मुषितः वंचितोस्मि ॥ ३७ ॥ एवं कंचि
त्कालं शोचति नितस्मिन् अथ यनारद अत्रालि क्वचित्पुस्तके पाठांतरं तद्दुर्लक्ष्य पथ्यार्थं प्रदायं व्याख्यायते शोकवेगादयपि पत्निवाहराज्ञानत्वभ्य च्वे

विमज्याक्षणिपाणिभ्यां विष्टभ्यात्मानमात्मना ॥ अजातशत्रुं प्रत्युवेच प्रभोः पादावनुस्मरन् ॥ ३६ ॥
संजय उ० ॥ नाहं वेद व्यवसितं पित्रोर्वः कुलनंदन ॥ गांधार्या वा महाबाहो मुषितोस्मि महात्मभिः
॥ ३७ ॥ अथाजगाम भगवान्नारदः सहतुंबुरुः प्रत्युत्थायाभिवाद्याह सानुजोभ्यर्चयन्मुनिम् ॥ ३८ ॥ युधि
ष्ठिर उ० ॥ नाहं वेद गतिं पित्रोर्भगवन्क्व गतावितः अंब वा वा हतपुत्रार्ता क्व गता च तपस्विनी ॥ ३९ ॥ क
र्णधार इवापारे भगवान्पारदर्शकः ॥ अथाबभाषे भगवान्नारदो मुनिसत्तमः ॥ ४० ॥ नारद उ० ॥ मा
कंचन शुचो राजन्यदीश्वरवशं जगत् लोकाः सपाला यस्येमे वहंति बलिमीशितुः ॥ ४१ ॥ ॥ ७

न ॥ ३९ ॥ नाहं वेद वेद्मि तपस्विनी ॥ ३९ ॥ दुःखयुक्ता अपारे शोकार्णवे भगवंस्त्वमेव पारदर्शकः अतो त्र हीति शेषः ॥ ४० ॥ आदावेव यथावृत्तकथने नाशो
के न मम्र्छितः पने देशिनि प्रथमं तावच्छोकमुपशमयति कंचनमाशुचः मा शोचय न केवलं तानेव यच्च यस्मादीश राधीनं जगत् ॥ ४१ ॥ ॥ ॥

भा॰ प्र॰
॥ ७७ ॥

तद्देवाह लोकानिति संयुनक्ति संयोजयति वियुक्तं नक्ति वियोजयति च ॥ ४२ ॥ गावो बलीवर्द्दास्तं स्वां दीर्घतंत्र्यां बद्धाः दामभिर्नासिकायां प्रोताः स्वामिनो व हंति यथा एवं वाकूतंत्र्यां कर्तव्याकर्तव्यविधायकवेदलक्षणायां नामभिर्ब्राह्मणो ब्रह्मचारी स्यादित्यादिभिर्नामलक्षणैर्बद्धाः परमेश्वरस्य बलिं हरंतीत्यर्थः ॥ ४२ ॥ ४३ ॥ ईश्वराधीनत्वात्तन्न शोकः कार्य इत्युक्तं ॥ लोकतत्त्वेन विचार्यमाणो निर्विषयो यं शोक इत्याह यद्यपि लोकं जनं ध्रुवं जीवरूपेण अध्रु

स संयुनक्ति भूतानि स एव वियुनक्ति च ॥ ४२ ॥ यथा गावो नसि प्रोतास्तंत्र्यां बद्धाः स दामभिः ॥ वाक्तंत्र्यां नामभिर्बद्धा वहंति बलिमीशितुः ॥ ४३ ॥ यथा क्रीडोपस्कराणां संयोगविगमाविह ॥ इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणां ॥ ४३ ॥ यन्मन्यसे ध्रुवं लोकमध्रुवं वचनोभयं ॥ सर्वथा हि न शोच्यास्ते स्नेहादन्यत्र मोहजात् ॥ ४५ ॥ ॥ ॥ ॥ ॥

वं देहरूपेण न चेति न ध्रुवं तापि ध्रुवं शुद्धब्रह्मरूपेण अनिर्वचनीयत्वेन वा ॥ उभयं वा चित्तजडांशतः सर्वथा चतुर्ष्वपि पक्षेषु ते पित्रादयो न शोच्याः स्नेहादन्यत्र स्नेहस्य केवलं शोकहेतुः स चाज्ञानमूल इत्यर्थः ॥ ४४ ॥ ॥ श्री॰ ॥ ॥

राम
॥ ७७ ॥

तस्मात्मांविनाकथंतेवर्त्तेरन्नितिमनसोवैक्लव्यंचव्याकुलतांत्यज॥४५॥तत्रत्वेदेहतत्तेषांवृत्तिरित्येतन्नावन्नास्तीत्याहकालोगुणाक्षोभकः कर्मजन्मनि
मित्तंगुणाउपादानंतत्अधीनः पांचभौतिकः जडस्तद्भिभागेनाशवांश्च॥सर्पग्रस्तःअजगरगिलितोयथाऽन्यंनरक्षतितद्वत॥४६॥ईश्वरेणावि
नावृत्तिश्चसर्वेतःसुलभैवेत्याहअहस्तानिपश्वादीनिअपदानितृणादीनितत्रतेषुअहस्तादिष्वपिफलानिअल्पानि॥एवंजीवःसर्वोपिजी

तस्मात्जह्यंगवैक्लव्यमज्ञानकृतमात्मनः॥कथंत्वनाथाःकृपणाःवर्त्तेरन्त्वनमाश्रिताः॥४५॥
कालकर्मगुणाधीनोदेहोयंपांचभौतिकः॥कथमन्यांस्तुगोपायेत्सर्पग्रस्तोयथापरं॥४६॥
अहस्तानिसहस्तानामपदानिचतुष्पदां॥फल्गूनितत्रमहतांजीवोजीवस्यजीवनं॥४७॥त
दिदंभगवान्राजन्नेकआत्मात्मनांस्वदृक्॥अंतरोनंतरोभातिपश्यतंमाययोरुधा॥४८॥

वस्यजीवनंजीविकाएतेनैवसर्वतोमृत्युग्रासत्वंचोक्तं॥४७॥मोहनिवृत्त्यर्थेद्वैतस्यावस्तुतमाह॥तदिदंअहस्तसहस्तादिरूपंजगत्स्वदृक्भग
वानेवनततःपृथक्सचैकएवनतुनानानतुसजातीय॥विजातीयभेदप्रत्यक्षेकुतएतत्तत्राहआत्मनांभोक्तृणांआत्मास्वरूपमतोनसजाती
यभेदःअंतरोऽनंतरश्चअंतर्बहिश्चभोक्तृभोग्यरूपश्चभातिअतोनविजातीयभेदइएकःकथंतत्याप्रतीयतेअतआहमाययाउरुधाबहुधा
पश्यति॥४८॥ ॥

भा॰ प्र॰
॥७८॥

कासावस्तीदृशो महामायावी द्वारकायामित्याह सोयमिति यस्यां भूमौ अभावाय नाशाय ॥४९॥ नहि श्रीकृष्णो नासीत्येवं तत्रैवास्यां मा कथा इत्याह ॥ न
ष्ठ देवानां कार्यं तेन निष्पादितं केवलमवशेषं प्रतीक्षते ॥ यदुकुलक्षयमिति तद्दृष्टिरस्यंतं ततो निजधाम यास्यति तेनो यूयमपि गच्छतेत्यर्थः तत्र भूतेम
पि विदुरवदेव नावर्णयत् ॥ न देवं शोकमास्थां च निवार्यां जिज्ञासवेत स्नेह घ यावदेतं न कथयति ॥५०॥ धृतराष्ट्र इति षड्भिः हिमवतो दक्षिणभागे

सोयमद्य महाराज भगवान्भूतभावनः॥ कालरूपोवतीर्णोस्यामभवाय सुरद्विषां॥४९॥ निष्पा
दितं देवकृत्यमवशेषं प्रतीक्षते॥ तावद्यूयमवेक्षध्वं भवेद्यावदिहेश्वरः॥५०॥ धृतराष्ट्रः स
ह भ्रात्रा गांधार्या च स्वभार्यया॥ दक्षिणेन हिमवत ऋषीणामाश्रमं गतः॥५१॥ स्रोतोभिः स
प्तभिर्या वै स्वर्धुनी सप्तधा व्यधात्॥ सप्तानां प्रीतये नाना सप्तस्रोतः प्रचक्षते॥५२॥ ॥ ॥

॥५१॥ या वै प्रसिद्धा स्वर्धुनी सा आत्मानं यत्र सप्तधा व्यधात् ॥ किमर्थं नाना पृथक् सप्तभिः स्रोतोभिः प्रवाहैः सप्तानां ऋषीणां प्रीतये जना एवं तन्नीर्थं
सप्तस्रोतो वदंति ॥५२॥

राम
॥७८॥

तेन कृतमष्टांगयोगमाह स्नात्वेति चतुर्भिः तत्र स्नानं होमोऽब्रह्मचर्यं चेति नियमा उक्ताः भक्षस्थानेऽपां स्वीकारादस्तद्ब्रह्मः उपशांत आत्मा यस्य सः वि
गताः पुत्राद्येषणा यस्मादिति यमा उक्ताः ॥५३॥ जितासन इत्यादिना आसन प्राणायाम प्रत्याहारा उक्ताः हरिभावनयेति धारणोक्ता ध्वस्ताः
रजः सत्वतमो रूपा मला यस्येति फलतो ध्यानमुक्तं ॥५४॥ समाधिमाह विज्ञानेति द्वाभ्यां आत्मानमहंकारास्पदं स्थूलदेहाद्वियोज्य विज्ञा

स्नात्वानुसवनं तस्मिन् हुत्वा चाग्नीन्यथाविधि ॥ अब्रह्मस्तु उपशांतात्मा स आस्ते विगतैषणः ॥५३॥
जितासनो जितश्वासः प्रत्याहृतषडिंद्रियः ॥ हरिभावनया ध्वस्तरजः सत्वतमोमलः ॥५४॥
विज्ञानात्मनि संयोज्य क्षेत्रज्ञे प्रविलाप्य तं ॥ ब्रह्मण्यात्मानमाधारे घटांबरमिवांबरे ॥५५॥

नात्मनि बुद्धौ संयोज्य एकीकृत्य तं विज्ञानात्मानं द्रष्टांशाद्वियोज्य क्षेत्रज्ञे प्रविलाप्य तं च क्षेत्रज्ञं शुद्धं शाद्वियोज्य आधारे आश्रये संते ब्रह्म
णि प्रविलापयेत् घटोपाधेर्वियोज्य यथा महाकाशे प्रविलाप्यते तद्वत् ॥५५॥ ॥ छ ॥ ॥ छ ॥ ॥

व्युत्थानाभावमाह ध्वस्तेति ॥ अंतर्गुणक्षोभाद्बाह्यावहिरिंद्रियविक्षेपाद्वा व्युत्थानं भवेत्तदुभयं तस्य नास्ति यतो ध्वस्तो मायागुणानामुदर्कः उत्तर फलं वासना यस्य सः ॥ निरुद्धानि करणानि चक्षुरादीनि आशयो मनश्च यस्य सः ॥ अतएव निवर्तितः अखिल आहारो भोग्यं इंद्रियैर्विषयाहरणं येन सः स्थाणुरिव निश्चल आस्ते ॥५६॥ तथापि त्वया नेतु सुद्यं तव समाहतस्येति ॥ अंतरायो विघ्नः मैवाभूरित्यडागमः छांदसः दर्शनमपि

ध्वस्तमायागुणोदर्को निरुद्धकरणाशयः ॥ निवर्तिताखिलाहार आस्ते स्थाणुरिवाधुना ॥५६॥ न स्यान्तरायो मैवाभूः संन्यस्ताखिलकर्मणः ॥ स वा अद्यतनाद्राजन्परतः पंचमेऽहनि कलेवरं हास्यति स्वं तच्च भस्मी भविष्यति ॥५७॥ दह्यमानेऽग्निभिर्देहे पत्युः पत्नी सहोटजे ॥ बहिः स्थिता पतिं साध्वी तमग्निमनु वेक्ष्यति ॥५८॥

तावत्कुर्यामित्युद्यं तं मत्वाह स वै अद्यतनादहः स्वस्वाधीनं ॥ तर्हि नद्यां यर्थं गमिष्यामि इत्याह नचेति ॥५७॥ तर्हि गांधार्या नयनाय गमिष्यामि इत्याह पत्युर्देहे सहोटजे पर्णशालासहिते योगाग्निना सहगार्हपत्यादिभिः ॥ दह्यमाने तस्य पत्नी बहिः स्थिता सती तं पतिमनु अग्निं वेक्ष्यति ॥५८॥

तर्हि हि विदुरस्तन्नयनार्थं गंगायामेव वने स्थाता ॥ विदुरस्तु तन्निशाम्य दृष्ट्वा स्वात्मनः सुगतिं हर्षं लेभे तस्मात् पुनः शोकं स्वभ्रात्रा स्पर्शं प्राप्तः । तस्मात् स्थानात् तीर्थयात्रा-
से विदुरं गंता गमिष्यति ॥ ५९ ॥ शुचः शोकान् ॥ ६० ॥ इति प्रथमे त्रयोदशोध्यायः ॥ १३ ॥ चतुर्दशे त्वरिष्टानि दृष्ट्वा राजा विशंकितः अर्जुनो दृष्ट्वा

विदुरस्तु तदाश्चर्यं निशाम्य कुरुनंदन ॥ हर्षशोकयुतस्तस्माद्गंता तीर्थनिषेवकः ॥ ५९ ॥ इत्युक्त्वा-
थारुहत्स्वर्गं नारदः सह तुंबुरुः युधिष्ठिरो वचस्तस्य हृदि कृत्वाजहाच्छुचः ॥ ६० ॥ इति श्रीभा-
गवते महापुराणे प्रथमस्कंधे त्रयोदशोध्यायः ॥ १३ ॥ सूत उवाच ॥ संप्रस्थिते द्वारकायां जिष्णौ
बंधुदिदृक्षया ॥ ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं ॥ १ ॥ व्यतीताः कतिचिन्मासास्त-
दा नायात्ततोर्जुनः ॥ ददर्श घोररूपाणि निमित्तानि कुरूद्वहः ॥ २ ॥

तात्कृष्णस्य तिरोधानमिति निर्णेतुं ॥ १ ॥ कृष्णस्य चेति चकारे-
णाभिप्रायं च ज्ञातुं ॥ १ ॥ कतिचित् स तदा कालातिक्रमेणेति ततो द्वारकातो न आयान्नागतः निमित्तानि उत्पातान् कुरूद्वहो युधिष्ठिरः ॥ २ ॥ ॥

रौद्रां घोरां तदेवाह विपर्यस्ता ऋतुधर्मा यासां ता ऋतवो यस्मिंस्तस्य वार्तां जीविकां ॥ क्रोधलोभानृतैर्युक्त आत्मा येषां तेषां ॥३॥ जिह्मप्रायं कपटबहुलं व्यवहृतं
व्यवहारं ॥ शाठ्यं वंचनं तन्मिश्रं सौहृदं सख्यं पित्रादीनां तत्प्रतियोगिभिः ॥ कल्कनं कलहादि ॥४॥ अत्यरिष्टानि अत्यंतमशुभानि दृष्ट्वा नृणां लोभा

कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः ॥ पापीयसीं नृणां वार्तां क्रोधलोभानृतात्मनां ॥३॥ जिह्म
प्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदम् ॥ पितृमातृसुहृद्भ्रातृदंपतीनां च कल्कनं ॥४॥ निमित्तान्य
त्यरिष्टानि काले त्वनुगते नृणाम् ॥ लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः ॥५॥ युधिष्ठिर उवा
च ॥ संप्रेषितो द्वारकायां जिष्णुर्बंधुदिदृक्षया ॥ ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं ॥६॥
गताः सप्ताधुना मासा भीमसेन तवानुजः ॥ नायाति कस्य वा हेतोर्नाहं वेदेदमंजसा ॥७॥ अपि दे
वर्षिणादिष्टः स कालोऽयमुपस्थितः ॥ यदात्मनोंगमाक्रीडं भगवानुत्सिसृक्षति ॥८॥ ॥ ॥

द्यधर्मप्रकृतिं च दृष्ट्वा अनुजं भीमं ॥५॥६॥ वेत्ति विजनके कस्माद्धेतोर्नायातीत्यहं न वेद्मि ॥७॥ अपि किं यदा आत्मनः आक्रीडं क्रीडासाधनं अंगं मनुष्य
वपुः उत्स्रष्टुमिच्छति स कालः प्राप्तः ॥८॥

अस्माकं सर्वपुरुषार्थत्वे हेतुः श्रीकृष्णो न स्त्वद्वियोगं विनाऽनिष्टं नः स्यादित्याशयेनाह यस्मात् श्रीकृष्णाद्धेतोः ॥ एतत्त्वोपरिष्टादर्जुनः स्पष्टीकरिष्यति लोकाश्चयन्नं करणारूपाय स्यानुग्रहात् ॥ ९ ॥ अहृएत्संनिहितं नोऽस्माकमाशंसतः उत्पातान् ॥ १० ॥ दैहिकानाह ऊर्वितिऽर्वी दयावामाः स्फुरंति वपुः ॥ कंपश्च हृदये वर्न्नेते एनेएते मह्यं आराद्संनिहितं विप्रियं दास्यति ॥ ११ ॥ भौमानाह सार्द्धेस्त्रिभिः शिवाक्रोष्टी आदित्यमभिरौति उच्यस्वर्पामि

यस्मान्नः संपदो राज्यं प्राणा दाराः कुलं प्रजाः ॥ आसन्त्सपत्नविजयो लोकाश्च यदनुग्रहात् ॥ ९ ॥
पश्योत्पातान्नरव्याघ्र दिव्यान्भौमान्सदैहिकान् ॥ दारुणान्नशंसतो ह्राद्भयं नो बुद्धिमोहनं ॥ १० ॥
ऊर्वक्षिबाहवो मह्यं स्फुरंत्संग पुनः पुनः ॥ वेपथुश्चापि हृदये आराद्दास्यति विप्रियम् ॥ ११ ॥ शिवैषोद्यंतमादित्यमभिरौत्यनलानना ॥ मामंग सारमेयोयमभिरौति ह्यभीरुवत् ॥ १२ ॥

मुखं क्रोशति अलानना अग्निमुखेन वमंती अंग हे भीममामाभिरुपसारमेद्यः स्वामिरौति ह्लुर्नरौति भवानिअभीरुवत्निः शंकं ॥ १२ ॥ ॥ ॥ ७

शस्ताः गवादयो मांसव्यं वामं कुर्वंति॥ अपरे गर्दभाद्याः प्रदक्षिणं कुर्वंति वाहान् अश्वान्॥१३॥ अयं कपोतो मत्स्य हृतो मत्सुसूचकः उलूको घूकः प्र
त्युलूकः तत्प्रतिपक्षो घूकः काको वा कुह्वानैः कुत्सितशब्दैर्विश्वं शून्यमिच्छतः॥१४॥ धूम्राः धूम्रा दिशः परिधयोग्निमिव लोकनाहृण्वंति

शस्ताकुर्वंतिमांसव्यं दक्षिणंपशवोपरे॥ वाहांश्चकुर्वंत्याघ्रलस्येहृदंगेमम॥१३॥ म
त्सुहतःकपोतोयमुलूकःकंपयन्मनः॥ प्रत्युलूकश्चकुह्वानैरनिद्रोमृत्युमिच्छतः
॥१४॥ धूम्रादिशःपरिधयःकंपतेभूःसहाद्रिभिः॥ निर्घातश्चमहानासीत्साकंचस्तनयि
त्नुभिः॥ वायुर्वातिखरस्पर्शोरजसाविसृजंस्तमः॥१६॥ असृग्वर्षतिजलदाबीभत्समि
वसर्वतः॥ सूर्यंहतप्रभंपश्यग्रहमर्दंमिथोदिवि॥१७॥ ॥छ॥ ॥छ॥

दिव्यानाहसार्द्धाभ्यां निर्घातो निरभ्रवज्रपातः स्तनयित्नुतमः विशेषेणासृजन् असृक्रूरकं॥१६॥ ग्रहाणां मर्दं युद्धं भूतारुद्रानुचराः तेषां गणै
स संकुलैः ध्मामिश्चैः प्राणिभिः सहितैः रोदसी द्यावापृथिव्यौ ज्वलीतिप्रदीप्तेरच्ववपश्येति॥१७॥+ वोगर्जितानिते:सह:॥१५॥+२॥

पुनर्भौमानाह ॥ नद्य इति साह्रैंस्त्रिभिः प्राणिनां मनांसि च ॥१८॥ न उह्यंतीति कर्म्मकर्त्तर्योर्षेन प्रस्नुवंतीत्यर्थः देवतानि प्रतिमाः ॥१९॥ आद्यं दुःखं ॥२०॥ एतैः
क्लुप्तानविद्यंते अन्येषु पुरुषेषु श्रीर्वज्रांकुशादिशोभा येषां तैर्भगवतः पदैर्हीना भूरित्यहं मन्ये ॥२१॥ तस्य राज्ञः इत्येवं दृष्टानि अरिष्टानि येन तेन चेत

ससंकुलैर्भूतगणैर्ज्वलिते इव रोदसी ॥ नद्यो नद्यश्च क्षुभिताः सरांसि च मनांसि च ॥१८॥ न ज्वलत्य
ग्निराज्येन कालोयं किं विधास्यति ॥ न पिबंति स्तनं वत्सा न दुह्यंति च मातरः ॥१९॥ रुदंत्यश्रुमुखा
गावो न हृष्यंत्यृषभा व्रजे ॥ दैवतानि रुदंतीव स्विद्यंति ह्युच्चलंति च ॥२०॥ इमे जनपदा ग्रामाः पुरो
द्यानाकराश्रमाः भ्रष्टश्रियो निरानंदाः ॥ किमघं दर्शयंति नः ॥२१॥ मन्य एतैर्महोत्पातैर्नूनं भग
वतः पदैः ॥ अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा ॥२२॥ इति चिंतयतस्तस्य दृष्टारिष्टेन चेत
सा ॥ राज्ञः प्रत्यागमद्ब्रह्मन्यदुपुर्याः कपिध्वजः ॥२३॥ ॥ छ ॥ छ

सा चिंतयतः सतः ॥२२॥ अथ यथा सर्वं नियतिं मंतदेवाह आतुरमित्यादि अपां विहूत अश्रूणि नेत्राभ्यां विसृजंतमित्यर्थः ॥२३॥ ॥ छ

उद्विग्नं कंपितं हृदयं यस्य विच्छायं विगतकांतिं ॥२४॥ स्वजना बांधवाः ॥२५॥ किं वक्ष्यतीति शंकया अव्यवहितं नके मेणाष्ट छति स्म इत्युत्सा
दिनामान्त्यो मातामह ॥ आनकदुंदुभिः वसुदेवः ॥२६॥ स्वसारः परस्परं ॥ वसुदेवक्षेमेण त्वामपि क्षेमं पृष्टमेव न त्वया पि पृष्टं थ कृष्टं छति स्म

तेन पादयोर्निपतितमयथापूर्वमातुरं ॥ अधोमुखं बाष्पबिंदून्सृजंतं नयनाब्जयोः ॥२४॥
विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः ॥ पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितं ॥२५॥
युधिष्ठिर उवाच ॥ कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते ॥ मधुभोजदशार्हार्हाः सात्व
तांधकवृष्णयः ॥२६॥ शूरो मातामहः कच्चित्स्वस्त्यास्ते वाथ मारिषः ॥ मातुलः सानुजः कु
च्चित्कुशल्यानकदुंदुभिः ॥२७॥ सप्तस्वसारस्तत्पत्न्यो मातुलान्यः सहात्मजाः ॥ आसते स
स्नुषाः क्षेमं देवकीप्रमुखाः स्वयं ॥२८॥ कच्चिद्राजाहुको जीवत्यसत्पुत्रोस्य चानुजः ॥ हृदी
कः ससुतोक्रूरो जयंतगदसारणाः ॥२९॥

यमिति ॥२७॥ आहुकः उग्रसेनः असत्पुत्रो यस्य अत एव जीवनमात्रमेव पृ
ष्टं अनुजश्च देवकः हृदीसुतः कृतवर्मा जयंताहयः कृष्णभ्रातरः ॥२९॥ ॥

सर्ववृष्णीनां मध्ये महारथः गंभीररयः युद्धे महावेगः वर्द्धते मोदते इत्यर्थः ॥३०॥ कृष्णस्यापत्यानि कार्ष्णयस्तेषु प्रवराः ॥३१॥ सुनंदनंदौ शीर्षण्यौ येषां ते ॥३३॥ भगवतीसुखमास्ते इति प्रश्नस्यानौचित्यमाशंक्याह पुर इत्यादि ॥३४॥ भगवतो त्रावस्थाने हि लोकानां मंगलं नान्यथे

आसते कुशलं कच्चिद्ये च शत्रुजितादयः॥ कच्चिदास्ते सुखं रामो भगवान्सात्वतां पतिः ॥३०॥ प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः॥ गंभीररयोनिरुद्धो वर्द्धते भगवानुत ॥३१॥ सुषेणश्चारुदेष्णश्च सांबो जांबवतीसुतः॥ अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः॥३२॥ तथैवानुचराः शौरेः श्रुतदेवोद्धवादयः॥ सुनंदनंदशीर्षण्या ये चान्ये सात्वतर्षभाः॥३३॥ अपि स्वस्त्यासते सर्वे रामकृष्णभुजाश्रयाः॥ अपि स्मरंति कुशलमस्माकं बद्धसौहृदाः॥३४॥ भगवानपि गोविंदो ब्रह्मण्यो भक्तवत्सलः॥ कच्चित्पुरे सुधर्मायां सुखमास्ते

ति त्याशयेनाह चतुर्भिः मंगलाय शुभाय क्षेमाय लब्धपालनाय भवाय अनंत सखः बलभद्रसहायः ॥३५॥ ॥ ॥

अर्चिताः सर्वैः पूजिताः परमानंदं यथा भवति तथा ॥ महापौरुषिकाः वैकुंठनाथानुचराः ॥३७॥ यस्य पादशुश्रूषणमेव मुख्यं तप आदिभ्यः श्रे
ष्ठं यत्कर्म तेन सत्यभामादयः संख्ये युद्धे श्रीकृष्णबलेन निर्जित्य तदाशिषः देवभोग्यान् पारिजातादीन् ॥ वज्रायुधस्य वल्लभा शची तस्याः

मंगलाय च लोकानां क्षेमाय च भवाय च ॥ आस्ते यदुकुलांभोधावाद्योनंतसखः पुमान्
॥३६॥ यद्बाहुदंडगुप्तायां स्वपुर्यां यदवोर्चिताः क्रीडंति परमानंदं महापौरुषिका इव
॥३७॥ यत्पादशुश्रूषणमुख्यकर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः ॥ निर्जित्य संख्ये त्रि
दशांस्तदाशिषो हरंति वज्रायुधवल्लभोचिताः ॥३८॥ यद्बाहुदंडाभ्युदयानुजीविनो
यदुप्रवीरा ह्यकुतोभया मुहुः ॥ अधिक्रमंत्यंघ्रिभिराहृतां बलात्सभां सुधर्मां सुरसत्तमो
चितां ॥३९॥

उचिताः ॥३८॥ यद्बाहुदंडप्रभावोपजीविनः सुधर्मामंघ्रिभिरधिक्रामंति सत्तगोविंदः सुरवमा स्तेइति गतपंचमश्लोकेना
न्वयः ॥३९॥ इदानीं तस्यैव कुशलं पृच्छति कच्चिदिति षड्भिः अनामयमारोग्यं पन लब्धमानो येन बंधुभ्यः सकाशात् किं वा तैः प्रत्युत अवज्ञातः
तिरस्कृतः यतश्चिरोषितः बहुकालं तत्र स्थितः ॥४०॥

अभावैरिति छेदः प्रेमश्चत्यैः अमंगलैः परुषैः शब्दादिभिः नाभिहतः न ताडितोसि किं ॥ यद्वा ॥ अर्थिभ्यः किमपि दास्यामीति नोक्तं किं यद्वा
आशया सह यथा आशा भवति तथा दास्यामीति ॥ प्रतिश्रुतं सन्न दत्तं किं ॥ ४१ ॥ अन्यद्वा शरणागतं सत्वं प्राणिमात्रं न त्यक्तवानसि किं

कच्चिन्नेनामयं तात भ्रष्टतेजा विभासि मे ॥ अलब्धमानोवज्ञातः किं वा तत्र चिरोषितः ॥ ४० ॥
कच्चिन्नाभिहतोभावैः शब्दादिभिरमंगलैः ॥ न दत्तमुक्तमर्थिभ्य आशया यत्प्रतिश्रुतं
॥ ४१ ॥ कच्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियं ॥ शरणोपसृतं सत्वं नात्याक्षीः शरणा
प्रदः ॥ ४२ ॥ कच्चित्त्वं नागमोगम्यां वासत्कृतां स्त्रियं ॥ पराजितो वाथ भवान्नोत्तमैर्नो
समैः पथि ॥ ४३ ॥ ॥ ७ ॥

यतस्त्वं सर्वेषु शरणाप्रदः आश्रयप्रदः ॥ ४२ ॥ अगम्यामिति छेदः निंद्यां स्त्रियं संगमः किं न गतवानसि असत्कृतां मलिनवस्त्रादिना ऽगमः किं नोत्तमैः अतुल्यैः समैः सदृशैः अधमैर्वा किं न पराजितोऽसि सर्वथा ॥ ४३ ॥ ॥

भा॰प्र॰
॥८४॥

संभोजनार्हान्वृद्धान्बालकांश्च किंस्वित्सर्वं भुंक्थाः स्वक्त्वा भुक्तवानसि अक्षमं कर्तुमयोग्यं यत्तत्कृतवानसि किं ॥४४॥ निःस्वमसहायं प्रेष्ठतमेन हृदयेनात्मबंधुना श्रीकृष्णेन रहितः शून्योस्मीति मन्यसे इत्यर्थः ॥ अन्यथा ते रुक्मनःपीडा न घटेत ॥४५॥ इति प्रथमे चतुर्दशः ॥

स्वक्त्वास्वित्सर्वं भुंक्थास्त्वं संभोज्यान्वृद्धबालकान् ॥ जुगुप्सितं कर्म किंचित्कृतवान्न यदक्षमं ॥४४॥ कच्चित्प्रेष्ठतमेनाथ हृदयेनात्मबंधुना ॥ शून्योस्मि रहितो नित्यं मन्यसे तेन्यथा न रुक् ॥४५॥ इति श्रीभा॰म॰प्र॰ युधिष्ठिरानुतापो नाम चतुर्दशः ॥१४॥ सूत उ॰ ॥ एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः ॥ नानाशंकास्पदं रूपं कृष्णविश्लेषकर्शितः ॥१॥ शोकेन शुष्यद्वदनहृत्सरोजो हतप्रभः ॥ विभुं तमेवानुध्यायन्नाशक्नोत्प्रतिभाषितुं ॥२॥

कलिप्रवेशमालक्ष्य धुरं स्वस्य परीक्षिति ॥ आरुरोहत्पः स्वर्गमिति पंचदशेब्रवीत् ॥१॥ कृष्णोर्जुनः आविकल्पित इति छेदः नानाशंकास्पदं रूपमालक्ष्य विकल्पित इत्यर्थः प्रतिभाषितुं नाशक्नोदित्युत्तरेणान्वयः तत्र हेतवः कृष्णविश्लेषेण कर्शितः कृशः कृतः ॥१॥ शोकेन हेतुना वदनं च हृच्च ते एव सरोजे शुष्यती वदनहृत्सरोजे यस्य सः हता प्रभा तेजो यस्य सः ॥२॥

राम
॥८४॥

शुचः शोकाश्रूणि पाणिना मृज्य उन्मृज्य नेत्रयोरेव संस्तभ्य गलितानि च पाणिना आमृज्य परोक्षेण दर्शनागोचरेण श्रीकृष्णेन हेतुना समुत्कृष्ट अधिकं यत्प्रेमौत्कंठ्यं तेन कातरः व्याकुलः नृपमित्याह हेतुत्त्वरेणान्वयः ॥३॥ सख्यं हितैषिणां मैत्री उपकारिणां सुहृत्त्वं संबंधिनां च ॥ बाष्पेण कंठविरोधात्गद्गदया गिरा ॥४॥ येन मां वंचयित्वा देवानां विस्मापयतीयत् ॥५॥ यस्य कृष्णवियोगेन सारिर्यच्छद्यानां तेनाहमद्य मुषितः

कृच्छ्रेण संस्तभ्य शुचः पाणिना मृज्य नेत्रयोः ॥ परोक्षेण समुत्कृष्टप्रणयोत्कंठ्यकातरः ॥३॥
सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन् ॥ नृपमग्रजमित्याह बाष्पगद्गदया गिरा ॥४॥
अर्जुन उवाच ॥ वंचितोहं महाराज हरिणा बंधुरूपिणा ॥ येन मेपहृतं तेजो देवविस्मापनं
महत् ॥५॥ यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः ॥ उक्थेन रहितो ह्येष मृतकः प्रो
च्यते यथा ॥६॥ यत्संश्रयाद्द्रुपदगेहमुपागतानां राज्ञां स्वयंवरमुखे स्मरदुर्मदानां ॥ तेजो
हृतं खलु मयाभिहतश्च मत्स्यः सज्जीकृतेन धनुषा

इति सप्तमश्लोकस्थेन तच्छब्देन संबंधः प्रियस्यापि अप्रियत्वे दृष्टांतः उक्थेन प्राणेन रहितः पित्रादिः ॥६॥ श्रीकृष्णोपकाराननुस्मरति यत्संश्रयादिति दशभिः यस्य संश्रयात्प्रसादेन कामेन दुर्मदानामतिमत्तानां

उद्दीति विग्रहे खांडवं इंद्रस्य वनं आ दीदत्त वानसि ॥ खांडव दाहे रक्षितेन मयेन कृता च सभा लब्धा अद्भुतशिल्परूपा माया यस्यां ताते अध्वरे या
गे राजसूये ॥ ८ ॥ अनंतरश्लोकौ विगीतत्वात्तथापि व्याख्यायेते तत्पशिरः स्वंघ्रिये यस्य तं जरासंधं तवानुजो भीमः मरुदर्थ महन् हतवान् जन्मियं
यं विना राजसूयमख्त्वानुपपन्नेः राजा युतस्य वसत्वमुत्साहशक्तिः ॥ वीर्यं बलं च यस्य सः संहत्वा प्रमनाथ्या महाभैरवजस्य मरवाय ये राजान
स्तेनाहृतास्ते यस्मान्मोचिताः तस्मात्ते अध्वरे बलिमानीनवंत ॥ ९ ॥ ये किं नवे दुःशासनादिभिस्तव पत्न्याः कचवरं विकीर्य उन्मुच्य स्पृष्टं

यत्संनिधावहमुखांडवमग्नयेदामिंद्रं च सामरगणं तरसाविजित्य ॥ लब्ध्वा सभा मयकृताद्भुतशिल्पमा
याद्दिग्भ्यो हरन्नृपतयो बलिमध्वरे ते ॥ ८ ॥ यत्तेजसा तु पशिरोंघ्रिमहन्मरवार्थे भीमोनुजस्तव गजायु
तसत्ववीर्यः ॥ तेनाहृता प्रथममनाथमरवाय तूयायन्मोचितास्तदनय बलिमध्वरे ते ॥ ९ ॥ पत्न्यास्तवा
धिमखं कृत्स्नमहाभिषेकश्लाघिष्ट चारुकचवरं तव वैः सभायां स्पृष्टं विकीर्णपदयोः पतितानुमुख्या
कि
यत्संस्त्रियो कृत नहतेशविमुक्तकेशाः ॥ १० ॥

आकृष्टे तेषां स्त्रियो वा हतेशाः अजनि एवं वैधव्यात् मुक्तकेशा अकृत न चकार
कथं भूतं कचवरं ॥ अधिमखं राजसूयमधिकृत्य कृत्स्नो योऽवभृथो महाभिषेकस्तेन श्लाघ्यतमं वा चारु रम्यं युतस्मरणात् तदीनीमेव यायात् समाप्ती
कृत्स्नस्य तन्मनेपदयोः पतितान् पश्य ऋषीन् मुखात् यस्याः पत्न्याः पदद्वये सा पतस्यापि पतितनराद्ग स्याकृपेदन समासोनिस्पताप क्षिनत्वात् ॥ १० ॥

राम
॥ ८५ ॥

शिष्याणामयुतस्यायेन संकेतौ भुंक्ते यस्तस्माद्दुर्वाससो हेतोः ॥ अरिणा दुर्योधनेन रचितं यन्नदुरंतं कृच्छ्रं शापलक्षणं तस्मात्सकाशात् नोऽस्मा
न्वनेऽरक्षज्जुगोप ॥ किं कृत्वा ॥ शाकमेवान्नं तस्मिन्पात्रे भवं शिष्टं उपयुज्य जग्ध्वा ॥ यत उपयोगात्सलिले विनिमग्नो मुनीनां संघः त्रिलोकी
तृप्तामंस्त ॥ एवं हि भारते कथा ॥ कदाचित् दुर्वाससो दुर्योधनेनातिथ्यं कृतं तेन च परितुष्टेन वरं वृणीष्वेत्युक्तं दुर्वाससः शापात्पांडवा नश्येयु
रिति मनसि विधाय दुर्योधनेनोक्तं ॥ युधिष्ठिरोऽस्मत्कुलमुख्योऽतस्तस्यापि भवताऽऽएवमेव शिष्यायुतसहितेनातिथिना भवितव्यं ॥ किं
तु द्रौपदी यथा सुखासीना वसीदेत् तथा तस्यां भुक्तवत्यां तद्गृहं गंतव्यमिति ॥ ततश्च तथैव दुर्वाससि मार्गे परमोत्तरेण युधिष्ठिरेणाध्या॥

योऽनेनाजुगोप वनमेत्य दुरंतकृच्छ्राद्दुर्वाससोऽरिरचिताद्युनायभुग्यः ॥ शाकान्नशिष्टमुपयुज्य यत
स्त्रिलोकीं तृप्तामंस्त सलिलविनिमग्नसंघः ॥२१॥ ॥ छ ॥ छ

न्हि किं कृत्वा गम्यतामिति विज्ञापितो मुनिसंघोऽघमर्षणाय जले निममज्ज ॥ तत्र चिंतातुरया द्रौपद्या स्मृतमात्रः श्रीकृष्णः तत्स्थाने तु भक्त
वात्सल्येन तयाचावेदिते वृत्तांते भगवता कृष्णेन द्रौपद्यहं च बुभुक्षितोऽस्मि प्रथमं मां भोजय ॥ तयाचातिलज्जयोक्तं स्वामिन् मद्भोजनपर्यंतमक्षयम
प्यन्नं सूर्यदत्तस्थाल्यां मया च सर्वान्संभोज्य भुक्तमतो नास्त्यन्नमिति ॥ तथाप्यतिनिर्बंधेन स्थालीमानाप्य तत्कंठलग्नं किंचित्शाका
न्नं प्राश्योक्तं अनेन विश्वात्मा भगवान्तृप्तः ॥ अथ भोक्तुं मुनिसंघमाह्वयेति ॥ स च गत्वा नातितृप्तः वृथापाकभयेन पलायित इति ॥ २१ ॥

गिरिजासहितो विस्मापितः स नूनं जंपाशुपतमस्त्रं॥ अन्ये चापि लोकपाला निजास्त्राणि ददुः॥ अन्यदप्याश्चर्यमाह॥ अमुनैवेति महत्तरं द्रुह्यासनार्धं॥
१२॥ तत्रैव स्वर्गे क्रीडतः गांडीवं लक्षणं चिह्नं यस्य स ततः॥ अरातयो निवातकवचादैत्याः तेषां वधार्थं मासिनवंतः॥ येनानुभाविनं प्रभावयुक्तं कृतं तेऽहं आज-
मीढयुधिष्ठिर तेन मुषितः वंचितोस्मि॥ कथंभूतेन॥ स्वस्मा निजमहिमावष्टानेन॥१३॥ यद्बांधव इत्यादिश्लोकत्रयस्यापि तेन मुषितोऽहमिति स-

यत्नेन साथ भगवान्युधि शूलपाणिर्विस्मापितः स गिरिजोस्त्रमदान्निजं मे॥ अन्येपि चाहममुनैव क-
लेवरेण मासो महेंद्रभवने महदासनार्धं॥१२॥ तत्रैव मे विहरतो भुजदंडयुग्मं गांडीवलक्षणमराति-
वधाय देवाः॥ सेंद्राः श्रिता यदनुभाविनमाजमीढ तेनाहमद्य मुषितः पुरुषेण भूम्ना॥१३॥ यद्बां-
धवः कुरुबलाब्धिमनंतपारमेको रथेन ततरेहमतीर्यसत्वं॥ प्रत्याहृतं बहुधनं च मया परेषां तेजः
स्पदं मणिमयं च हृतं शिरोभ्यः॥१४॥

वैरीव संबंधः॥ श्रीकृष्णबांधव एक एवाहं कौरवसैन्याब्धिं॥ नास्त्यंतो गांभीर्येण पारं वेदे ज्ञांतो
यस्य तं॥ ततरे तीर्णवान्॥ उत्तरगोग्रहणे॥ अतार्याणि दुस्तराणि सत्वानि तिमिंगिलादीनि भीष्मादिरूपाणि यस्मिन्॥ परैर्नीतं गोधनं प्रत्याहृतं परेषां
शिरोभ्यः सकाशात्तेजस्पदं प्रभावस्यास्पदमुष्णीषरूपं मणिमयं मुकुटरूपं च बहुधनं ताननुमोहनास्त्रेण मोहयित्वाहृतं॥ यद्बांधवेन मया॥१४॥

अदभ्राः अनल्पा ये राजन्यवर्याः तेषां रथमंडलैर्मंडितासु भीष्मादीनां चमूषु सारथिरूपेण ममाग्रेचरः सन् हे विभो तेषां रथयूथपानां आयुरादीनि
यो दृशा दृष्ट्यैव आर्च्छत् ॥ हृतवान् मनांसि मीमांसादिविशक्तीः सहो बलं ओजः शस्त्रादिकौशलं ॥१५॥ यस्य दोष्षु भुजेषु मां मां प्रणिहितं स्थापि

योभीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्य्यरथमंडलमंडितासु ॥ अग्रेचरोमवविभोरथयूथपानामा
युर्मनांसिचदृशासहओजआर्छेत ॥१५॥ यद्दोःषुमाप्रणिहितंगुरुभीष्मकर्णद्रौणित्रिगर्त्तशल्यसैंध
वबाह्लिकाद्यैः ॥ अस्त्राण्यमोघमहिमानिनिरूपितानिनोपस्पृशुर्नृहरिदासमिवासुराणि ॥१६॥
सौत्येवृतःकुमतिनात्मदईश्वरोमेयत्पादपद्ममभवायभजंतिभव्याः ॥ मांश्रांतवाहमरयोरथिनोभुवि
ष्ठंनप्राहरन्यदनुभावनिरस्तचित्ताः ॥१७॥ ॥ छ छ ॥

तं तेनैव गुर्वादिभिर्निरूपितानि प्रयुक्तानि अस्त्राणि न स्पृशंति स्म गुरुर्द्रोणः त्रिगर्तः त्रिगर्त्तदेशाधिपतिः सुशर्मा शल्यः शल्यः सैंधवः सिंधु
देशाधिपतिर्जयद्रथः बाह्लिकः शंतनोर्भ्राता अमोघो महिमा येषां तथाभूतान्यपि पाठांतरे पि सर्वार्थः प्रतीकमाकरणेयस्यै शैदृष्टान्तः नृ
हरिदासं प्रह्लादमिवेति ॥१६॥ स्वापराधमनुस्मरन् संतप्यमान आह सौत्ये सारथ्ये कुमतिना मे मया सवृत्तः कुमतिरहमेवाह ॥ आत्मद इत्यादिना

अभवायमोक्षायभव्याः श्रेष्ठाः श्रांतावाहाः अश्वायस्यतंमांजयद्रथः वधेहिजलपानंविनाअश्वाःश्रांतास्ततोरथ्यादवतीर्यवारोर्युवंभित्वाजलं
तैःपायितंमयातदायस्योनुभावेननिरस्तचिन्ताः॥ अरयोमांनप्रहृतवंतः समोस्मेवरचतइतिकुमतित्वम्॥ २७॥ हेनरदेवउदारंगंभीरंस

नर्माण्युदाररुचिरस्मितशोभितानि॥ हेपार्थहेर्जुनसखेतिकुरुनंदनेति॥ संजल्पितानिनरदेव
हृदिस्पृशानिस्मर्तुर्लुठंतिहृदयंममामाधवस्य॥ २८॥ ॥ छ ॥

चिरंस्मितंतेनशोभितानिनर्माणिपरिहासवाक्यानितथाकार्यप्रस्तावेषुहेपार्थेत्यादीनिमधुराक्षराणिसंजल्पितानिचहृदिस्पृशानिमनो
ज्ञानिमाधवस्ययान्यपृतानितानीदानींस्मर्तुर्ममहृदयंलुठंतिलोठयंतिक्षोभयंतिनिजभावआर्षः॥२८॥ ॥ छ

विकत्थनं स्वगुणश्लाघनादि शय्यादिषु एकात् अव्यतिरेकाद्धेतोः कदाचिद्वा मिचारं दृष्ट्वा हे वयस्य ऋतवान् असत्यमुक्तस्त्वं इति वक्रोक्त्यापि वि
प्रलब्धोऽतिरस्कृतोपि ॥ ऋभुमान इति पाठे ऋभवो देवाः सेवकाः संति यस्य असौ महानपि मया वयस्य इति मत्वा विप्रलब्धः तिरस्कृत
इत्यर्थः । ऋतमान् इति पाठे वत्वाभाव आर्षः मे अयं अपराधं असहत महितया महत्वेन ॥ एकपदे अतिमहत्वेनेत्यर्थः सख्युरघं स

शय्यासनाटनविकत्थनभोजनादिष्वेक्याद्वयस्य ऋतवानिति विप्रलब्धः सख्युः सखेव पि
तृवत्तनयस्य सर्वं सेहे महान्महितया कुमतेरघं मे ॥१९॥ सोहं नृपेंद्र रहितः पुरुषोत्तमेन स
ख्या प्रियेण सुहृदा हृदयेन शून्यः ॥ अध्वन्युरुक्रमपरिग्रहमंग रक्षन् ॥ गोपैरसद्भिरबलेव विनि
र्जितोस्मि ॥२०॥

स्ववत्तनयस्याघं पितेव त्वया शंकितं पराजयं च प्राप्तोहमित्याह तेन सख्या रहितः अतो हृदयेन शून्यः अंग हे राजन् उरुक्रमस्य परिग्रहं षो
डशसहस्रस्त्रीलक्षणं असद्भिर्नीचैः ॥ अबलयाएव ॥२०॥ ॥ छ ॥ छ ॥ ॥

कृष्णवियोग एव अत्र हेतुर्नान्य इत्याह तदिति ॥ यतः येभ्यः नृपतयो नमंति ईशेन रिक्तं शून्यं ॥ असत्कार्याक्षमं भस्मन्नं च विधानैरपि भस्मनि हुतमिव ॥ अतिप्रीणनादपि कुहकान्मायाविनः सकाशात् राद्धं लब्धं यथा सम्यक्कर्षणादिनापि ऊषरभूमौ उप्तं बीजमिव ॥२१॥ सुहृत्पुरे

तद्वै धनुस्त इषवः स रथो हयास्ते सोहं रथी नृपतयो यत आनमंति ॥ सर्वं क्षणेन तदभूदसदीशरिक्तं भस्मन्हुतं कुहकराद्धमिवोप्तमूष्यां ॥२१॥ राजंस्त्वयाभिपृष्टानां सुहृदां नः सुहृत्पुरे ॥ विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः ॥२२॥ वारुणीं मदिरां पीत्वा मदोन्मथितचेतसां ॥ अजानतामिवान्योन्यं चतुःपंचावशेषिताः ॥२३॥ प्रायेणैतद्भगवत ईश्वरस्य विचेष्टितं ॥ मिथो निघ्नंति भूतानि भावयंति च यन्मिथः ॥२४॥ ॥

ॐ

त्वयापृष्टानां नः सुहृदां मध्ये चत्वारः पंच वा अवशेषिताः तत्र हेतुः विप्रशापेत्यादि वारुणीं अन्नमयीं अजानतामिवान्योन्यमेरकामुष्टिभिर्निघ्नतां अवशेषिता इत्यनेनोक्तं हेतुकर्तारमाह त्रिभिः प्रायेणेति ॥ भावयंति पालयंति ॥२४॥

जलौकसां मत्स्यादीनां मध्ये महांतः स्थूलाः अणीयसः सूक्ष्मान् ग्रासयंति ॥ एवं वलिष्टैर्महद्भिः पांडवैर्दुर्योधनं जरासंधादीन्पडुभिः इतरान् शाल्वादीन्निहत्य हत्यद्दुभिरन्योन्यं निहत्य भगवान् भुवो भारभूतान्हत्वान् अतः परं वक्तुं न शक्नोमीति सूचयन्

जलौकसां जले यद्वन् महांतोऽदंत्यणीयसः ॥ दुर्बलान्वलिनो राजन् महांतो वलिनो मिथः ॥२५॥ एवं वलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः यदून्यदुभिरन्योन्यं भूभारान्संजहार ह ॥२६॥

देशकालार्थयुक्तानि हृत्तापोपशमानि च ॥ हरंति स्मरतश्चित्तं गोविंदाभिहितानि मे ॥२७॥ एवं चिंतयतो जिष्णोः कृष्णपादसरोरुहं ॥ सौहार्देनातिगाढेन शांतासीद्विमला मतिः ॥२८॥

लाह देशकालोचितार्थयुक्तानि मनः पीडोपशमकराणि गोविंदस्य वचनानि स्मरतो मे मम चित्तं हरंति आकर्षंतीत्येवमितिस्मोक्ति अतिदृढेन स्नेहेन कृष्णपादसरोरुहं चिंतयतोऽर्जुनस्य मतिः शांता विशोका विमला विरक्ता चासीत् ॥२८॥ ॥ ५

भा॰ प्र॰ ॥८९॥

मतिवैमल्यफलमाह वासुदेवांघ्र्यनुध्यानेन परिबृंहितं रंहो वेगो यस्य: तया निर्मथिता उन्मूलिता: अशेषा: कषाया: कामादयो यस्या:
सा धिषणा बुद्धिर्यस्य स: ॥ ज्ञानं पुनरध्यगमदित्युत्तरेणान्वय: ॥२९॥ कालेन कर्मभि: तमसा भोगाभिनिवेशेन च रुद्धं आवृतं सत् ॥३०॥
ज्ञानफलमाह विशोक इति एतेन देवशोकहेत्वभावेनोपपादयति ॥ शोकस्य हि हेतुर्द्वैतभ्रम: तस्य देह: तस्य लिंगं तस्य गुणा: तेषा

वासुदेवांघ्र्यभिध्यानपरिबृंहितरंहसा ॥ भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुन: ॥२९॥
गीतं भगवता ज्ञानं यत्तत्संग्राममूर्द्धनि ॥ कालकर्मतमोरुद्धं पुनरध्यगमत्प्रभु: ॥३०॥
विशोको ब्रह्मसंपत्त्या संछिन्नद्वैतसंशय: ॥ लीनप्रकृतिनैर्गुण्यादलिंगत्वादसंभव: ॥३१॥

मविद्या तत्र ब्रह्मसंपत्त्या वेदांतश्रवणोत्थया ब्रह्माहमिति ज्ञानेन लीना प्रकृतिरविद्या यस्मिन् तेन नैर्गुण्यं प्रकृतिनिवृत्तौ सुषुप्तिमूर्छयोरिवाऽवि
द्याशेष: ॥ तस्मान्नैर्गुण्याद्गुणकार्यलिंगनाश: अलिंगत्वाच्च असंभव: सम्यक् भोगपायनं भवति पुन: पुनरिति संभव: स्थूलशरीरं तद्र
हित: ॥ ततश्च भ्रमस्याविच्छेदाभावात्संछिन्नो द्वैतलक्षण: संशयो भ्रमो यस्य स: विशोको जात इति ॥३१॥ ॥ ॥

प्रम ॥८९॥

भगवतो मार्गं आलस्य यदुकुलस्य संस्थां नाशं श्रुत्वा नारदोक्तं चानुस्मृत्य स्वःपथाय स्वर्गमार्गाय निभृतात्मा निश्चलचित्तः ॥३२॥ तां
भगवद्गतिं दुर्विज्ञेयां च क्ष्यति हि ॥ सौदामिन्या यथाकाशे यांत्या हित्वाभ्रमंडलं गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैरिति
संसृतेरुपरराम जीवन्मुक्ताबभूव देहं जहाविति वा ॥३३॥ नन्वेवमुक्तमपि प्रादुर्भावस्य भगवतो वैलक्षण्यमबुध्वा तत्साम्यं वद

निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च । स्वःपथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः ॥३२॥
पृथाप्यनुश्रुत्य धनंजयोदितं नाशं यदूनां भगवद्गतिं च तां । एकांतभक्त्या भगवत्यधोक्षजे निवेशितात्मोपरराम संसृतेः ॥३३॥ ययाहरद्भुवो भारं तां तनुं विजहावजः । कंटकं कंटकेनेव द्वयं चापीशितुः समं ॥३४॥ यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः । भूभारः क्षपितो येन जहौ तच्च कलेवरं ॥३५॥ ॥

तो मंदमतीन्प्रति वैलक्षण्यं स्पष्टयति द्वाभ्यां ययेति यया यादवरूपया तन्वा भुवो भारं कंटकेन कंटकमिवाहरत् ॥ सा यादवतनुः नूत्न
रतनुश्चेति द्वयमपि ईश्वरस्य सहायत्वेन सममेव ॥३४॥ श्रीकृष्णमनुष्यदेहे विशेषमाह यथेति नान्यपि यथा धत्ते जहाति च तद्व

यथा नटो नेकानि रूपाणि धत्ते जहाति च तथा भगवानपि मत्स्यादिरूपाणि धत्ते जहाति च
तथैव भूभारहरणार्थं कृष्णदेहं जहौ इति भावः
तद्देहम् ॥३५॥

भा॰ प्र॰
॥ ९० ॥

युधिष्ठिरस्य स्वर्गारोहणप्रसंगाय कलिप्रवेशमाह ॥ यदेति ॥ स्वतन्वा जहौ ॥ स्वतनोरेव वैकुंठारोहात् श्रवणीया सती कथा यस्य तदा यदहस्तस्मिन्नेव अहनि इति लुप्तसप्तम्यंतं पदं ॥ अप्रतिबुद्धचेतसामिति विवेकिनां तु न प्रभुरिति सूचितं ॥ अन्ववर्ततेति

यदा मुकुंदो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः ॥ तदाहरेवाप्रतिबुद्धचेतसामभद्रहेतुः ॥ कलिरन्ववर्तत ॥ ३६ ॥ युधिष्ठिरस्तत्परिसर्पणं बुधः ॥ पुरे च राष्ट्रे च गृहे तथात्मनि ॥ विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात् ॥ ३७ ॥ स्वराट् पौत्रं विनयिनमात्मनः ॥ सुसमं गुणैः ॥ तोयनीव्याः पतिं भूमेरभ्यषिंचद्गजाह्वये ॥ ३८ ॥

दृश्यमेवांशेन प्रविष्टस्य तेन रूपेणानुवृत्तिरुक्ता ॥ ३६ ॥ बुधो युधिष्ठिरः तस्य कलेः परिसर्पणं प्रसरणं विलोक्य कथंभूतं लोभाद्यधर्मचक्रं यस्मिन् जिह्मं कौटिल्यं पर्यधात् तत्तदुचितं परिधानमकरोदित्यर्थः ॥ ३७ ॥ आत्मनः स्वस्य गुणैः सुसमं अतिसदृशं तोयं सर्वतः स्थितसमुद्रोदकमेव नीवी परिधानविशेषो यस्याः भूमेः पतित्वेनाभिषिक्तवान् ॥ ३८ ॥

राम
॥ ९० ॥

वज्रं अनिरुद्धस्य पुत्रं निरूप्य कृत्वेत्यर्थः अपिबत् आत्मन्यारोपयामास ईश्वरः समर्थः ॥३९॥ संछिन्नानि अशेषाणि बंधनानि उपाधयो येन ॥४०॥ तदेव दर्शयति द्वाभ्यां वाचमित्युपलक्षणं सर्वेंद्रियाणि मनसि प्रविलापितवानित्यर्थः तच्च मनः प्राणे प्राणाधीनवृत्तित्वात् तं च प्राणं इतरे ॥ अपाने तेनापकर्षणात् ॥ सपानव्यापार उत्सर्गः तत्सहितमपानं मृत्यौ तदधिष्ठातृदेव

मथुरायां तथा वज्रं शूरसेनपतिं ततः ॥ प्राजापत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः ॥३९॥
विसृज्य तत्र तत्सर्वं दुकूलवलयादिकं ॥ निर्ममो निरहंकारः संछिन्नाशेषबंधनः ॥४०॥
वाचं जुहाव मनसि तत्प्राण इतरे च तं ॥ मृत्यावपानं सोत्सर्गं तं पंचत्वे ह्यजोहवीत् ॥४१॥
त्रित्वे हुत्वा च पंचत्वं तच्चैकत्वेऽजुहोन्मुनिः ॥ सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ॥४२॥

तायां ॥ अनेनैव वागादिष्वपि तत्कर्मसाहित्यं ज्ञेयं ॥ तं मृत्युं पंचत्वे पंचभूतानामैक्ये देहस्यैवमस्तु नत्विन इति भावितवानित्यर्थः अजोहवीदिति यङ्लुङ् नात्र लुङि रूपं ॥४१॥ त्रित्वे गुणत्रये ॥ तच्च त्रित्वं एकत्वे अविद्यायां सर्वं सर्वारोपहेतुमविद्यां आत्मनि जीवे ॥ अजोहवीदिति वक्तव्ये अजुहवीदित्यर्थः ॥ एवं शोधितं आत्मानं ब्रह्मणि अव्यये कूटस्थेन तस्यान्यत्र लय इत्यर्थः ॥४२॥

नदेवमात्मप्रतिपत्तिमुक्त्वा बाह्यस्थितिमाह ॥ वीरवासा इति द्वाभ्यां ॥ बद्धवाक् मौनी ॥४३॥ अन्वेक्षमाणः अनुजादिप्रतीक्षामकुर्वन्
आशां दिशं गतपूर्वां पूर्वैःप्रविष्टां ॥४४॥ यतः यां दिशं ॥४५॥ अधर्ममित्रेण स्वकृताः सर्वे अर्था धर्मादयो यैः अत एव वैकुंठस्य च

चीरवासा निराहारो बद्धवाङ्मुक्तमूर्द्धजः ॥ दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत्
॥४३॥ अनवेक्षमाणो निरगादशृण्वन्बधिरो यथा ॥ उदीचीं प्रविवेशाशां गतपूर्वां महा
त्मभिः ॥४४॥ हृदि ब्रह्म परं ध्यायन्नावर्तेत यतो गतः ॥ सर्वे तमनु निर्जग्मुर्भ्रातरः कृत
निश्चयाः ॥४५॥ कलिनाधर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि ॥ ते साधुकृतसर्वार्था ज्ञा
त्वात्यंतिकमात्मनः ॥४३॥ मनसा धारयामासुर्वैकुंठचरणांबुजं ॥ तद्ध्यानोद्रिक्तया भक्त्या

रणांबुजमेव आत्यंतिकं शरणं ज्ञात्वा ॥ कथंभूतेन पदे विधूतकल्मषाणां ॥ आर (विशुद्धधिषणाः परे ॥४७॥
स्थानं निवासस्थानं यत् ॥ यस्मिन्विरजेनात्मनैव गतिं प्रापुः ॥ न तु षोडशकलेन लिंगेन गते वा विशेष ॥

णविरजेनात्मनैवावस्थानरूपां गतिं ते विधूतकल्मषाः प्रापुरिति तीर्थोत्पत्तन्प्रभासे श्रीकृष्णावेशेन कृष्णचित्तमात्मेत्यर्थः देहं परित्यज्य तद्वि
तरणवसन् ॥ तदानीं नेनुमागते ः पितृभिः सह स्वक्षयं स्वाधिकारस्थानं ययौ ॥ आत्मानं प्रति अनपेक्षतां तदा ज्ञात्वा तमाप इति एवं वय

तस्मिन्नारायणपदे एकांतमतयो गतिं ॥ अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः ॥ ४८ ॥ वि
धूतकल्मषास्थानं विरजेनात्मनैव हि ॥ विदुरोपि परित्यज्य प्रभासे देहमात्मवान् कृष्णा
वेशेन तच्चित्तः पितृभिः स्वक्षयं ययौ ॥ ४९ ॥ द्रौपदी च तदाज्ञाय पतीनामनपेक्षतां ॥ वासुदे
वे भगवति ह्येकांतमतिराप तं ॥ ५० ॥ यः श्रद्धयैतद्भगवत्प्रियाणां पांडोः सुतानामिति संप्र
याणं ॥ शृणोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिं ॥ ५१ ॥ इति भागवते महा
संप्रयाणं अलमतिशयेन स्वस्त्ययनं मंगलास्पदं अतएव पवित्रं ॥ ५१ ॥ इति पुराणे प्रथमस्कंधे पंचदशोऽध्यायः ॥ १५ ॥
श्रीभागवते प्रथमस्कंदे पंचादशोध्यायः ॥ १५ ॥

ततःषोडशेभूमिर्धर्मयोगकलिनिग्रहयोःसंवादेवर्ण्यतेमेप्रासिःपालकस्यपरीक्षितः॥१॥ द्विजवर्याणांशिक्षयामहींशशासससूत्यांजन्मन्य
भिजाताःकोविदाःजातकर्मविदःहेविप्रमहतांगुणायस्मिन्सः॥१॥ जनमेजयादीनित्यस्यसेराधिकंपछ्लोकेदसं॥२॥ आजहारकृतवानित्यर्थःशा

सूतउवाच॥ ततःपरीक्षिद्द्विजवर्यशिक्षयामहींमहाभागवतःशशासह॥ यथाहिसूत्यामभि
जातकोविदाःसमादिशन्विप्रमहद्गुणस्तथा॥१॥ सउत्तरस्यतनयामुपयेमइरावतीं॥ जनमेजया
दींश्चतुरस्तस्यामुत्पादयत्सुतान्॥२॥ आजहाराश्वमेधांस्त्रीन्गंगायांभूरिदक्षिणान्॥ शारद्वतं
गुरुंकृत्वादेवायत्राक्षिगोचराः॥३॥ निजग्राहौजसावीरःकलिंदिग्विजयेक्वचित्॥ नृपलिंगध
रंशूद्रंघ्नंतंगोमिथुनंपदा॥४॥ शौनकउवाच॥ कस्यहेतोर्निजग्राहकलिंदिग्विजयेनृपः॥ नृ
देवचिह्नधृक्शूद्रकोसौगांयःपदाहनत्॥५॥

रद्वतंकृपंयत्रयेष्वश्वमेधेषुदेवाअक्षिगोचराबभूवुः॥३॥ निजग्रा
हनिगृहीतवान्कलिमेवनिर्दिशतिनृपेति॥४॥ कस्यहे॥ तोरितिअयमर्थः कलिकस्मात्केनोःकेवलंनिजग्राहनतवान्॥ यतोसौशू
द्रकःअतिकुत्सितःयोगांपदाअहनतअहन्निति॥५॥

अस्य विष्णोः पदांभोजयोर्यो मकरंदः तं लिहंति आस्वादयंति ये तेषां सतां महतां वा कथाश्रयमिति समासान्तः कृष्णस्यानुषंगः तर्हि कथ्य
तां न चेत्किमन्यैरसद्भिरालापैः यतो यः ॥ आयुषोऽन्यथा व्ययः ॥ ६ ॥ अस्माकमयं सत्रप्रयत्नोऽपि हरिकथामृतपानार्थ एवेत्याह सार्द्धद्वाभ्यां क्षु

तत्कथ्यतां महाभाग यदि कृष्णकथाश्रयं ॥ अथवास्य पदांभोजमकरंदलिहां सतां ॥ किमन्यैरसदालापैरायुषो यदसद्व्ययः ॥ ६ ॥ क्षुद्रायुषां नृणामंग मर्त्यानामृतमिच्छतां ॥ इहोपहूतो भगवान्मृत्युः शामित्रकर्मणि ॥ ७ ॥ न कश्चिन्म्रियते तावद्यावदास्त इहांतकः ॥ एतदर्थे हि भगवानाहूतः परमर्षिभिः ॥ ८ ॥ अहो नृलोके पीयेत हरिलीलामृतं वचः ॥ यस्मिन्पीते कृत्स्नं सर्वे इष्टोत्सन्नादिकं भवेत् ॥ ९ ॥ ॥

द्रमल्पमायुर्येषां अतो मर्त्यानां मरणधर्मवतां तथापि ऋतं मोक्षमिच्छतां तेषामस्माकं मृत्युः स इह सत्रे शमितुरिदं शामित्रं कर्म पशुहिंसनं तत्र
उपहूतः ॥ ७ ॥ ततः किमत आह न कश्चिदिति ॥ ८ ॥ ततोऽपि किमत आह अहो इति लोके हरिलीलामृतं वचः पीयेत येन तदर्थं हरिली
लैवामृतं यस्मिन् ॥ ९ ॥

तद्भावे वृक्षस्येव जीवनमित्याह मंदस्य अलसस्य नक्तं रात्रौ यद्वयः आयुः तन्निद्रया ह्रियते || दिवा अहि च यद्वयः तद्व्यर्थकर्मभिर्वृथा ह्रियते ||१०
तत्र तावत्कलिनिग्रहप्रसंगमाह || यदा निजचक्रवर्तिते स्वसेनया पालिते देशे कलिं प्रविष्टं शुश्राव || तदा तां अनतिप्रियां वार्त्तां किंचित्प्रि
यां च युद्धकौतुकसंपत्तेः तां निशम्य ततः शरासनं दुष्टनिग्रहार्थमाददे संयुगे शौंडिः युद्धप्रगल्भः पाठांतरे संयुगे शौरिः शौरितुल्यः ||११

मंदस्य मंदप्रज्ञस्य वयो मंदायुषश्च वै || निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ||१०|| सूत उ
वाच || यदा परीक्षित कुरुजांगलेवसत् कलिं प्रविष्टं निजचक्रवर्तिते || निशम्य वार्त्तामनति
प्रियां ततः शरासनं संयुगशौंडिराददे ||११|| स्वलंकृतं श्यामतुरंगयोजितं रथं मृगेंद्रध्वजमा
श्रितः पुरात् || वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः ||१२|| भद्राश्वं केतु
मालं च भारतं चोत्तरान्कुरून् || किंपुरुषादीनि वर्षाणि विजित्य जगृहे बलिं ||१३|| ||

ततश्च दिग्विजयाय निर्गतः ||१२|| भद्राश्वादीनि पूर्वपश्चिमदक्षिणोत्तरतः समुद्रलग्नानि वर्षाणि मेरोः सर्वत इलावृतं ततः उत्तरतो रम्यकं हि
रण्मयं च दक्षिणतो हरिवर्षं किंपुरुषं च तानि विजि ||१३||

प्रगीयमानं यशः यश आदीनि शृण्वन्तेभ्यो ददाविति तृतीयेनान्वयः ॥२४॥ किं च स्निग्धेषु पांडवेषु विशेषो यानि सारथ्यादीनि कर्माणि ता
नि शृण्वन् तथा विष्णोर्जगत्कर्तृकां प्रणतिं च शृण्वन्नृपतिः परीक्षिद्धि हिशेश्वरपारविंदे भक्तिं करोति स्म पारषदमिति रेफषकारयोर्विपर्य

तत्रतत्रोपशृण्वानः स्वपूर्वेषां महात्मनां प्रगीयमानं च यशः कृष्णमाहात्म्यसूचकं ॥२४॥ आ
त्मानं च परित्रातम् अश्वत्थाम्नोऽस्त्रतेजसः ॥ स्नेहं च वृष्णिपार्थानां तेषां भक्तिं च केशवे ॥२५॥
तेभ्यः परमसंतुष्टः प्रीत्युज्जृंभितलोचनः ॥ महाधननिवासांसि ददौ हारान्महामनाः ॥२६॥
सारथ्यपारषदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामान् ॥ स्निग्धेषु पांडुषु जगत्प्र
णतिं च विष्णोर्भक्तिं करोति नृपतिश्चरणारविंदे ॥२७॥ तस्यैवं वर्तमानस्य पूर्वेषां वृत्तिमन्व
हं ॥ नातिदूरे किलाश्चर्यं यदासीत्तन्निबोध मे ॥२८॥ धर्मः पदैकेन चरन् विच्छायामुपलभ्य गां
पृच्छति स्माश्रुवदनां विवत्सामिव मातरम् ॥२९॥

[illegible] ॥ तत्र पार्षदं सभापतित्वं सेवनं चित्तानुवृत्तिः वीरासनं रात्रौ खड्गहस्त
स्य तिष्ठतो जागरणं ॥२७॥ वृत्तिमनुवर्तमानस्य सतः नातिदूरे शीघ्रमेव ॥२८॥ धर्मो वृषरूपं विच्छायां हतप्रभां गां गोरूपां पृथ्वीं विवत्सां न
ष्टवत्साम् ॥२९॥

भा. प्र.
॥१८४॥

ते आत्मनो देहस्य यद्यपि वहिरामयो ॥ न लक्ष्यते ॥ तथापि ॥ अंतर्मध्ये आधिः पीडा यस्याः तां त्वमालक्ष्ये के नयनतो विच्छायासि ॥ अ
त एष तत्म्लापनतो वैवर्ण्यं भजता मुखेन लिंगेन ॥ तत्र कारणानि कल्पयन् पृच्छति हे रेवधु मिस्तारिपंचभिः ॥ हे रे स्थितेनवं धुस्त्वि भिः पा
देन्यस्तं जानु एवैकपादं मा मां वृषलैः ॥ इतऊर्ध्वं नोक्ष्यमाणं पुंस्त्वमात्मपदविशेषणत्वात् ॥ हृतायते भागा येषां तान् यज्ञाद्यक र

कच्चिद्दृष्टेनामयमात्मनस्ते विच्छायासि म्लायनेषन्मुखेन ॥ आत्मस्येन वतीमनराधिं हे रेवं
धुं शोचसि कं च नाव ॥ २० ॥ पादैन्यस्तं शोचसि मे कपादमात्मानं वा वृषलैर्मोक्ष्यमाणाम् ॥ अहो
सुरादीन्हृतयज्ञभागान्प्रजा उत स्विन्न मघवन्स वर्षति ॥ २१ ॥ अरक्ष्यमाणाः स्त्रिय उर्वि बा
लान्शोचसि यो पुरुषादैरिवार्तान् ॥ वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्या
न् ॥ २२ ॥

णात् ॥ २१ ॥ हे उर्वि पृथ्वि मर्तृभिररक्ष्यमाणाः स्त्रियः पितृभिररक्ष्यमाणान्बालान् ॥ प्रत्युत ते रेव पुरुषादैरिव निर्दयैः ॥
आर्तान्क्लिष्टान्शोचसि वाचं देवीं सरस्वतीं कुकर्माणि तदुराचारस्थिताकुलान्स्यान्ब्राह्मणान्मात्मनिवक्तान् ॥ २२ ॥

स्कं
॥१८४॥

उपसृष्टान्व्याप्तान अवरोपितानि उद्घाटितानि व्यवायो मैथुनं इतस्ततः निषेधानादेशात्सर्वतो ऽशनादिषु उन्मुखं भवन्नेमानं जीवलोकं वाहे अं
वमानः धरित्रितेन वयो भूरिभारस्त्रस्यावतारणार्थं कृतावतारस्य कर्माणि स्मरतीतेन विसृष्टासनीशोचति निर्वाणाविलंवितं आश्रितयेषुता नि

किं क्षत्रवंशस्य कलिनोपसृष्टान्राष्ट्राणि वा तेस्वरोपितानि ॥ स्नानस्नानो वाशनपानवासः स्नानव्य
वायोन्मुखं जीवलोकं ॥२३॥ यत्संभवेन भूरिभरावतारकृतावतारस्य हरेर्धरित्री अंतर्हितस्य स्मर
ती विसृष्टा कर्माणि निर्वाणाविलंवितानि ॥२४॥ इदं ममावश्य न बाधि मूलं वसुंधरे येन वि
कर्षितास्मि ॥ कालेन वा तेन वलिना वलीयसा सुरार्चितेनैकं हतं मंवृतो भगम ॥२५॥ धरण्युवा
च ॥ भवान्हि वेद तत्सर्वं यन्मां धर्मानुपृच्छसि ॥ चतुर्भिर्वर्तसे येन पादैर्लोकसुखावहैः ॥२६॥

पाठांतरे निर्वाणं पीडं विवितं उपहसितं यैः मोक्षादप्यधिकसुखानीसर्थः ॥२४॥ हे अंबते सौभाग्यं कालेन वाहृतम् ॥२५॥ भवान्ज्ञानात्सेवन
यापि वस्यामीत्याशयेनाह । येन हेतुभूतेन त्वं चतुर्भिर्यादैर्वर्तसे ॥२६॥ ॥

भा॰ प्र॰
॥ ९५ ॥

यत्रतत्स्याद्येगुणानवियंतिनस्वीयंनेतेनश्रीनिवासेनरहितंशोचामीतिषष्टेनान्वयः सत्यंयथार्थभाषणंशौचंमृद्वनादयापरदुःख
सहनं॥ क्षांतिःक्रोधप्राप्तौविन्नसंयमनंत्यागः।अर्थिषुमुक्तहस्तनासंतोषःअलंबुद्धिःआर्जवंअवक्रता॥शंतामनोनैश्च्यंस्यात्दमः
वाह्येंद्रियनैश्चल्यंतपःस्वधर्मःसाम्यंअरिमित्राद्यभावः।तितिक्षापरापराधसहनंउपरतिः।लाभप्राप्तौवौदासीन्यंश्रुतंशास्त्रावि

सत्यंशौचंदयाक्षांतिस्त्यागःसंतोषआर्जवंशमोदमस्तपःसाम्यंतितिक्षोपरतिःश्रुतं॥२७॥
ज्ञानंविरक्तिरैश्वर्यंशौर्यंतेजोबलंस्मृतिः॥स्वातंत्र्यंकौशलंकांतिर्धैर्यंमार्दवमेवच॥२८॥ प्रा
गल्भ्यंप्रश्रयःशीलंसहओजोबलंभगः॥गांभीर्यंस्थैर्यमास्तिक्यंकीर्तिर्मानोनहंकृतिः॥२९॥

चारः॥२७॥ ज्ञानमात्मविषयंविरक्तिर्वैतृष्ण्यंऐश्वर्यंनियतृत्वंशौर्यंसंग्रामोत्साहः।तेजःप्रभावःपलंदक्षत्वंस्मृतिःकर्तव्यार्थानु
संधानंस्वातंत्र्यंअपराधीनताकौशलंक्रियानिपुणताकांतिःसौंदर्यंधैर्यमव्याकुलतामार्दवंचित्ताकाठिन्यं॥२८॥ प्रागल्भ्यंप्रतिभा
तिशयःप्रश्रयोविनयःशीलंसुस्वभावःसहओजोबलाभिमनसःज्ञानेंद्रियाणांकर्मेंद्रियाणांचपाटवानिभगःभोगास्पदत्वंगांभीर्यं
अलोभ्यत्वंस्थैर्यमचंचलताआस्तिक्यंश्रद्धाकीर्तिःयशःमानःपूज्यत्वंअनहंकृतिःगर्वाभावः॥२९॥

राम
॥ ९५

एते एकोनचत्वारिंशत ॥ अन्ये च ब्रह्मण्यत्वशरण्यत्वादयो महान्तो गुणा यस्मिन्लिल्याः सहजानविषंतिन क्षीयते स्म ॥ ३० ॥ तेन सुरागपात्रे

रागुणालयेन पाप्मना पापहेतुना ॥ ३१ ॥ ३२ ॥ तस्य विरहो दुःसहः स्याहचतुर्भिः ब्रह्मादयो यस्याः श्रियः अपांगमोक्षः खमिन्

इमे चान्ये च भगवल्लिस्याय यत्र महागुणाः ॥ प्रार्थ्या महत्वमिच्छद्भिर्नविर्यंति स्म कर्हिचित ॥ ३० ॥

तेनाहं गुणपात्रेण श्रीनिवासेन सांप्रतं ॥ शोचामि रहितं लोकं पाप्मना कलिनेक्षितं ॥ ३१ ॥

आत्मानं चानुशोचामि भवंतं चामरोत्तमं ॥ देवान्पितॄन्ऋषीन्साधून्सर्वान्वर्णास्त

थाश्रमान ॥ ३२ ॥ ब्रह्मादयो बहुतिथं यदपांगमोक्षकामास्तपः समचरन्भगवत्प्रपन्ना

साश्रीः स्ववासमरविंदवनं विहाय यत्पादसौभगमलं भजतेनुरक्ता ॥ ३३ ॥ ॥

ष्टिनिपातः तत्कामाः संतः बहुतिथं बहुकालं तपः समचरत्सम्यक्कृतवन्तः स भगवद्भिरुत्तमैः प्रपन्ना आश्रिता अपि सा श्रीर्यस्य पाद

लावण्यं अलमनुरक्ता सती सेवते ॥ ३३ ॥ ॥

भा॰ प्र॰
॥ ९६ ॥

तस्य भगवतः श्रीमद्भिः पादैः केतुभिः अब्जादयो केतानि चिह्नानि येषां तैः यद्वा अब्जादीनामाश्रयैः समलंकृतमंगं यस्याः साहं अतो भगवतो विभूतिं संपदं उपलभ्य प्राप्य त्रीलोकानतिक्रम्य अरोचं शोभितवत्यस्मि पश्चात्तस्या विभूते रंते नाशकाले प्राप्ते सति उत्स्मयंतीं गर्वं कुर्वाणां मां सव्य सृजत् त्यक्तवान् ॥३४॥ किंच ॥ यो वै आसुरो वंशो येषां तेषां राज्ञां ॥ अक्षौहिणीशतरूपं ममातिभरं भारं ॥ अपनी

तस्याहमब्जकुलिशांकुशकेतुकेतैः ॥ श्रीमत्पदैर्भगवतः समलंकृतांगी ॥ त्रीनत्यरोचमुपलभ्य ततो विभूतिं लोकान्स मां व्यसृजदुत्स्मयतीं तदंते ॥ यो वै ममातिभरमासुरवंशराज्ञा ॥ मक्षौहिणीशतमपानुददात्मतंत्रः ॥ त्वां दुःस्थमूनपदमात्मनि पौरुषेण संपादयन् यदुषु रम्यमबिभ्रदंगं ॥३५॥

तवान् ॥ त्वां च ऊनपदत्वात् दुःस्थं संतं पौरुषेण पुरुषाकारेण आत्मनि स्वस्मिन् संपूर्णपदं सुस्थं संपादयति लक्षणहेत्वोः क्रियाया इति हेतौ शतृप्रत्ययः संपादयितुमित्यर्थः ॥ अबिभ्रत ॥ धृतवानित्यर्थः ॥३५॥ ॥ ७

राम
॥ ९६ ॥

तस्यविरहंकावासहेतप्रेमावलोकस्यरुचिरस्मितंचवल्गुजल्पस्यचैर्मेमधुमानिनीनांसत्यभामादीनांसमानंगर्वसहितंस्थैर्यंप्रबलंवले
पःअहरत्तयस्यांघ्रिणारजस्तुध्वितेनविटंकितायाःअलंकृतायाःसस्यादिमिषरणामोत्सवोभवति ॥३६॥ कथयतोःसतोःप्रा

कावासहेततविरहंपुरुषोत्तमस्यप्रेमावलोकरुचिरस्मितवल्गुजल्पैः ॥ स्थैर्यंसमानमहरन्मधुमानिनीनांरोमोत्सवोममयदंघ्रिविटंकितायाः ॥३६॥ तयोरेवंकथयतोःपृथिवीधर्मयोस्तदा ॥ परीक्षिन्नामराजर्षिःप्राप्तःप्राचींसरस्वतीम् ॥३७॥ इतिश्रीभागवतेमहापुराणेपारमहंस्यांसंहितायांप्रथमस्कंधेषोडशोध्यायः ॥१६॥ सूतउवाच ॥ तत्रगोमिथुनंराजाहन्यमानमनाथवत् ॥ दंडहस्तंचवृषलंददृशेनृपलांछनं ॥१॥

चीसर्ववाहिनीकुरुक्षेत्रे ॥३७॥ इतिप्रथमेषोडशः ॥१६॥ ततःसप्तदशोराज्ञःकलेर्निग्रहउच्यते ॥ तस्यैवंवीर्यभाजोपिवैराग्यंवक्तुम
र्हति ॥१॥ हन्यमानंताड्यमानं ॥१॥

मृणालं पद्मकंदः तद्वद्धवलं भयान्मेहंतं मूत्रयंतं ॥ इवेत्यनेन पादावशेषो धर्मो भयान्मूत्रयन्निव प्रतिक्षणं क्षीयमाणांशः तस्याप्यनिर्वा
हात्कंपमानत्वेन निदर्शितं ॥२॥ धर्मदुघां हविर्दोग्ध्रीं क्षामां कृशां यवसं तृणं ॥ अत्रापि तस्याद्रिप्रसवस्य याद्विवत्सेव यज्ञाद्यभावात् कृश
अत एव यज्ञभागमिच्छंतीं पृथ्वी निरूपितं ॥३॥ कार्तस्वरं सुवर्णं तत्कृतः परिच्छदः परिकरो यस्य तं सुवर्णनिबद्धमित्यर्थः सज्जीकृतकार्मु

वृषं मृणालधवलं मेहंतमिव बिभ्यतं ॥ वेपमानं पदैकेन सीदंतं शूद्रताडितं ॥२॥ गां च धर्मदुघां
दीनां भृशं शूद्रपदाहतां ॥ विवत्सामश्रुवदनां क्षामां यवसमिच्छतीं ॥३॥ पप्रच्छ रथमारूढः
कार्तस्वरपरिच्छदं ॥ मेघगंभीरया वाचा समारोपितकार्मुकः ॥४॥ राजोवाच ॥ कस्त्वं मच्छ
रणे लोके बलाद्धंस्यबलान्बली ॥ नरदेवोसि वेषेण नटवत्कर्मणाद्विजः ॥५॥ कस्त्वं कृ
ष्णे गते दूरं सह गांडीवधन्वना ॥ शोच्योस्यशोच्यान्रहसि प्रहरन्वधमर्हसि ॥६॥ ॥छ

कः हंसि घातयसि राजाहमिति चेत्तत्राह नरदेववेषमात्रेण नरदेवोसि कर्मणा तु अद्विजः शूद्रः ॥५॥ अशोच्यान्निरपराधान् रह
सि स्वयं प्रहरन् प्रहरसि सि शोच्यः सापराधोसि अतो वधमर्हसि ॥६॥

वृषं प्रत्याह हे मृणालधवल त्वं वा चकः स्वयमेव तं भावयसि किं कश्चिद्देवो वृषरूपेणास्मान्परिखेदयन् वर्त्तसे ॥ ७ ॥ दोर्द्दंडैः परिरंभिते
सुरक्षिते तेषु वः अस्मद्राशिं विना अन्येषामस्मद्राशीनानुपतंतानि खेदहेतुत्वं दर्शितं ॥ ८ ॥ एवमुक्ते पुनरपि शोचंतं प्रत्याह भो सुरभेः पुत्र

त्वं वा मृणालधवल पादैस्त्र्यूनः पदा चरन् ॥ वृषरूपेण सा किं कश्चिद्देवो नः परिखेदयन् ॥ ७ ॥
न जातु कौरवेंद्राणां दोर्द्दंडपरिरंभिते ॥ भूतलेनुपतंत्यस्मिन्विना ते प्राणिनां शुचः ॥ ८ ॥ मा
सौरभेयात्र शुचो व्येतु ते वृषलाद्भयं ॥ मा रोदीरंब भद्रं ते खलानां मयि शास्तरि ॥ ९ ॥ यस्य राष्ट्रे प्र
जाः सर्वास्त्रस्यंते साध्व्य साधुभिः ॥ तस्य मत्तस्य नश्यंति कीर्त्तिरायुर्भगो गतिः ॥ १० ॥ एष रा
ज्ञां परो धर्मो ह्यार्त्तानामार्त्तिनिग्रहः ॥ अत एनं वधिष्याभि भूतद्रुहमसत्तमं ॥ ११ ॥ ॥

मा स्म शुचः ॥ शोकं मा कुरु व्येतु ॥ अपयातु गां प्रत्याह ॥ अंब मातः शास्तरि मयि जीवति सति भद्रं क्षेमं वो अतो मा रोदीः ॥ ९ ॥ नच्छिनार्थमेवैनं हनिष्यामि
ननु वा पकारयसीत्याह यस्येति द्वाभ्यां हे साध्वि सर्वा याः कश्चिदपीत्यर्थः ॥ असाधुभिः त्रस्यंते पीड्यंते नश्यति भगो भाग्यं गतिः परलोकः ॥ १० ॥ ११ ॥

भा·प्र· पुनरपिशोचंतंवृषभंप्रत्याहकः॥अहंस्वयंतच्छिद्येत्त्वादृष्ट्वाःलब्धिधादुःखिताः॥२२॥वोभद्रमस्तुआत्मनस्तवपादच्छेदेनवैरूप्यंकृतवंतं
॥९८॥ कीर्त्तिदूषयंतीतितिंतथातमाख्याहि॥२३॥तदाख्यानेकृतेकथंभद्रंस्यादित्यतआहयस्मादनागसिजनेयः॥अघंदुःखंयुंजनकुर्वन्भव

कोवृश्चत्तवपादांस्त्रीनसौरभेयचतुष्पदः॥माभूवंस्त्वादृशाराष्ट्रेराज्ञांकृष्णानुवर्त्तिनां॥२२॥आ
ख्याहिवृषभद्रंवःसाधूनामकृतागसां॥आत्मवैरूप्यकर्त्तारंपार्थानांकीर्त्तिदूषणं॥२३॥जने
नागस्यघंयुंजन्सर्वतोस्यचमद्भयम्॥साधूनांभद्रमेवास्तिअसाधुदमनेकृते॥२४॥अनागःस्वि
हभूतेषुयआगस्कृन्निरंकुशः॥आहर्त्तास्मिभुजंसाक्षादमर्त्यस्यापिसांगदं॥२५॥ ॥

निअस्यएवंभूतस्यमत्तःसकाशात्सर्वत्रापिभयंभवतिनितःसाधूनांभद्रंभवेदिति॥२४॥एतंनस्यदंडेअहमसमर्थःइतिमाशंकीरित्या
हअनागमः॥स्वितिभूतेषुआगस्कृदपराधकर्त्तातस्यामर्त्यस्यदेवस्यापिभुजमाहर्त्तास्मिआहरिष्यामिसांगदमित्यनेनमूलतउत्पाद्यहरिष्या
मीतिदर्शितं॥२५॥ ॥

राम
॥९८॥

नत्वेकस्यनिग्रहेअन्यस्यानुग्रहेनवकिंप्रयोजनंनत्राहराज्ञोहीति ॥ अन्यान्जधार्मिष्टान्सतः दंडयतः ॥ २६ ॥ साम्नानामप्रयंयस्मान्नद्व
चः वायुक्तंउचितमेव ॥ २७ ॥ वयंतुयतःपुरुषात्प्राणिनांक्लेशहेतवोभयेषु तंपुरुषंनवीजानीमः ॥ यतोवादिनांवाक्यभेदैर्विमोहिता
२८ ॥ वाक्यभेदानाहविकल्पंभेदंवसंते ॥ आच्छादयंतियेयोगिनः तेआत्मानमेवात्मनः प्रभुंसुखदुःखप्रदमाहुः नद्वक्तं ॥ आत्मैवह्य

राज्ञोहिपरमोधर्मः स्वधर्मस्यानुपालनं ॥ शासनोनान्यथाशास्त्रमनापद्युत्सयानिह ॥ २६ ॥ ध
मेउवाच ॥ एतद्दुःपांडवेयानांयुक्तमार्गानमंयवचः ॥ येषांगुरुगरोः कृष्णोदैत्यारिर्भगवान्कृ
तः ॥ २७ ॥ नवयंलोकेशवीजानीयतःस्युःपुरुषर्षभ ॥ पुरुषंतंविजानीयोवाक्यैःभेदविमोहि
ताः ॥ २८ ॥ केचिद्विकल्पवसनाआहुरात्मानमात्मनः ॥ देवमन्येपरेकर्मस्वभावमपरेप्रभुं ॥ २९ ॥

ह्यात्मनोबंधुरात्मैवरिपुरात्मनइति ॥ यद्वाविकल्पैः कुतर्कैः आवृत्तानास्तिवगः ॥ एवंहितेवदंतिनतावद्देवतादीनांप्रभुत्वंकर्माधीनत्वात्नच
कर्मणः ॥ स्वाधीनत्वात्अतः स्वयमेवप्रभुर्नवान्यः कश्चिदितिअन्येदेवत्वादेवंयग्रहादिरूपोदेवतापरेतुमीमांसकः अपरेलोकायतिकाः स्व
भावम् ॥ २९ ॥ ॥

भा॰ प्र॰ ॥ १९६ ॥

केष्वपि मतेष्वपि सुमध्ये केषपीति दुर्लभत्वं दर्शितं निश्चयं दूर्निरस्यति मते न त्वं ॥ अप्रतर्क्यात् मनोगोचरात् ॥ अनिर्देश्यात् वचसो गोचरात् परमेश्वरात् सर्वं भवतीति विमृश विचार्य स्वबुद्ध्या ॥ २० ॥ विखेदः गतमोहः पर्यचष्ट प्रत्यभाषत तान् वा निमित्तं वा ॥ २१ ॥ अनिर्देश्यमिति मिव ब्रुवन् ॥ घातकं जानन्नपि न सूचयेदित्येवं रूपं धर्मं ब्रवीषि अतो धर्मोसि सूचने कोदोष इत्यत आह स्थानं नरकादि ॥ २२ ॥ यद्वा ॥ अज्ञानादप्य॰

अप्रतर्क्यादनिर्देश्यादिति केष्वपि निश्चयः ॥ अत्रानुरूपं राजर्षे विमृश स्वमनीषया ॥ २० ॥ एवं धर्मे प्रवदति स सम्राड् द्विजसत्तमः ॥ समाहितेन मनसा विखेदः पर्यचष्ट तं ॥ २१ ॥ धर्मं ब्रवीषि धर्मज्ञ धर्मोसि वृषरूपधृक् ॥ यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत् ॥ २२ ॥ अथवा देवमायाया नूनं गतिरगोचरा ॥ चेतसो वचसश्चापि भूतानामिति निश्चयः ॥ २३ ॥ तपः शौचं दयासत्य मिति पादाः कृते कृताः ॥ अधर्मांशैस्त्रयो भग्नाः स्मयसंगमदैस्तव ॥ २४ ॥ ॥ छ

यत्नेन भवतीत्याह ॥ अथवेति ॥ देवस्य मायायाः गतिर्वध्यघातकलक्षणा वृत्तिः भूतानां चेतसो वचसश्चागोचराः युज्ञेयानभवतीति निश्चयः ॥ २३ ॥ धर्मोसाविति ज्ञात्वा तस्य पादानुवादेन व्यवस्थामाह तप इति द्वाभ्यां अधर्मस्यांशैस्त्रिभिरंशैस्तव त्रयः पादा भग्नाः स्मयो विस्मयः संगः स्त्रीसंगः मदः अहंभावः ॥ २४ ॥

राम ॥ १९६ ॥

इदानीं कलौ हे धर्म ते पादः चतुर्थांशस्तत्रापि स समेवास्तियतः सत्वाद्दुर्वानाम्मानं निवर्त्तयेत॥ कथं चिद्वारयेत॥ यद्वापुरुषस्त्वां साध
यन्नदपि पापं अन्नेन संवर्ह्वितिः। कलिरूपो यमधर्म्मः गृहीतुमिच्छतीति तत्र यं स्थितिः॥ कृतयुगे प्रथमं संपूर्णश्चतुष्पाद्धर्म्मः त्रेतायां चतु
र्णामपि पादानां मध्ये सत्येन तपसंगेन शौचं मदेन दया अन्नेनैन सत्वामिसेवं चतुर्थांशो हीयते॥ द्वापरे त्वर्द्धः कलौ चतुर्थांशो वशि

इदानीं धर्मपादस्तेस त्वं निर्वर्त्तयेद्यतः॥ तं जिघत्सत्स धर्मो यमन्नेनैधितुः कलिः॥२५॥ इ
दं च भूर्भगवतान्यासि जोरुभरासती॥ श्रीमद्भिर्मत्सदन्यासैः सर्वतः कृतकौतुका॥२६॥ शो
चत्यश्रुकलासाध्वी दुर्भगेवास्मिताधुना॥ अब्रह्मण्यात्प्रव्याजाः शूद्रभोक्ष्यंतिमामि
ति॥२७॥ इति धर्मं महीं चैव सांत्वयित्वा महारथः॥ निशातमाददे खड्गं कलये धर्म्महनवे॥२८

ष्यते सौ पथ्येनेवं वक्ष्यतीति॥२५॥ न्यासिनः अन्योन्यप्रहारेणावतारितः उरुर्भरो भारो यस्याः कृतं कौतुकं मंगलं यस्याः सा अश्रूणि कलयति मु
चतीत्यश्रुकला तेन सत्कारासती अ शूद्रा भोक्ष्यंतिमामितिशोचति॥ २७॥ निशातं निशितं अधर्मस्य हेतुः कलिस्तं हंतुमित्यर्थः॥२८॥

अभिप्रेत्य ज्ञात्वा ॥२९॥ शरण्य आश्रयार्हः श्लोक्यः सत्कीर्त्यर्हः ॥३०॥ गुडाकेशोऽर्जुनः तस्य यशो धरंति ये तेषां नास्ति बद्धांजलिर्यस्त तस्य ते किंतु कथंचन केनाप्यंशेन न वर्तितव्यं यस्मात्त्वमधर्मस्य बंधुः ॥३१॥ नरदेवा हि राजदेहेषु वर्तमानं त्वामनुप्रवृत्तः अनार्यं दौर्जन्यं अंहः

तं जिघांसुमभिप्रेत्य विहाय नृपलांछनं ॥ तत्पादमूलं शिरसा समगाद्भयविह्वलः ॥२९॥ पतितं पादयोर्वीरः कृपया दीनवत्सलः ॥ शरण्यो नावधीत् श्लोक्य आह चेदं हसन्निव ॥३०॥ राजोवाच ॥ न ते गुडाकेशयशोधराणां बद्धांजलेर्वै भयमस्ति किंचित् ॥ न वर्तितव्यं भवता कथंचन क्षेत्रे मदीये त्वमधर्मबंधुः ॥३१॥ त्वां वर्तमानं नरदेवदेहेष्वनुप्रवृत्तोऽयमधर्मपूगः ॥ लोभोऽनृतं चौर्यमनार्यमंहो ज्येष्ठा च माया कलहश्च दंभः ॥३२॥ न वर्तितव्यं तदधर्मबंधो धर्मेण सत्येन च वर्तितव्ये ॥ ब्रह्मावर्ते यत्र यजंति यज्ञैर्यज्ञेश्वरं यज्ञवितानविज्ञाः ॥३३॥ ॥ छ

स्वधर्मत्यागः ज्येष्ठा अलक्ष्मीः माया कपटं ततस्तस्माद्धेतोर्न गच्छेर्वर्तितुं मे हे ब्रह्मावर्ते देशे यज्ञस्य वितानं विस्तारस्तत्र विज्ञाः निपुणाः ॥३३॥ ॥

इज्यायागस्तद्रूपामूर्त्तिर्यस्य सत्क्षेमं कामांश्च तन्विद्वाद योदेवा इत्युक्तं तेन तु हरिस्तत्राह ॥ एष स्थावरादीनां आत्मेति तथापि जीव
वत्परिछिन्न इत्याह ॥ अंतर्बहिरिति यथा वायुः प्राणरूपेणांतस्त्यापि बहिरप्यास्ति तद्वत्सर्वांतर्यामीश्वरोपीति उद्यतासिं उ

यस्मिन्हरिर्भगवानिज्यमान इज्यात्ममूर्त्तिर्यजतां शं तनोति ॥ कामानमोघान्स्थिरजंगमानामं
तर्बहिर्वायुरिवैष आत्मा ॥३४॥ सूत उवाच ॥ परीक्षितैवमादिष्टः कलिः संजातवेपथुः ॥ त
मुद्यतासिमाहेदं दंडपाणिमिवोद्यतं ॥३५॥ यत्र क्व चनवत्स्यामि सार्वभौम तवाज्ञया ॥ लक्ष
येत तत्र तत्रापि त्वामात्तेषुशरासनं ॥३६॥ तन्मे धर्मभृतां श्रेष्ट स्थानं निर्देष्टुमर्हसि ॥ यत्रैव नि
यतो वत्स्ये आतिष्टंस्तेनुशासनं ॥३७॥ ॥

द्यतखड्गं दंडपाणिं ॥ यमं उद्यतमुद्युक्तं ॥३५॥ अत्र न वत्स्यामीति यातनाहात यायत्र क्वापि च वत्स्यामि ॥ किंतु तत्र तत्रापि आत्तः गृ
हीत इषुः ॥ शरासनं च येनतं त्वामेव लक्षयेनत ॥ तस्मान्नियतो निश्चलो वत्स्यामि ॥३७॥ ॥

पानंमद्यादेः सूनाप्राणिवधः द्यूतेअनृतंपानेमदः स्त्रैणंमदोदयानाशकत्वेनोक्तः अत्रतुगर्वद्वारात्तपोनाशकत्वेनउक्तः स्त्रीषुसंगः हिंसा यांवैरंदयानाशकमितित्वेयं ॥ यद्यपिसर्वंसर्वत्रसंभवतितथापिप्राधान्येनानृतादीनांद्यूतादिषुयथासंख्यंज्ञेयंद्वादशेस्कंधेतु ॥ सत्यंदयातपोदानमितिपादाविभोर्नृपेत्यत्रदानशब्देनशौचमेवोक्तंमनःशुद्धिरूपत्वात्एतानभयदानस्यैवेतिवा अधर्मपादानांतु

सूतउवाच ॥ अभ्यर्थितस्तदातस्मैस्थानानिकलयेददौ ॥ द्यूतंपानंस्त्रियःसूनायत्राधर्मश्चतुर्विधः ॥ ३८ ॥ पुनश्चयाचमानायजातरूपमदात्प्रभुः ॥ ततोनृतंमदंकामंरजोवैरंचपंचमं ॥ ३९ ॥ अमूनिपंचस्थानानिह्यधर्मप्रभवः कलिः औत्तरेयेणदत्तानिन्यवसत्तन्निदेशकृत ॥ ४० ॥

शोहीयतेशनैः अधर्मपादैरनृतहिंसासंतोषविग्रहैरित्यत्रच असंतोषशब्देनतस्यहेतुर्गर्वोलक्ष्यतेविग्रहशब्देनचतद्धेतुः स्त्रीसंगइत्यविरोधः ॥ ३८ ॥ चतुर्विधस्याप्येकत्रैवावस्थानंदेहीतिपुनर्याचमानायजातरूपंसुवर्णमदात्ततः सुवर्णदानादनृतंमदंकाममिति स्त्रीषुसंगरजइतिरजोमूलांहिंसांएतानिचत्वारिपंचमंवैरंवादादिति अमूनिअमुष्मुस्थानेषुनिवसेदित्यर्थः ॥ ४० ॥ ॥

अथैतानि हेतो: बुभूषु: उद्भवितुमिच्छु: स्त्रीसुवर्णयोरसेवनं नाम तयोरनासक्तिः ॥ एवं कलिनिग्रहान्वृषस्य पादान्प्रतिसंदधे तपआ
दीनि प्रवर्तितवानित्यर्थ: ॥ युष्मादीयमत्रप्रवृत्तिरपि तत्प्रभावादेवेत्याह त्रिभि: ॥ एतर्हि इदा विविक्षु इच्छता उपन्यस्तं समर्पितं आस

अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित् ॥ विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः ॥ ४१ ॥ वृ
षस्य नष्टांस्त्रीन्पादान्तपः शौचं दयामिति ॥ प्रतिसंदध आश्वास्य महीं च समवर्द्धयत् ॥ ४२ ॥
स एष एतर्ह्यध्यास्त आसनं पार्थिवोचितं ॥ पितामहेनोपन्यस्तं राज्ञारण्यं विविक्षता ॥ ४३ ॥ आ
स्ते धुना स राजर्षिः कौरवेंद्रश्रियोल्लसन् ॥ गजाह्वये महाभागश्चक्रवर्ती बृहच्छ्रवाः ॥ ४४ ॥ इ
त्थंभूतानुभावोयमभिमन्युसुतो नृपः ॥ यस्य पालयतः क्षौणीं यूयं सत्राय दीक्षिताः ॥ ४५ ॥ इ

नमध्यास्ते ॥ अधुना पालयते ॥ इति वर्तमानसामीप्ये वर्तमानवन्निर्देशः ॥ स्मेत्यध्याहार्यं ति श्री भा· म· प्र· सप्तदशोध्यायः
वा सत्राय सत्रं कर्तुं दीक्षिता: ॥ दीक्षां कृतवंत: ॥ ४५ ॥ इति श्रीभागवते प्रथमे सप्तदशोध्यायः ॥ १७ ॥ ६ ॥

भा॰ प्र॰
॥१०२॥

राज्ञस्त्वष्टादशेत स्य ब्रह्मशापो निरूप्यते स चानुग्रह एवास्य जातो वैराग्यमावहन् ॥ परीक्षितो निर्याणमस्याश्चर्यं येव कृतं तत्संभावनाय जन्मारभ्य
ये मन्तुस्मास्यांति यावाउति ॥ विप्लुष्टो निर्दग्धः ॥१॥ ब्रह्मकोपादुत्थितात्तक्षकाद्यः प्राणविप्लवः प्राणनाशस्तस्माद्यदुरुभयं तस्मान्न संमुमो

सूत उवाच ॥ यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः ॥ अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः
॥१॥ ब्रह्मकोपोत्थिताद्यस्तु तक्षकात्प्राणविप्लवात् ॥ न संमुमोहोरुभयाद्भगवत्यर्पिताशयः ॥२॥
उत्सृज्य सर्वतः संगं विज्ञाताजितसंस्थितिः ॥ वैयासकेर्जहौ शिष्यो गंगायां स्वं कलेवरं ॥३॥ नोत्त
मश्लोकवार्त्तानां जुषतां तत्कथामृतं ॥ स्यात्संभ्रमोंतकालेपि स्मरतां तत्पदांबुजं ॥४॥ ॥ छ

हितत्र हेतुः यत्कृष्णभगवत्यर्पिताशय इति ॥२॥ किंतु उत्सृज्येति वैयासकेः शुकस्य शिष्यः सन् विज्ञाता अजितस्य हरेः संस्थितिस्तत्त्वं येन सः
॥३॥ न चैतच्चित्रमित्याह उत्तमश्लोकस्य वार्त्ता येषु अतएव नित्यं तत्कथारूपममृतं जुषतां संभ्रमो न स्यात् ॥४॥ ॥ छ

राम
॥१०२॥

तस्मिन्नराज्ञि सुतरां तन्न्वित्रमित्याशयेनाह॥ तावदिति अभिमन्योः पुत्रः एकराट् चक्रवर्त्ती ईशः पतिः तावत्॥५॥ ननु तदा कलेः प्रवेश एवास्तु तत्र विष्टोपि न प्रभवेदिति कुतस्तत्राह॥ ननु द्वेष्टीति सारंगो भ्रमर इव सारग्राही सारमाह यद्यस्मिन् कुशलानि पुण्यानि

तावत्कलिर्न प्रभवेत्प्रविष्टोपीह सर्वतः॥ यावदीशो महानुर्व्यामाभिमन्यव एकराट्॥५॥ यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गां॥ तदैवेहानुवृत्तोसावधर्मप्रभवः कलिः॥६॥ नानुद्वेष्टि कलिं सम्राट् सारंग इव सारभुक्॥ कुशलान्याशु सिद्ध्यंति नेतराणि कृतानि यत्॥७॥ किं नु बालेषु शूरेण कलिना धीरभीरुणा॥ अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्त्तते॥८॥

आशु संकल्पमात्रेण फलं तिष्ठंतरेणापापानि आशु न सिध्यंति यत्तस्मानि कृतान्येव सिध्यंति न तु संकल्पितमात्राणीति॥७॥ ननु दोषाधिक्यात् द्वेष एव युक्तो न धीरश्चेत्तस्य किं चित्करत्वादित्याह किं न्विति किं नु तेन भवेत् बालेषु अप्रमत्तः अवहितः सन् यो वृक इव वर्त्तते॥८॥ ॥

भा०प्र०
॥१०३॥

पारीक्षितमाख्यानं अपृच्छत पृष्टवंतो यूयं ॥९॥ किंबहुनानैरेरतावदेवकर्त्तव्यमितिसर्वशास्त्रसारंकथयन्तियायाइतिकथनीयासुरु
रुकर्मणोयस्यतस्यगुणकर्मविषयाबुभूषुभिः सद्भावमिच्छद्भिः ॥१०॥ विस्तरेणकथनार्थंसूतोक्तितत्संगत्याभिनंदंति सूतेति
नित्रिभिः शाश्वतीः समाः अनंतान्वत्सरान् जीवअत्यंतसंयोगेद्वितीया ॥ विशुद्धंयशकीर्त्तंयसितत्वाअस्माकंमर्त्यानाममृतंमरण

उपवर्णितमेतद्वः पुण्यंपारीक्षितंमया ॥ वासुदेवकथोपेतमाख्यानंयदपृच्छत ॥९॥ यायाः
कथाभगवतः कथनीयोरुकर्मणः गुणकर्माश्रयाः पुंभिः संसेव्यास्ताबुभूषुभिः ॥१०॥ ऋष
यऊचुः सूतजीवसमाःसौम्यशाश्वतीर्विशदंयशः ॥ यस्त्वंशंसतिकृष्णस्यमर्त्यानाममृतंहि
नः ॥११॥ कर्मण्यस्मिन्ननाश्वासेधूमधूम्रात्मनांभवान् ॥ आपाययतिगोविंदपादपद्मास
वंमधु ॥१२॥

निवर्त्तकं ॥११॥ किंच ॥ अस्मिन्कर्मणिसत्रे अनाश्वासेअविश्वसनीयेवैगुण्यबाहुल्येनफलनिश्चयाभावात् ॥ धूमेनधूम्रः
विवर्णआत्माशरीरंयेषांतान् अस्माकर्मणिषष्ठीआसवंमकरंदंमधुमधुरं ॥१२॥ ॥ ध ॥ ॥

राम
॥१०३॥

भगवत्संगिनो विष्णुभक्ताः तेषां संगस्य यो लवः अत्यल्पकालः तेनापि स्वर्गं न तुलयाम समं न पश्याम: न चापवर्गं तत्भावनायां लोटमर्त्या नां तुच्छा आशिषो राज्याद्यास्तान् तुलयामेति किमु वक्तव्यम् ॥१३॥ एवं सत्संगमभिनंद्य श्रवणोत्सुक्यमाविः कुर्वंति कोनामेति रसे वितृ

तुलयाम लवेनापि न स्वर्गं नापुनर्भवं ॥ भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥१३॥ को ना म तृप्येद्रसवित्कथायां महत्तमैकांतपरायणस्य ॥ नांतं गुणानामगुणस्य जग्मुर्योगेश्वरा ये भवपाद्ममुख्याः ॥१४॥ तन्नो भवान्वै भगवत्प्रधानो महत्तमैकांतपरायणस्य ॥ हरेरु दारं चरितं विशुद्धं शुश्रूषतां नो वितनोतु विद्वन् ॥१५॥ ॥ छ छ

प्तः महत्तमानामेकांतेन परं अयनं आश्रयो यः । तस्य कथायां अगुणस्य प्राकृतगुणरहितस्य कल्याणगुणानामंतं ये योगेश्वरास्ते पि न जग्मुः एतावंत इति न परिच्छेदं चक्रुः भवः शिवः पाद्मो ब्रह्मा च मुख्यो येषां ते ॥१४॥ नोस्माकं मध्ये भगवान्प्रधानं सेव्यो यस्य स भवान्नः शुश्रूषतां हरेश्चरितं विस्तारयतु ॥१५॥

भा॰प्र॰
॥१०४॥

तच्चपरीक्षितस्शुकसंवादेन कथयेत्याह सवाइ निष्ठाम्यां वैयासकिशब्दितेन कथितेन येन ज्ञानेन ज्ञानसाधनेन अपवर्ग इत्याख्या यस्य तत्त्
खगेंद्रध्वजस्य हरेः पादमूलं भेजे ॥ १६ ॥ तदसद्वृनार्थं यथा तथा ख्याहितं देवनिर्दिष्टं इति परीक्षितं ॥ आख्यानं श्रीभागवतं पुराणं परं पु
ण्यं सत्त्वशोधकं ॥ अत्यद्भुतयोगनिष्ठा यस्मात् तं स चारितैरुपपन्नं पुक्तमत एव भागवतानामभिरामं प्रियं एतैर्विशेषणैः कर्मतान

ततैवं महाभागवतः परीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिः ॥ ज्ञानेन वैयासकिशब्दितेन भेजे
खगेंद्रध्वजपादमूलं ॥ १६ ॥ तन्नः परं पुण्यमसंवृतार्थमाख्यानमत्यद्भुतयोगनिष्ठं ॥ आ
ख्याह्यनंताचरितोपपन्नं पारीक्षितं भागवताभिरामं ॥ १७ ॥ सूत उवाच ॥ अहो वयं जन्मभृ
तोद्य हास्म वृद्धानुवृत्त्यापि विलोमजाताः ॥ ॥

भैंतव्याख्यानेन लब्धप्रसंगं महतामादरपात्रमात्मानं श्लाघते ॥ द्वाभ्यां ॥ अहो इत्याश्चर्ये हर्षे वयमिति वक्तुवचनं श्लाघायां प्रतिलो
मजा अपि ॥ अद्य जन्मभृतः ॥ सफलजन्मानः आत्मजाताः ॥ वृद्धानामनुवृत्त्या आदरेण ज्ञानवृद्धः शुकः तस्य सेवयेति वा ॥ यतो दुष्कु
लं खल्विमित्तं आधिं च मनःपीडां महत्तमानामभिधा ॥ ॥

राम
॥१०४॥

नयोगः लौकिकोपि पुनर्दौष्कुल्यमिति ॥ यद्वा गृणतः पुंसः संभाषणालक्षणः संबंधः विधुनोति अपनयति ॥१८॥ कुतः पुनः किं पुनर्वक्तव्यं
तस्यानंतस्य नाम गृणतः पुंसो महत्तमानामभिधानयोगो दौष्कुल्यं विधुनोतीति यद्वा नाम गृणतः तस्य नाम दौष्कुल्यं विधुनोतीति किं
वक्तव्यमिति कैमुत्यमेवाह ॥ अनंताः शक्तयो यस्य स चासावनंतः किंच महत्सु गुणा यस्य स महद्गुणः ~~तस्य भाव~~ तस्य भावस्तस्मात् यं गुण

दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्तमानामभिधानयोगः ॥१८॥ कुतः पुनर्गृणतो नाम त
स्य महत्तमैकांतपरायणस्य ॥ योनंतशक्तिर्भगवाननंतो महद्गुणत्वाद्यमनंतमाहुः ॥१९॥
एतावतालं ननु सूचितेन गुणैरसाम्यानतिशायनस्य हित्वेतरान्प्रार्थयतो विभूतिर्यस्यां
घ्रिरेणुं जुषतेनभीप्सोः ॥२०॥

तोप्यनंतमाहुः ॥१९॥ एतत्प्रपंचयति त्रिभिः एतावतेति ॥ तस्य यदसाम्यं अनतिशायनं च गुणैः तत्साम्यं तदधिकं चान्यस्य ज्ञानं एताव
ता सूचितेन अलं पर्याप्तं कस्मात् तो वक्तुं शक्यते न देवा हरतरान्ब्रह्मादीन्प्रार्थयमानान्हित्वा विभूतिः श्रीः अनभीप्सोरपि यस्यांघ्रिरेणुं से
वत इति ॥२०॥

भा·प्र

॥१०५॥

अथेत्यर्थांतरे यस्य पादनखाद्वसृष्टं निःसृतमपि विरिंचेनोपहृतं समर्पितं अर्हणांभः अर्घोदिकमीशसहितं जगत्पुनाति विरिंच्योप
हृतं सेशमिति च तयोरप्युपाधिकत्वमुक्तं ॥ तस्मात्मुकुंदव्यतिरिक्तः को नाम भगवत्पदस्यार्थः सर्वेश्वर इत्यर्थः ॥२१॥ धीराः संतः
ऊढं घनं अंत्यं परमकाष्ठापन्नं ॥ तदाह यस्मिन्नत्र हिंसा उपशमश्च स्वाभाविको धर्मः ॥२२॥ एवं स्वभाग्यमभिनंद्य पारीक्षितो पा

अथापि यत्पादनखावसृष्टं जगद्विरिंच्योपहृतार्हणांभः ॥ सेशं पुनात्यन्यतमो मुकुंदात्को
नाम लोके भगवत्पदार्थः ॥२१॥ यत्रानुरक्ताः सहसैव धीरा व्यपोह्य देहादिषु संगमूढं
व्रजंति यत्पारमहंस्यमंत्यं यस्मिन्नहिंसोपशमः स्वधर्मः ॥ अहं हि पृष्टोर्यमणो भवद्भि
राचक्ष आत्मावगमोत्र यावान् ॥ नभः पतंत्यात्मसमं पतत्रिणस्तथा समं विष्णुगतिं विपश्चि
तः ॥२३॥

स्वमानं वक्तुमाह अहं हीति अर्यमणः हे सूर्याः त्रयीमूर्तयः अत्र यावान् आत्मावगमः मम स्यात्तं तावत् आचक्षे एव
क्ष्यामि तथा हि यथा पक्षिणो नभः आत्मसमं स्वशक्त्यनुरूपमेव उत्पतंति न कृत्स्नं तथा विपश्चितोपि विष्णोर्गतिं लीलां स्वसमं स्वमत्यनुरू
पमेव वदंतीत्यर्थः ॥२३॥

राम

॥१०५॥

॥२४॥ अचक्षाणः अपश्यन् तं प्रसिद्धमाश्रमं तस्मिन्मुनीशमीकं ॥ २५ ॥ प्रतिरुद्धाः प्रत्याहृताः इंद्रियादयो येन तं अत एव उपरतं स्थानत्रया
त् ॥ जाग्रदादिलक्षणात्परं तुरीयं पदं प्राप्तं ॥ अत एव ब्रह्मभूतत्वादविक्रियम् ॥ २६ ॥ विप्रकीर्णाभिराच्छन्नं रुरुर्मृगः ॥ विशेषः

एकदा धनुरुद्यम्य विचरन्मृगयां वने ॥ मृगाननुगतः श्रांतः क्षुधितस्तृषितो भृशं ॥२४॥
जलाशयमचक्षाणः प्रविवेश तमाश्रमं ॥ ददर्श मुनिमासीनं शांतं मीलितलोचनं
॥२५॥ प्रतिरुद्धेंद्रियप्राणमनोबुद्धिमुपारतं ॥ स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रि
यं ॥२६॥ विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन च ॥ विशुष्यत्तालुरुदकं तथाभूतमया
चत ॥२७॥ अलब्धतृणभूम्यादिरसंप्राप्तार्घसूनृतः ॥ अवज्ञातमिवात्मानं मन्यमा

नस्य चर्मणा चाच्छन्नं ॥ विशेषेण शुष्यत्तालुर्यस्य सः तथा ॥ भूतं मुनिमुदकमयाचत (नश्चुकोप ह ॥२८॥
२७ ॥ न लब्धं तृणाशनं भूमिरुपवेशस्थानं च येन सः न संप्राप्तः ॥ अर्घः सूनृतं प्रियवचनं च येन सः ॥२८॥ ॥ छ

मत्सरः नृतुत्कर्षासहनं ॥२८॥ गता संभ्रमं धनुः कोद्याचापाग्रेण ॥३०॥ सर्पनिधाने राज्ञोऽभिप्रायमाह एष किं मत्वा हृतसर्वेंद्रियः सन्मी
लितेक्षणः स्थितः यद्वा ॥ क्षत्रबंधुभिरागतैर्वा किंनु स्यादिति स्व वत्सयामपाहसमाधिः सन्निति जिहासे पेत्स्वर्थः ॥३१॥ तस्य पुत्रः श्रृंग

अमृतप्रभवैः सहसा सुतज्ञामर्हितात्मनः ॥ ब्राह्मणापतितं दृष्ट्वा मत्वा सेरामत्युरेवच ॥२९॥
सतु प्रसक्षे परेसेण नाममुकुरगंरूपा ॥ विनिर्गच्छ धनुः कोद्यानि धाय पुरमागमत् ॥३०॥
एषकिंनिम्नाशेषकरणोमीलितेक्षणः ॥ एषासमाधिरोहोस्वित् किंनुस्यात्क्षत्रबंधु
भिः ॥३१॥ तस्य पुत्रोऽतितेजस्वी विहरन्बालकोऽर्भकैः ॥ एतावदं माऽपितं श्रुत्वा तत्रेदमब्रवी
त् ॥३२॥ अहो अधर्मः पालानां पीवां वलिभुजामिव स्वामिन्यद्य यदासानां द्वारपालां सुना
मिव ॥३३॥

नाम अतितेजस्वी तपोबलसंपन्नः अद्य दुःखं तत्रार्भकमध्ये ॥३२॥ पालानां राज्ञां पीवां पुष्टानां अधर्ममेवनिर्दि
शति स्वामिनि दासानां यद्दग्धं पापाचरणं वलिभुजां काकानामिव वेति ॥३३॥ ॥ छ ॥

दासत्वं दर्शयति ॥ ब्राह्मणो हि निःसमां डंभां दृग्एव स्थितम् ॥ ३४ ॥ ततस्तदनंतरमहं शास्मि दंडयामि ॥ ३५ ॥ इति वयस्यानुकारो रोषेण ताम्रे अक्षिणी
यस्य कौशिकी नदीनस्या अपः संधिराषः वाग्वज्रे शापं ॥ ३६ ॥ इति एवं सर्पनिक्षेपेणादंक्ष्यति मस्य पिप्पति पाठांतरे भस्मी करिष्यति

ब्राह्मणः क्षत्रबंधुर्हि द्वारपालो निरूपितः ॥ स कथं तद्गृहे द्वास्थः सभांडं भोक्तुमर्हति ॥ ३४ ॥
कृष्णे गते भगवति शास्तर्युत्पथगामिनां ॥ तद्भिन्नसेतूनद्याहं शास्मि पश्यत मे बलम् ॥ ३५ ॥
इत्युक्त्वा रोषताम्राक्षो वयस्यान् ऋषिबालकान् ॥ कौशिक्याप उपस्पृश्य वाग्वज्रं विससर्ज ह ॥ ३६ ॥
इति लंघितमर्यादं मस्तकः सप्तमेहनि ॥ धक्ष्यति स्म कुलांगारं चोदितो मे ततद्रुहं ॥ ३७ ॥
ततो भ्येत्याश्रमं बालो गले सर्पकलेवरं ॥ पितरं वीक्ष्य दुःखार्तो मुक्तकंठो रुरोद ह ॥ ३८ ॥

स्मेति पाद प्रसणे कुलस्यांगार तुल्यं मे मया नतं तिहृस्व मां ॥ ३७ ॥ गले सर्पकलेवरं यस्य स तु लुक्समासः मुक्तकंठः उच्चैरित्यर्थः ॥ ३८ ॥

नेसंपर्विसज्यकेनापकारः कृतः ॥४०॥ अनभिनंदनवाक्यं शापायोग्यं नरेंद्रशब्दं श्रुत्वाप्राह अहोइत्यादिवनकष्टेत्वयामहत्पापंकृतं

तवाआंगिरसोब्रह्मन्श्रुत्वासुनिर्विलापनं ॥ उन्मील्यशनकैर्नेत्रे दृष्ट्वास्वांसेमनोरमं ॥३९॥ विस्वरूपपुत्रेपमप्रच्छवत्स कस्माद्धिरोदिषि ॥ केनवातेविप्रकृतमित्युक्तः सन्यवेदयत् ॥४०॥ निशम्यससमनदंहें नरेंद्रसम्राह्मणोनात्मजमभ्यनंदत ॥ अहोवतंताहोमहदत्तनेकृतंअल्पीयसिद्रोहकृरुदेसाध्वतः ॥४१॥ नवैनभिल्लारदेवपराद्धंसमातुमर्हेस्यविपक्कबुद्धे ॥ यत्तेजसादुर्विषहेणगुप्ताविरंतिभद्राण्यकुतोभयाः प्रजाः ॥४२॥ अलक्ष्यमाणेनरदेवनाम्निरथ्यांगपापेणावयमंगलोकः ॥ नराहिचोरमचुराविनंक्ष्यत्स्यारक्ष्यमाणोविवरूपवत्सपणन ॥४३॥

द्रोहेअपराधेदमोदंडः ॥४१॥ परोविष्णुरित्यास्मार्त्स्यानिर्यस्यतंनरदेवंनभिः समातुंसमर्हसि ॥४२॥ अलक्ष्यमाणे अदृश्यमानेअविव रूपवन्मेषसंघवत् ॥४३॥

नष्टोनायोयस्यलोकस्यवसोः वसुनोधनस्यविलुंपकात् ॥ अपहर्तुश्चौरादेर्हेतोर्यस्यापंभविष्यतिनतस्मिन्निमित्तत्वाद्स्यानुपेष्यति जनन्वयंसंबंधस्तत्पमेवजनेदेवपापंदर्शयतिपरस्परमितिशपन्तिपरुषंवदंतिपश्चाद्दीनं हंजनेअपहरंतीतिपुरुषस्यवश्चौरवद्भूता ॥

नदद्यनःपापमुपैत्यनन्वयंयत्नष्टनाथस्यवसोर्विलुंपकात् ॥ परस्परं घ्नंतिशपंतिहंजनेपमूनत्स्त्रियोर्थार्त्पुरुदस्यवोजनाः ॥४४॥ नदायधर्मश्चविलीयतेनृणांवर्णाश्रमाचारयुतस्त्रयीमयः ॥ ततोर्थकामाभिनिवेशितात्मनांशुनांकपीनामिववर्णसंकरः ॥४५॥ धर्मपालोनरपतिःसतुसंम्राड्बृहच्छ्रवाः ॥ साक्षान्महाभागवतोराजर्षिर्हयमेधयाट् ॥ क्षुत्तृट्श्रमयुतोदीनोनैवास्मच्छापमर्हति ॥४६॥ ॥ ७ ॥

॥४४॥ आर्यधर्मःसदाचारः शुनांकपीनामिवचार्थकामयोरेवाभिनिवेशितचित्तानां ॥४५॥ एवंराजमात्रस्यशापानर्हत्वमुक्त्वाप्रकृतेपरीक्षितिविशेषमाहधर्मपालइतिसार्द्धेनहयमेधयाट् अश्वमेधयाजी ॥४६॥

अस्यमहापापस्याप्यत्रप्रायश्चित्तमदृष्ट्वापापमोचेदयन्भगवंतंप्रार्थयते ॥ अपायेष्विति ॥ ४७ ॥ राज्ञोवेश्यास्तिशापंदधानोहिनिष्कृतिर्भवे दपितत्तुनसंभवतितत्स्यमहाभागवतत्वादित्याह ॥ निरस्कृतानिंदिताः विप्रलब्धाः वंचिताः क्षिप्ताः अवज्ञाताः हताः ताडिताः अस्यनिरस्कृता

अपायेषुस्वमर्त्येषुवाल्येनापक्वबुद्धिना ॥ पापंकृतंनमद्भगवान्सर्वात्माक्षंतुमर्हति ॥ ४७ ॥ तिर स्कृताविप्रलब्धाः शप्ताःक्षिप्ताहता अपि ॥ नास्यतत्प्रतिकुर्वंतितद्भक्ताःप्रभवोपिहि ॥ ४८ ॥ इ तिपुत्रकृताघेनसोनुतप्तोमहामुनिः ॥ स्वयंविप्रकृतोराज्ञानैवाघंतदचिंतयत् ॥ ४९ ॥ प्राय शः साधवोलोकेपरैर्द्वंद्वेषुयोजिताः ॥ नव्यथंतिनहृष्यंतियतआत्मागुणाश्रयः ॥ ५० ॥ इति श्रीभागवतेमहापुराणेअष्टादशोऽध्यायः ॥ १८ ॥ ॥ ॥ ॥ १८ ॥ ॥

रादिकृतं नतत्प्रतीकारंकुर्वंतितद्भक्ताःविष्णुभक्ताः प्रभवः समर्थाअपि ॥ ४८ ॥ विप्रकृतः अपकृतः अघंअपराधं ॥ ४९ ॥ युक्तंचैतदि त्याहप्रायशः इतिद्वंद्वेषुसुखदुःखादिषुअगुणाश्रयः सुखदुःखाश्रयोनभवति ॥ ५० ॥ भागवतार्थदीपिकायांअष्टादशः ॥ १८ ॥ ॥

प्रायोपविष्टं गंगायां राजर्षियोगिजनावृते ॥ शुकस्यागमनं तत्र प्रोक्तमेकोनविंशके ॥ १ ॥ स्वकृतं तत्कर्म मुनिस्कंधे सर्पप्रक्षेपणं गर्ह्यमिति नि-
न्द्यं विचिंतयन्सुदुर्मना जातः चिंतामेवाह ॥ अहो इति सार्द्धद्वाभ्यां नीचं पापं अनार्यवमिति पाठे पि स एवार्थः ब्रह्मणि ब्राह्मणे गूढं गुप्तं तेजो

सूत उवाच ॥ महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिंतयन्नात्मकृतं सुदुर्मनाः ॥ अहो मया नीचमनार्यवत्कृतं निरागसि ब्रह्मणि गूढतेजसि ॥ १ ॥ ध्रुवं ततो मे कृतदेवहेलनाद्दुरत्ययं व्यसनं नातिदीर्घात् ॥ तदस्तु कामं ह्यघनिष्कृताय मे यथा न कुर्यां पुनरेवमद्धा ॥ २ ॥

यस्य ॥ १ ॥ कृतं यद्देवहेलनं ईश्वरावज्ञा पापमित्यर्थः ॥ तस्मान्मे व्यसनं भविष्यति तच्च नातिदीर्घात्कालात् ॥ अपि च
रादेवास्तु तत्रापि अद्धा साक्षात्तत्पुत्रादिद्वारेण निप्राप्यतां कामं अशंकोचतः एवं प्रार्थनायाः प्रयोजनं ॥ अघस्य निष्कृताय प्रायश्चि-
त्ताय यथा पुनरेवं न कुर्यामिति च ॥ २ ॥

एवं साक्षात्स्वस्यैव व्यसनं तेन प्राप्येनतः प्रागेव किंचित्प्रार्थयते अद्येति ॥ अद्यैव मे राज्यादि दहतु प्रकोपितं ब्रह्मकुलमेवानलः पुनर्द्विजादीन्प्र
ऽपि यं तु धीर्मम माभून्मम भवेदित्यर्थः ॥ ३ ॥ इत्थं चिन्तयन्स राजा मुनेः सुतेनोक्तः सप्तमेऽह्नि तक्षकानलनिर्ऋतिर्मृत्युर्यथा भविष्यति तथाऽशृणो
त् ॥ शमीकप्रेषिताच्छिष्यात्तक्षकलाप्रसः ॥ तक्षकस्य विषाग्निं साधु मेने यतो विषयेषु प्रसक्तस्य विरक्तेः कारणम् ॥ ४ ॥ अथो अनन्तरममुं लो

अद्यैव राज्यं बलमृद्धकोशं प्रकोपितब्रह्मकुलानलो मे ॥ दहत्वभद्रस्य पुनर्न मेऽभूत्पापीयसी धीर्द्विजदेवगोभ्यः ॥ ३ ॥ स चिन्तयन्नित्थमथाशृणोद्यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः ॥ स साधु मेने न चिरेण तक्षकानलं प्रसक्तस्य विरक्तिकारणम् ॥ ४ ॥ अथो विहायेमममुं च लोकं विमर्शितौ हेयतया पुरस्तात् ॥ कृष्णाङ्घ्रिसेवामधिमन्यमान उपाविशत्प्रायममर्त्यनद्याम् ॥ ५ ॥

कं पुरस्तात्स्वर्गादिरूपमध्यमएव हेयतया विचारितौ तौ विहाय श्रीकृष्णाङ्घ्रिसेवामेवाधिकं मन्यमानः सर्वपुरुषार्थाधिकां ज्ञात्वा प्रायमनशनं तत्र स्मि
न्नित्यर्थः ॥ तत्संकल्पेनोपाविशदिति यावत् ॥ यद्वा ॥ प्रायं प्रकृष्टमयनं शरणं यथा भवति तथा अमर्त्यनद्यामिति ॥ ५ ॥ ॥ ॥

विशेषणस्यफलमाह यागंगालसंती श्रीर्यस्याः तुलस्याः तयाविमिश्राः ॥ येकृष्णांघ्रिरेणवस्तैरभ्यधिकंसर्वोत्कृष्टंयदंबुतस्यनेत्रीतद्वाहिनी उ
भयत्र अंतर्बहिश्च सेशाँल्लोकपालैः सहिताँल्लोकान्पुनाति ॥ मरिष्यमाणआसन्नमरणः मारणस्यानियतकालत्वात्सर्वोपितयाअत
स्तांकोनसेवेत ॥६॥ इतिएवंविष्णुपद्यांगंगायांप्रायोपवेशंप्रतिव्यवच्छिद्यनिश्चित्यपांडवेय इतितत्कुलोचितत्वंदर्शयतिनास्यतन्यस्मिन

यावैलसच्छ्रीतुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकांबुनेत्री ॥ पुनातिलोकानुभयत्रसेशा
न्कस्तांनसेवेतमरिष्यमाणः ॥६॥ इतिव्यवच्छिद्यसपांडवेयः प्रायोपवेशंप्रतिविष्णुपद्यां
दध्यौमुकुंदांघ्रिमनन्यभावोमुनिव्रतोमुक्तसमस्तसंगः ॥७॥ तत्रोपजग्मुर्भुवनंपुना
नामहानुभावामुनयः ॥ सशिष्याः प्रायेणतीर्थाभिगमापदेशैः ॥ स्वयंहितीर्थानिपुनंतिसं
तः ॥८॥

भावोयस्यसः कुतोमुनिव्रतः उपशांतः तत्कुतः मुक्तः समस्तसंगोयेनसः ॥७॥ तत्रतदातद्दर्शनार्थंमुनयः उपागताः
ननुतीर्थस्नानार्थंकृतार्थत्वात् ॥ ननुतादृशानामपितीर्थयात्रादृश्यते तत्राह प्रायेणेतितीर्थयात्राव्याजैः ॥८॥ ॥ छ ॥

॥ ९ ॥ अरुणादकां उषित्वविशेषेण पृथग्विधाः नानायान्यार्षेयाणि ऋषिणां गोत्राणि तेषु प्रवरान् श्रेष्ठान् शिरसा भुवं स्पृष्ट्वा ववंदे ॥ १
विज्ञापनार्थं पुनः कृतप्रणामः विविक्तं शुद्धचेतो यस्य ॥ अभिगृहीतो संयोजितो पाणी येन सः ॥ स्वचिकीर्षितं प्रायोपवेशनादिकं मे युक्तं

अत्रिर्वशिष्टश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरंगिराश्च ॥ पराशरो गाधिसुतोथराम उतथ्य इं
द्रप्रमदेध्मवाहौ ॥ ९ ॥ मेधातिथिर्देवल आर्ष्टिषेणो भारद्वाजो गोतमः ॥ पिप्पलादः ॥ मैत्रेय
और्वः कवषः कुंभयोनिर्द्वैपायनो भगवान्नारदश्च ॥ १० ॥ अन्ये च देवर्षिब्रह्मर्षिवर्या राज
र्षिवर्या अरुणादयश्च ॥ नानार्षेयप्रवरान्समेतानभ्यर्च्य राजा शिरसा ववंदे ॥ ११ ॥ सुखोपवि
ष्टेष्वथ तेषु भूयः ॥ कृतप्रणामः स्वचिकीर्षितं यत् ॥ विज्ञापयामास विविक्तचेता उपस्थितोग्रे
भिगृहीतपाणिः ॥ १२ ॥

अयुक्तं वेति विज्ञापयामास ॥ १२ ॥

अनुमोदनेनानुग्रहमालक्ष्यआत्मानंश्लाघते॥ अहोइति॥ नृपाणांमध्येमहत्तमैरनुग्रहणीयंशीलंवृत्तंयेषांतेतथाएतन्नामतिदुर्लभमित्या
हब्राह्मणानांपादशौचात्पादप्रक्षालनोदकाद्दूरादुच्छिष्टंविण्मूत्रपात्रंभांसि॥ समुत्सृजेदितिस्मृतेः दूरेहितैः तद्विरक्तेनतेनापिदूरे
देवविसृष्टंतत्रापिस्थातुमयोग्यमित्यर्थः॥ गर्ह्यंकर्मयस्येत्यात्मानमुद्दिश्योक्तं आत्मनामावदनुग्रहः ब्राह्मणापापिभगवत्प्रसादादे

परीक्षिदुवाच॥ अहोवयंधन्यतमानृपाणांमहत्तमानुग्रहणीयशीलाः॥ राज्ञांकुलंब्राह्मणपादशौचारादाद्विसृष्टंवतगर्ह्यकर्म॥१३॥ तस्यैवमेऽघस्यपरावरेशोव्यासक्तचित्तस्यगृहेष्वभीक्ष्णं॥ निर्वेदमूलोद्विजशापरूपोयत्रप्रसक्तोभयमाशुधत्ते॥१४॥

वजातइत्याह॥ तस्यगर्ह्यकर्मणएवजातः अघस्यपापात्मनः॥ गृहेष्वासक्तचित्तस्यमेस्वमाप्तयेपरावराणामीशएवद्विजशापतया
वभूव॥ यत्रयस्मिन्सापेसतिगृहेषुप्रसक्तोभयंयधत्तेनिर्विण्णोभवतियतोनिर्वेदमूलः॥ निर्वेदः वैराग्यंमूलंमासिकारणंयस्मिन्नस्य
स्यवैराग्यप्राप्यत्वात्तस्यचभयमूलत्वात्तद्रूपंद्विजशापंकारितवानित्यर्थः॥१४॥

भा. प्र.
॥२२४॥

ता स्मार्थयते ह्यम्भा ॥ नेमां मांउपयां नप्रतिवंतुजानंतु ॥ देवीदेवनाहृपावंगंगाव्रपसेतुवाशद्वः । प्रतिक्रियामारदरेगाथाः कथाः । स्य
म अनंतः । आश्रेयोयेषांतेषुप्रक्नुष्टसंगोभूयात्तत्तस्यानस्यास्ष्टोजन्मनि ॥१४॥ अध्यवसायोनिश्चयः । प्राचीनमूलेषुप्रागग्रेषुकुशे

नेमोपयांतंप्रतियंतुविप्रागंगगाचदेवीध्वनविन्नमीशे ॥ द्विजोपसृष्टः कुहकत्नस्कोवादरा
त्वेलंगापनविस्तुगाथाः ॥१५॥ पुनश्चभूपाहुगवत्सनंतेरतिः प्रसंगश्चनराश्रयेषु ॥ महत्सु
पांयामुपयामिरहिंमैत्र्यत्कसर्वेननमोद्विजेभ्यः ॥१६॥ इतिस्मराजाध्यवसाययुक्तः प्रा
चीनमूलेषुकुशेषुधीरः ॥ उदङ्मुखोदक्षिणाकूलजाते समुद्रपत्न्याः सम्मुनप्सलभारः
॥१७॥ एवंवचनास्मिन्नरदेवदेवेप्रयोपविष्टे दिवि देवसंघाः ॥ प्रशस्यनमोव्याकिरन्प्रसूनैर्मु
दामुकुंदुंदभयश्चनेदुः ॥१८॥

षुआस्तेस्मसत्सुनेजननेजयेन्यस्तोभारोराज्यंयेन ॥१७॥ प्रसूनैर्मुदाविकिरन्देवसंघेर्वादि
नानेदुः ॥१८॥

राम
॥२२४॥

प्रजानुग्रहे शीलं स्वभावः सारो बलं च येषां ॥ उत्तमश्लोकगुणै रभिरूपं सुंदरमिव ॥ १९ ॥ नव त्सु पांडोर्वंश्येषु ये जज्ञिरे तिं युधिष्ठिराद्यभिप्राय
ण ॥ २० ॥ परेस्य रं मंत्र यं ते सर्वइति परं श्रेष्ठं लोकं जनत्र हेतुः विरजस्कं निर्मायं विशोकं च यास्यतीति कुतस्तत्राह ॥ अयमिति ॥ २१ ॥ आश्रु

महर्षयो वै समुपागता ये प्रशास्य साक्षित्यत्तुमोदमानाः ॥ ऊचुः प्रजानुग्रहशीलसाराः यदु
त्तमश्लोकगुणाभिरूपं ॥ १९ ॥ नवाङ्इदं राजर्षिवर्यचित्रं भवत्सु कृत्स्नं समनुव्रतेषु ॥ येध्यात
नेराजकीरीटजुष्टं सद्यो जहुर्भगवत्पार्श्वकामाः ॥ २० ॥ सर्वेवयं तावदिहास्महे द्य कलेवरं
यावदसौ विहाय ॥ लोकं परं विरजस्कं विशोकं यास्यत्ययं भागवतः प्रधानः ॥ २१ ॥ आश्रु
त्य तदृषिगणवचः परीक्षित्समं मधुच्युद्गुरु चाव्यलीकं ॥ आभाषतैतानभिवंद्य युक्तं शुश्रू
षमाणश्चरितानि विष्णोः ॥ २२ ॥

त्य आकर्ण्य समं पक्षपातशून्यं मधुच्युत ॥ अमनतः त्वाविगुरुगंभीरार्थं अव्यली
कं सत्यं ॥ २२ ॥ ॥ छ ॥

त्रयाणांलोकानांपृष्ठेउपरिसत्यलोकेवेदायथामूर्त्तिधराभवंतितत्तुल्याः ज्ञानातिशयमुक्त्वाकृपालुतामाह नेहेति भवतांप्रयोजनंपरानुग्रहं
विनानास्तितर्हिसएवार्थःस्यात् ॥ न आत्मशीलंस्वस्वभावं पृच्छ्यं पृष्टव्यं विश्रभ्य विश्वासंकृत्वाएवंकर्त्तव्यमित्यस्यस्वभाव इतिकृत्यतानां अस्मिं
न्विषयेसर्वात्मनासर्वावस्थासुयत्कृत्यंविशेषतश्चम्रियमाणैः तच्चशुद्धंपापसंपर्करहितंआमृशतविचारयत ॥ २४ ॥ तत्रतेषुयोग

समागताः सर्वतएवसर्वेवेदायथामूर्त्तिधरास्त्रिपृष्ठे ॥ नेहाथवामुत्रचकश्चनार्थऋतेपरा
नुग्रहमात्मशीलं ॥ २३ ॥ ततश्चवः पृच्छ्यमिदंविपृच्छेविश्रभ्यविप्राइतिकृत्यतायां ॥ सर्वा
त्मनाम्रियमाणैश्चकृत्यंशुद्धंचतत्रामृशताभियुक्ताः ॥ २४ ॥ तत्राभवद्भगवान्व्यासपुत्रो
यदृच्छयागामटमानोनपेक्षः ॥ अलक्ष्यलिंगोनिजलाभतुष्टोवृतश्चबालैरवधूतवेषः ॥ २५ ॥

योगजपोदानादिभिर्विवदमानेषुसत्सुयदृच्छयागांपर्यटन्व्यासपुत्रःतत्राभवत्प्राप्तः ॥ नलक्ष्यमाश्रमादिलिंगंयस्य ॥ अवधूतःअव
ज्ञायजनैस्त्यक्तोयः ॥ तस्यैववेषोयस्यसः ॥ २५ ॥ ॥

नभित्यादीनांप्रसुस्थिताइतितजीयश्लोकेनान्वयः॥द्विगुणान्यष्टौवर्षाणियस्यसुकुमारौपादौकरौउरूबाहूअंसौकपोलौगात्रंचयस्यचा
रूणीआयतेअक्षिणीयस्मिन॥उन्नतानासायस्मिन्नंतलवहस्तादिवैषम्यंविर्नातुल्यौकर्णौयस्मिनशोभनेभ्रुवौचयस्मिन्एवंभूतमा
ननंयस्यकंबुवद्रेखात्रयांकितःसुष्टुजातःकंठोयस्य॥२६॥कंठस्याधोभागयोःस्थितेस्थितीजत्रुणीमांसेननिगूढेनत्रणीयस्य॥ष्ठ

तेद्व्यष्टवर्षसुकुमारपादकरोरुबाह्वंसकपोलगात्रं॥चार्वायताक्षोन्नसतुल्यकर्णसुला
ननंकंबुसुजातकंठं॥२६॥निस्तूढजत्रुंपृथुलंमवक्षसमावर्तनाभिंवलिवल्गदरंच॥दि
गंवरंवक्रविकीर्णकेशंमलंववांकुस्वमरोन्नमामं॥२७॥ ॥

पृथुविलीर्णंतुसमुन्नतंवक्षोयस्य॥आवर्तवन्नाभिर्यस्यवलिभिस्तिर्यक्निम्नरेखाभिर्वल्गुरम्यमुदरंयस्यदिशएववंबरंयस्यवक्रावि
कीर्णाःकेशायस्यमलंवौवाङ्कयस्यसमरेषुश्रेष्ठदेवेषुउत्तमोहरिस्तद्भूतअभागस्य॥२७॥

भा॰ प्र॰

॥११३॥

सदा अपीच्यमत्यंतेनोत्तमं यद्वयो यौवनं तेन या अंगलक्ष्मीर्विरह कांतिस्तया रुचिरस्मितेन गूढवर्चसमपि प्रत्युत्थिताः तं दृष्ट्वा प्रत्युद्गमं कृत
वंत इत्यर्थः ॥२८॥ शिरसैव सपर्यामाजहार ॥ आत्मनिवेदनं कृतवान् तेन सहागतास्त्र्यपत्यादयो निवृत्ताः ॥ उपविवेश संधिराद्यः ॥२९॥

श्यामं सदापीच्यवयोंगलक्ष्म्या स्त्रीणां मनोज्ञं रुचिरस्मितेन ॥ प्रत्युत्थितास्ते मुनयः स्वासनेभ्य
स्तल्लक्षणज्ञा अपि गूढवर्चसं ॥२८॥ स विष्णुरातोतिथय आगताय तस्मै सपर्यां शिरसाज
हार ॥ ततो निवृत्ता ह्यबुधाः स्त्रियोर्भका महासने सोपविवेश पूजितः ॥२९॥ स संवृतस्तत्र
महान्महीयसां ब्रह्मर्षिराजर्षिदेवर्षिसंघैः ॥ व्यरोचतालं भगवान्यथेंदुर्ग्रहर्क्षतारानिकरैः
परीतः ॥३०॥ प्रशांतमासीनमकुंठमेधसं मुनिं नृपो भागवतोभ्युपेत्य ॥ प्रणम्य मूर्ध्नावहि
तः कृतांजलिर्नत्वा गिरा सूनृतयान्वपृच्छत ॥३१॥

स भगवान्ब्रह्मर्षिसंघादिभिः संवृतः सन् अलं व्यरोचत ग्रहाः शुक्रादयः ॥ ऋक्षाणि अश्विन्यादीनि अन्यास्ताराः ॥३०॥ नकुंठा सर्वार्थेषु मेधा यस्य प्रश्नार्थं पुनर्नत्वा सूनृतया गिरा माह ॥३१॥

राम

॥११३॥

अहो इति पंचभिः सतां सेव्या जाताः यतः अतिथिरूपेण हेतुना तीर्थका योग्याः ॥३२॥ विष्णोः सानिध्यादसुरगणा यथा द्रव ॥३४॥ पांडुसुतानां प्रि-
यः कृष्णः अद्य मे प्रसन्नो जातः अतस्तेषां पैतृष्वस्रेयाणां प्रीत्यर्थं तद्गोत्रस्य तत्सुतस्य मे आत्मीकृतं बांधवं बंधुकृत्यं येन सः ॥३५॥

अहो अद्य वयं ब्रह्मन्सत्सेव्याः क्षत्रबंधवः ॥ कृपयातिथिरूपेण भवद्भिस्तीर्थकाः कृताः ॥३२॥ येषां संस्मरणात्पुंसां सद्यः शुध्यंति वै गृहाः ॥ किं पुनर्दर्शनस्पर्शपादशौचासनादिभिः ॥३३॥ सांनिध्यात्ते महायोगिन्पातकानि महांत्यपि सद्यो नश्यंति वै पुंसां विष्णोरिव सुरेतराः ॥३४॥ अपि मे भगवान्प्रीतः कृष्णः पांडुसुतप्रियः पैतृष्वसेयप्रीत्यर्थं तद्गोत्रस्यात्तबांधवः ॥३५॥ अन्यथा तेऽव्यक्तगतेर्दर्शनं नः ॥ कथं नृणां नितरां म्रियमाणानां संसिद्धस्य वनीयसः ॥३६॥

अन्यथा श्रीकृष्णप्रसादं विना न वदर्शनं कथं ॥ अस्मदादीनां तत्रापि नितरां म्रियमाणानां कथं स्या-
त् ॥ अव्यक्ता गतिर्यस्य स्वनायिता याचयिता वनपितनमो वनीयान् तस्य ॥ अत्युदारतया मां याचस्व इति प्रवर्तकस्येत्यर्थः ॥३६॥ ॥ ॥

सम्यक्सिद्धिर्यस्मात्तं यत्कार्य्यं कर्तुं योग्यं कर्तव्यं तावश्यकमिति भेदः ॥ अत एव वक्तुं सर्वथा म्रियमाणस्य पुरुषस्य यस्मिन् कृते संसिद्धिर्भो
क्तलक्षणा भवति तां योगिनां गुरुं पृच्छामि यत् श्रोतव्यं यज्जाप्यं यत्कर्तव्यं यत्स्मर्तव्यं यदाराध्यं तद्ब्रूहि विपर्ययं अश्रोतव्यादि ॥ ३८ ॥ त

अतः पृच्छामि संसिद्धिं योगिनां परमं गुरुं ॥ पुरुषस्येह यत्कार्यं म्रियमाणस्य सर्वथा ॥ ३७ ॥
यच्छ्रोतव्यमथो जाप्यं यत्कर्तव्यं नृभिः प्रभो ॥ स्मर्तव्यं भजनीयं वा ब्रूहि यद्वा विपर्ययं
॥ ३८ ॥ नूनं भगवतो ब्रह्मन् गृहेषु गृहमेधिनां ॥ न लक्ष्यते ह्यवस्थानमपि गोदोहनं क्वचित् ॥ ३९ ॥

दर्शनस्य पुनर्दुर्लभत्वात् ॥ इदानीमेव कथनीयमित्याशयेनाह ॥ नूनमिति गोदोहनमात्रकालमपि ॥ ३९ ॥ ॥ छ ॥ ॥

[OrderDescription]
,CREATED=15.07.20 11:21
,TRANSFERRED=2020/07/15 at 11:48:52
,PAGES=225
,TYPE=STD
,NAME=S0003324
,Book Name=M-2778-BHAGWAD
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF

FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF

FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF

FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF

FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF

FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF

FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF

FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF

FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF

FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF

FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,